CC-0. Digitized by eGangotri and MIDF- Delhi

संस्कृतकवितासङ्ग्रहः

(द्वितीयपुष्पम्)

प्रकाशकम्
जयतु संस्कृतम्
काष्ठमण्डपः, नेपालः, दूरभाषः ०१-४२३०३७१

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जयतु संस्कृतम् संस्थायाः पञ्चदशपुष्पम्- १५

संस्कृतकवितासङ्ग्रहः

(द्वितीयपुष्पम्)

परामर्शदातारः

प्रा. विद्यानाथ उपाध्यायः
शरत्कुमारः भट्टराई
डा. बद्री पोखरेल

सम्पादकाः

प्रा.डा. विष्णुप्रसादशर्मा देवकोटा
प्रा. रामहरिः दाहाल
सहप्रा. नवराजः कट्टेल
सहप्रा. भीमप्रसादः कण्डेल
सहप्रा. माधवप्रसादः लामिछाने
सहप्रा. मुकुन्दप्रसादः लामिछाने

सहयोगिनः

डा. श्रीरामः अधिकारी
रामरञ्जनः पौडेल
उपप्रा. रामहरिः तिमल्सिना
उपप्रा. श्यामणिः नेपाल

प्रकाशकम्

जयतु संस्कृतम्

काष्ठमण्डपः नेपालः, दूरभाषः ०१-४२३०३७१

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पुस्तकनाम	:	संस्कृतकवितासङ्ग्रहः (द्वितीयं पुष्पम्)
Book's Name	:	Sanskrit Kavita Sangraha
प्रकाशकः	:	जयतु संस्कृतम् (दूरभाषः ४-२३०३७१)
Publisher	:	Jayatu Sanskritam Anamanagar, Kathmandu
संस्करणम्	:	प्रथमम्
Edition	:	First, 2070 (2013)
पुस्तकसङ्ख्याः	:	५०० प्रति
Printed Copies	:	500 Copies
प्रकाशनवर्षम्	:	वि.सं. २०७०, श्रावणी
Publication Year	:	2070
सर्वाधिकारः	:	प्रकृतसंस्थायाम्
©	:	Jayatu Sanskritam
मुद्रकः	:	किशोरमुद्रणलयः काष्ठमण्डपः, नेपालः।
Printed	:	Kishor Offset Press (P.) Ltd., Ph.: 4022544, KTM. Nepal
मूल्यम्	:	रू. २११/-
Price	:	Rs. 211/-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रकाशन-सन्दर्भः

तमसो मा ज्योतिर्गमय इत्याद्युपनिषद्वाक्यानि तमसो नाशं सङ्केतयन्ति । दीपज्योतिर्हि तमो नाशयति । यथा ज्योतिःप्रदो दीपकः प्रज्वलितः सन् जनान् वस्तूनि च प्रकाशयति तथैव विचाराणामभिव्यक्त्या तथ्यानां प्रकाशनं भवति । दीपो यथा तैल-वर्त्त्यनलपुञ्जो भवति । स एव च तमो नाशयति । तमो नाश एव च प्रकाशस्तथैव विचार-तत्संयोजनप्रकटीकरणान्ये व च कविता, काव्यं लेखनं वा भवन्ति । तदपि जनानामन्धकारजातं नाशयति । अत्रत्यञ्च प्रकाशनं नवस्य ज्ञानस्य सम्प्रेषणरूपमेव । कवितापाठवेलायां तन्माध्यमेन कविमुखात् प्रकटितानां विचाराणामेकं प्रकाशनं मन्तव्यम् । तच्च श्रावणरूपं प्रकाशनं चिरस्थायि, व्यापकम्, सर्वसुलभम्, प्रसिद्धञ्च न भवति । यैः कवितापाठवेलायां ताः श्रुताः त एव लाभभाजो नान्ये । अतो मुद्रणमाध्यमेन पुस्तकाकाररूपेणैव तस्य प्रकाशनमावश्यकमिति तत्प्रसङ्गो जागर्त्तीदानीम् । आङ्ग्लभाषासंस्कारप्रभावितेऽस्मिन् खलु समये संस्कृतकवितालेखनम्, संस्कृतकविगोष्ठीसम्पादनम्, कविताप्रकाशनञ्चैतिहासिकरूपेणापि महत्त्वपूर्णं विज्ञायते । अनया परम्परया भाविनोऽपि जना एतादृशि कार्ये संलग्ना भविष्यन्तीति प्रयोजनान्तरम् । कविताकरणे, तच्छ्रावणे तत्प्रकाशने च संस्कृतज्ञानां संस्कृतप्रणयिनाञ्चास्माकं प्रवृत्तिः परम्परा च बहोः कालात् प्रवर्तमाना प्रतीयते । तस्या निरन्तरता अस्माकमभीष्टेति अत्र कार्ये प्रवृत्तिः ।

विचक्षणेषु कविकर्मणि कुशलेषु च ये खलु शास्त्रीया लोकहितसाधकाः समाजोद्धारकाः सहृदयहृदयपरिवर्तकाश्च विचारा भवन्ति तेषां काव्य-शास्त्रादिमाध्यमेन प्रकटीकरणमावश्यकं भवति । तच्च प्रकटीकरणमाध्यमेन प्रकाशनेनैवेति **संस्कृत-कवितासङ्ग्रहः** इत्यस्य प्रकाशनकर्मणि संस्थेयं प्रवृत्ता । संस्कृतप्रणयिनां कवीनां संस्कृतकवितालेखने प्रेरणासम्पादनम्, संस्कृतकवि-गोष्ठीषु तासां साभिनयं पाठः, सङ्ग्रहरूपेण तासां प्रकाशनञ्चास्या **जयतु**

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

संस्कृतमिति संस्थाया लक्ष्यमिति संस्कृतकवितासङ्ग्रहस्य द्वितीयस्मिन्नाकारे प्रवृत्तिरस्माकं वेदनीया ।

वि.सं. २००४ तमवर्षे श्रीभद्रशर्म-राजेश्वरदेवकोटा-कमलराजरेग्मीप्रभृतिभिश्छात्रनेतृभिरेकमान्दोलनं राणाशासकानां विरोधे आरचितम् । तेन चान्दोलनेन राजनीतिकी शैक्षिकी चोपलब्धिरधिगता । विविधरूपेण **जयतु संस्कृत**मित्यान्दोलनस्य निरन्तरता जाता । तस्यैवोपक्रमे २०५४ तमे वर्षे स्वर्णमहोत्सवं सम्पाद्य तदान्दोलनं २०५५।५६ तमे वर्षे **जयतु संस्कृत**मिति संस्थारूपेण रूपान्तरितम् । अनया च संस्थया शैक्षिकाः प्राज्ञिकाः सामाजिकाश्च क्रियाकलापाः स्वकर्तव्यतया निर्धारिताः परिपालिताश्च । इयञ्चासर्वकारीया संस्कृतसेवामूला च संस्था विभिन्नानि शैक्षिकाणि सामाजिकानि सांस्कृतिकानि च कार्याणि करोति । अस्याः स्वतन्त्रं विधानमस्ति, तदनुसारेणैव कार्याणि सम्पादयति । अस्याश्च प्रमुखमुद्देश्यमस्ति- प्राच्यभाषाणां धर्मसंस्कृतिपरम्परासु जनानामास्थायास्तद्विश्वासस्य च प्रवर्द्धनम् । अस्मन्मूल्यानां संस्काराणाञ्च संरक्षणम् । तदर्थमियं दीर्घकालिकाण्यल्पकालिकानि च कार्याणि वार्षिकार्द्धवार्षिकमासिकरूपेण सम्पादयति । तत्र संस्कृत-कविसम्मेलनस्य वार्षिकरूपेण समायोजनं प्रतिवर्षं भवति । अस्याः संस्थायाः सङ्घटनान्तरं सम्पन्नासु कविगोष्ठीषु पठितानां कवितानां **सङ्ग्रहः** २०५९ तमवर्षे प्रकाशितः । तदनन्तरवर्त्तिनीनां संस्कृतकविगोष्ठीनां कविताश्चेदानीं प्रकाश्यमानाः सन्ति । पूर्वकवितासङ्ग्रहापेक्षया इदानीन्तनः सङ्ग्रहः स्थूलो विविध-विचाराणां संवाहक आकर्षकश्च भविष्यतीति आशास्यते । कविगोष्ठ्याः सम्पादिकेयं संस्थैव तत्र पठितानां कवितानां प्रकाशिकापीति तत्प्रकाशनं अपरं कर्त्तव्यमस्याः । वहुवर्णाणां कवितानां सङ्कलनेन प्रस्तुताकारे प्रापितः सङ्ग्रहोऽयमिति तथ्यन्तु न विस्मर्त्तव्यमेतत्पाठकैः ।

अस्याः संस्थाया एतदतिरिक्तानि प्रकाशनसम्बन्धीनि कार्याणि सन्ति- मुखपत्रस्य प्रकाशनम्, दर्शनानामनुवादग्रन्थानां प्रकाशनम्, संस्कृतविदुषामुत्कृष्टानां कृतीनां प्रकाशनञ्च । चार्वाक-वौद्ध-न्यायाद्वैतवेदान्तसम्वन्धिनश्चत्वारो ग्रन्था अनूद्य प्राकाश्यमानीता अनया संस्थया । चतुर्दशग्रन्थपुष्पाणि प्रकाशितान्यनया इदानीं यावत् । अयं खलु पञ्चदशपुष्परूपः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

संस्कृत-कवितासङ्ग्रहः प्रकाश्यमानो वर्तते इति प्रमोदस्य विषयः । अनेन संस्कृत-कवितानां सङ्ग्रहेण सहृदयहृदयान्यावर्जितानि भविष्यन्ति, संस्कृते कवितालेखनप्रवृत्तिर्वर्धिता भविष्यति, तत्तत्क्षेत्रेषु वर्तमानानां विकृतीनां यथार्थताप्रदर्शनेन संस्कृतेऽत्र देशे विधेश्शासनं विद्वत्सम्मानं विविधानां विधानां विकासः संस्कृतलेखनपाटवञ्च संस्कृतक्षेत्रेषु सम्वर्धितं परिष्कृतञ्च भविष्यतीति आशास्यते । विदुषां कविवराणाञ्च कविताकर्म प्रभावि, मनोहारि उत्साहजनकञ्च भविष्यतीति आशासाना विरमति- **जयतु संस्कृतमिति** संस्था ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सम्पादन-सन्दर्भः

'जयतु संस्कृतम्' इति चतुरुत्तरद्विसहस्र (२००४) विक्रमसम्वत्सरीय-संस्कृतच्छात्राणामुद्घोषणा वर्त्तते । तदानीं खलु तद् आन्दोलनरूपमासीत् । तस्यान्दोलनस्य स्फुटं लक्ष्यमासीत्- तदानीन्तनस्य संस्कृतपाठ्यक्रमस्य परिमार्जनं परिवर्धनञ्च । शिक्षाया विकासस्य विरोधकानां राणाशासकानां कृते पाठ्यक्रमस्य परिमार्जनं तस्य विवर्धनं नवीनानामाधुनिकानाञ्च विषयाणां समावेशश्च महन्महत्त्वं रक्षति स्म आन्दोलनरूपेणैव तस्य प्रस्ताव आवश्यको भवति स्म । अथ च उपनिवेशानां समाप्तेः प्रजातन्त्रस्य स्थापनायाः समयश्च स आसीदिति निरङ्कुशं पारिवारिकं राणाशासनं समाप्य प्रजातन्त्रस्थापनाया आवश्यकत्वं तदानीन्तनैर्नेतृभिश्छात्रैश्च तदानीन्तनैरनुभूतमिति तद्राणाशासनस्य समाप्तेरायुधरूपेण तदान्दोलनं प्रवर्त्तितं व्यवस्थापितञ्च । तेन खलु आन्दोलनेन क्रमशः सफलतापि अधिगता इति २००७ विक्रमसंवत्सरे नेपाले प्रजातन्त्रम् उदियाय, बद्धमूलञ्च तत् सञ्जातम् । कालान्तरे नेतॄणामक्षमतया तत् सफलं नाभूदिति तु अन्यदेतत् । असफलताया लक्षणानि इदानीमपि अनुभूयमानानि सन्तीति तु सर्वैरप्यनुभूतमेव ।

प्रजातन्त्रस्य प्राप्तेरनन्तरमिदं खलु आन्दोलनं २०५४ वि.सं. पर्यन्तं प्रकारान्तरेण कार्याणि कुर्वदासीत् । २०५४ विक्रमसम्वत्सरेऽस्य आन्दोलनस्य स्वर्णोत्सवोऽनेकैर्विविधैः कार्यक्रमैः समायोजितः सम्मानितश्च । ततश्च स्वर्णमहोत्सववर्षं विविधैः कार्यक्रमैः समाप्य २०५५ तमवर्षस्यापाढमासे इदं खलु आन्दोलनं 'जयतु संस्कृत' मिति संस्थायां परिवर्त्त्य काष्ठमण्डपे सा पञ्जीकृता । ततश्च २०५६ वि.सं. वर्षे ज्येष्ठमासस्य ३१, ३२ गतदिवसयोरस्याः संस्थायाः प्रथममधिवेशनं सम्पन्नम् तादृशाधिवेशननिरन्तरता इदानीमपि प्रवर्त्तमाना विद्यते । नवीनकार्यक्रमाणां समावेशेन नैकविधप्रकाशनानां प्रकाशनेन चेयं संस्था अग्रगतौ न्यस्तपदा प्रौढतां गच्छन्ती वर्त्तते । इदानीं यावत् अनया चतुर्दशपुष्पाणि प्रकाशितानि । 'संस्कृत-कविता-संग्रह' इति नाम्ना द्वितीयसंग्रहोऽस्याः पञ्चदशपुष्पत्वेन पदं दधानो वर्त्तते इति प्रमोदस्य विषयः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जयतु संस्कृतमित्यान्दोलनस्य संस्थायाश्चेयं घोषणा लक्ष्यसूत्रं वा आसीत्-

जयतु संस्कृतं धर्मभूतये, जयतु संस्कृतं राजभूतये ।
जयतु संस्कृतं राष्ट्रभूतये, जयतु संस्कृतं विश्वभूतये ॥

कस्यापि देशस्य धर्मः, संस्कृतिः, संस्काराश्च तस्य प्रभुसत्तायै स्वतन्त्रतायै च अत्यावश्यका भवन्तीति ते इदानीमपि अपेक्षिताः । संस्कृतवाङ्मये निवद्धाः सर्वेऽपि विषयाः देशोत्थानाय, समाजोत्थानाय व्यक्त्युत्थानाय च आवश्यका भवन्तीति आन्दोलनेन संस्थया चानया अपेक्षिताः । राणाशासनस्य पतनस्य, निरक्षरतायाः, आधुनिक-विषयाणामभावस्य, उन्नत्यभावस्य च दूरीकरणं तत्कालिक-राजसहयोगेन सुसम्भवमिति घोषणायां 'राजभूतये' इत्युक्तम् । अथ च राजपदस्य राजसंस्थाप्यर्थ इति एकतायाः प्रतीकभूतायास्तस्याप्यावश्यकत्वमिति सूचनाय 'राजभूतये' इत्युक्तम् । राजभूतिं विना राणाशासनस्य पतनं पातनञ्चासम्भवमिति तत्संस्थाया अपि तदानीमावश्यकत्वमिति तत्पदं प्रयुक्तम् । धार्मिक-सांस्कृतिक-वैचारिक-सम्पोषणं संस्कृतमाध्यमेन सुसम्भवमिति देशोत्थानाय तस्य स्वतन्त्रतायै प्रभुसत्तासम्पत्त्यै च ते आवश्यका इति तदर्थमपि संस्कृतमावश्यकमिति 'देशभूतये' इत्युक्तम् । संस्कृतवाङ्मयस्य एकतासूत्रत्वेनापि देशोत्थानाय संस्कृतमावश्यकम् । पञ्चशीलस्य बोधकत्वेन संस्कृतं विश्वभूतिकारकम् । सर्वभाषामूलकत्वेन सहयोगित्वेन च संस्कृतं विश्वभूतिप्रदमिति तदानीन्तनी घोषणा इदानीमपि अनुगुणैव ।

'जयतु संस्कृतम्' इति संस्थाया बहून्युद्देश्यानि कार्यक्रमाश्च सन्ति । ते च दीर्घकालिककार्यक्रमाः, अल्पकालिककार्यक्रमाः, समसामयिककार्यक्रमाः, वार्षिककार्यक्रमाश्च । संस्कृतकविगोष्ठी खलु अत्र चरमे कार्यक्रमेऽन्तर्भवति । २०५४।५५ विक्रमवत्सरतः संस्कृतकविगोष्ठी प्रवर्त्तिता । अस्याञ्च संस्कृतकविगोष्ठ्यां द्व्यशीतिः कवयः कवितापाठाय उपस्थिताः । एभिश्च पञ्चनवतिः कवितानामुपस्थापिताः । आसाञ्च कवितानां संग्रहः संस्कृतकवितासंग्रहनाम्ना प्राकाश्यमानीतः पूर्वम् । तदनन्तरं कविगोष्ठ्यां पठिताः कविता इदानीं प्रकाश्यमानाः सन्ति । जयतु संस्कृतमिति संस्थया वार्षिककार्यक्रमस्यानुष्ठानं तत्कार्यत्वेन सम्पादनीयमेवेति संस्कृतकविगोष्ठी प्रतिवर्षं समायोजिताऽभूत् । तत्र च संस्कृतकविभिः स्वविवक्षानुसारेण राजनीतिकं विचलनम्, धार्मिकं विचलनम्, सांस्कृतिकं

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विचलनम् परिधानविचलनम्, भ्रष्टाचारादिकञ्च विषयीकृत्य नैज्यः कविताः प्रस्तुताः। तत्र विकृतिवर्णनमवश्यम्भावि अनुभूतं सर्वैरिति तत्तद् व्यङ्ग्यप्रधानाः कविताः कविभिर्विरचय्य पठिताः सन्ति।

पिपासा बुभुक्षा च विवेकशीलानां मनुष्याणां गुणा भवन्ति। तथैव विवक्षाअपि एकोऽप्रतिरोध्यो गुणोऽस्तीति सर्वानुभूतम्। यथा पानीयेन पिपासा शान्ता भवति भोजनेन च बुभुक्षा, तथैव विवक्षया कापि भावना चिकीर्षा विचारणा चाभिव्यक्ता भवति, तत्रापि पद्यवद्धरूपेण सा अभिव्यक्तिः प्रभावकारिणी भवतीति अनुभूय काव्यकरणे कवितालेखने च विदुषां प्रवृत्तिर्दृश्यते। विवक्षा च लिखिता मौखिकी च भवति। तत्र लिखिता पद्यमयी विवक्षा एव काव्यं भवति। सैव च साहित्यपदेनापि व्यवह्रियते। विधातुः कलाशालायां वर्त्तमानेषु अनेकेषु पदेषु आवश्यकानि अनुकूलानि तदर्थवोधने क्षमाणि च पदानि प्रयुज्य लोकोत्तरानन्दप्रदानं कविकर्म भवति। अत एव लोकोत्तरवर्णनानिपुणकविकर्म काव्यमुच्यते। तादृशमेव काव्यमत्र वर्त्तते। तादृश्यः कविताश्चात्र संस्कृत-कविता-संग्रहे वर्त्तन्ते इति ममानुभूतिः। संस्कृतकविगोष्ठी, तत्र पठितानां कवितानां संग्रहत्वेन प्रकाशनञ्चैतिहासिकमिति याथार्थ्यम्।

साहित्त्यं खलु समाजस्य दर्पणो भवति। अथ च तत् दानवं मानवं करोतीति साहित्यकर्त्तृणां काव्यकर्त्तृणां वा भणितिर्दृश्यते। तत्र च शास्त्राध्यनाधारेण शास्त्रसंस्काराधारेण च उदाहरणानि प्रस्तोतव्यानि भवन्ति -

१. वाल्मीकीयरामायणस्य प्रणेतारं वाल्मीकिं को न जानाति ? स हि प्रणयसूत्रे आवद्धस्य पुरुपक्रौञ्चस्य वधविधायिनीं घटनां दृष्ट्वा तज्जायाविलापञ्च चावधार्य द्रवीभूय तत्काव्यलेखने प्रवृत्तः सफलश्च सञ्जातः। तदेव आदिकाव्यमिदानीमस्माकमादर्शकाव्यं वर्त्तते। अत्र खलु क्रौञ्चीविलापेन वाल्मीकेः सामान्यं हृदयं कविहृदये परिवर्त्तितं सत् काव्यं प्रणिनायेति विद्वत्सम्मतम्।

२. को हि न जानाति काव्यकारः साहित्यिकश्च राजानं भोजम्। स हि साहित्यरसिकः काव्यकारश्चासीत्। स हि वाल्यावस्थायामेव पितृहीनोऽनाथश्चासीत्। तदानीं भोजस्य वालत्वात् तत्पितृव्यो मुञ्जो भोजपितृ राज्यस्य राजा वभूव। मुञ्जः खलु कुटिलो दुष्टमतिश्चासीत्। स हि भोजः खलु युवा भूत्वा मम राज्यं छेत्स्यतीति शङ्कमानस्तं मारयितुं वद्धपरिकरो वभूव। तदनुसारेण स नैजान् मारकान्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(जल्लाद) आदिदेश । तदनुसारेण मारका भोजं महारण्यं नीत्वां मारणोपक्रमे तं पप्रच्छुः - किमपीच्छति भवान् ? इति । तत्र भोजेनोक्तमेकं पत्रं पितृव्यं मुञ्जं लेखितुमिच्छामि इति । मारकानुमतिं प्राप्तः सः स्वकनिष्ठिकामाच्छिद्य तद्रक्तेन एकं श्लोकं मुञ्जस्य कृते लिलेख । स चेदृशः -

मान्धाता च महीपतिः कृतयुगालङ्कारभूतो गतः,
सेतुर्येन महोदधौ विरचितः क्वासौ दशास्यान्तकः ।
अन्ये चापि युधिष्ठिरप्रभृतयो याता दिवं भूपते
नैकेनापि समं गता वसुमती नूनं (मुञ्ज) त्वया यास्यति ?॥ (भोजराजः)

अस्य खलु श्लोकस्यार्थं वुद्ध्वा मारकास्तं न मारितवन्त आसन् राज्ञो मुञ्जस्य प्रतिक्रियां प्रतीक्षमाणाः । वुद्ध्वा च श्लोकमेनं तस्मै दत्तवन्तः । स च तं पठित्वा जातहृदयप्रकाशः पश्चात्तपन् भोजस्य मारणं निषिषेध इति भोजप्रवन्धादौ द्रष्टव्यम् । रामयुधिष्ठिरादिभिः सहैव स्वर्गं नेतुमशक्या पृथ्वी मुञ्जेन तेन कथं नेतुं शक्या स्यादिति तद्हृदयं परिवर्त्तितमनया कवितया ।

३. महमूदगजनवीनामक एको यवनराजस्तच्छासनसमये धर्मान्धतया शत्रुविनाशभावनया च इन्द्रप्रस्थक्षेत्रस्य, अनेकान् ग्रामान् अग्निसात्कारितवान् ध्वंसितवाँश्च । अनया घटनया तस्य मन्त्री भृशं दुःखितोऽभवत् । स मन्त्री सम्राजं तस्माद् दुष्कर्मणो विरतं कर्त्तुमेकमुपायं चिन्तितवान् । स सायं भ्रमणाय तं सम्राजमग्निसात्कृतेषु ध्वंसितेषु च भग्नावशेषेषु नीतवान् । तत्र समीप एव एकस्मिन् वृक्षे उलूकौ वसन्तौ वार्त्तां लपन्तावास्ताम् । मन्त्रिणा खलु पक्षिभाषणमपि बुध्यते स्म । तं सम्राट् गजनवी पृष्टवान्- किमेतौ कथयत इति । मन्त्री तं वार्त्तान्तरे नीतवान् । पुनर्वर्धितजिज्ञासेन सम्राजा मन्त्री पृष्टः । मन्त्रिणा कथितम्- भवता श्रवणीयं नास्ति इति । स उत्कटेच्छो यवनराजः पुन आगृहीतवान् । मन्त्री च 'एष अनुकूलः समय' इति अवधार्य साभिनयमुक्तवान्- राजन् ! इमौ भग्नावशेषप्रियौ उलूकौ स्तः । अनयोरेकतरः कन्यापिता अस्ति चेदपरो वरपिता । वरस्य पिता कन्यापितरं सौदायिकरूपेण (दाइजो) शतं निर्जनान् ग्रामान् याचते । तत्र कन्यापिता कथयन् अस्ति- भगवतोऽनुकम्पयाऽस्माकं सम्राट् सुस्थः स्वस्थश्च चिरं जीवेत् चेत् भवान् विश्वासं करोतु शतग्रामापेक्षया निर्जनान् द्विशतग्रामान् दास्यामि । अनेन व्यङ्ग्येन सम्राट् द्रवीभूतः सन् ग्रामाणामग्निसात्करणमुच्चाटनञ्च निषेधितवान् । अनेनापि व्यङ्ग्यार्थप्रधानेन काव्यकल्पेन कथनेन दानवहृदयं मानवहृदयमभूत् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

४. एको यवनशासको नादीरशाहनामकोऽन्यो भारते आसीत् । अयं खलु दिल्लीप्रदेशे नरसंहारप्रवर्त्तको नादीरशाह एव । हिन्दूनां समाप्तये नरसंहारस्तेन प्रारब्ध आसीत् । इयन्तो हिन्दवस्तत्र तत्र मारितास्तेन पुनर्मारणे जनान्तरं नोपलब्धमभूत् । परन्तु तस्य मन्त्री सहृदयः काव्यज्ञो दयाशीलो विवेकी च बभूव । स राजानं कयापि ऊर्दूकवितया प्रार्थितवान् । तस्या अयमाशयोऽभूत्- राजन् अत्र भवद्राज्ये भवता इयन्तो मानवा मारिता इतः परं मारणे नास्ति जनान्तरम् । इतः परमपि यदि जना भवता मार्यन्ते तर्हि मृतानां पुनरुज्जीवनं भवता विधेयमेवेति । राज्ञा विचारितम्- जनसंहारः कृतस्तत्र नैके जना मारितास्तत्र एकोऽपि पुनर्जीवियतुं न शक्यते चेत् का बहूनां पुनरुज्जीवनस्य वार्त्ता ? इति जातप्रकाशो जातबोधो वा नरसंहारं निरुद्धवान् । अयमपि कवितायाः काव्यस्य वा परिवर्त्तकः प्रभाव आसीत् ।

५. एकस्मिन् समये संस्कृतप्रणायिनां ग्रामे प्रदेशे च दुर्भिक्षं बभूव । जनाः खाद्यान्नाभावेनाम्रियन्त । तत्र जनपदीयसर्वकारः, प्रादेशिकसर्वकारश्च तद् दुर्भिक्षं निवारयितुं नैव शक्नुवन्तः । अनेके उपाया निष्फलाः सञ्जाताः । तत्र एकस्मिन् खलु ग्रामे एको सिद्धवाक् कविर्निवसति स्म । उपायान्तराणामसाफल्यात् सर्वकारीय सहयोगादाने कविवरः सः सम्प्रार्थितो ग्रामीणैः । कवीनामायुधं भवति काव्यं कमपि महान्तं राजानं वा प्रभावयितुम् । स कविवरः प्रासङ्गिकीं कवितां लिलेख । तासु कवितासु अन्यतमा प्रभावशालिनी कविता इयमासीत् -

मद्गेहे मशकीव मूषिकवधूर्मूषीव मार्जारिका,
मार्जारीव शुनी शुनीव गृहिणी वाच्यः किमन्यो जनः ।
मूर्च्छापन्नशिशूनसून् विजहतः सम्प्रेक्ष्य भिल्लीरवैः,
लूतातन्तुवितानसंवृतमुखी चुल्ली चिरं रोदिति ॥ (श्रीहर्षः)

अयमस्यार्थः - हे राजन् ! अस्मद्ग्रामे प्रदेशे च महद् दुर्भिक्षमापतितमस्ति, तद् भवानपि जानाति । मद्ग्रामे तु अन्नानां कणोऽपि नास्ति शाकानां लेशोऽपि नास्ति का वार्त्ता फलादीनाम् ? खाद्यान्नाभावात् तद्भक्षणाभावेन मद्ग्रामे मूषिका मशकीव दुर्बला कृशा च सञ्जता, युवतिरपि स्थूलाङ्गी मार्जारिका मूषिका इव कृशा सञ्जाता । ग्रामरक्षिका स्थूला सक्रिया च शुनी मार्जारीव कृशा, लघुतरा, बुक्कनेऽपि असमर्था च सञ्जाता । ग्रामगृहिण्यश्च

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अन्नानामन्यपोषकद्रव्याणामभावेन च शुनीप्रमाणा जाता: अन्यजनानान्तु का वार्ता ? अन्नाभावेन प्राणान् त्यजतो मूर्छापन्नान् शिशून् दृष्ट्वा झिल्लीरवेण लूतातन्तुभिरावृतमुखी चूल्ली च बहो: कालाद् रोदिति इति। अनेन कविवचसा राजहृदयं द्रवीभूतमिति दुर्भिक्षं प्रतिचकार स:, कविग्रामश्च विशेषेणानुकम्पित इति श्रूयते।

एवमेवेदानीमप्यस्मत्कवीनां विकृतिचित्रणेन, राजनेतृषु व्यङ्ग्यवाणानां प्रहारेण, भ्रष्टाचाराणां प्रकाशनेन, शिक्षायां विकृतिप्रदर्शनेन, अध्ययनाध्यापनयो: परीक्षायाञ्च प्रभाविणा प्रहारेण तत्तत्क्षेत्रे देशे च विधे: शासनं समृद्धि: स्वावलम्विता पवित्रता मर्यादा च वर्धिता भविष्यतीति संस्कृत-कवितानां महन्महत्त्वम्। कवितायां काव्ये च सञ्जातं विषयवस्तु इतिहासदृष्ट्यापि महत्त्वपूर्णं सर्वक्षेत्रेषु विकृतिनिरासकञ्च भविष्यतीति आशास्यते। संस्कृतकविगोष्ठ्या आयोजनेन च कविसंस्कारवत्सु प्रेरणा भविष्यति कविषु च कवितालेखने निरन्तरता आयास्यति प्रतियोगितावासनावत्सु च विजय: प्राप्तो भविष्यतीति संस्कृत-कविगोष्ठ्या निरन्तरता स्यात्। व्यवहारमार्गतो दूरं गच्छन्त्या: संस्कृतभाषाया: काव्यव्यवहारेण कवितालेखनेन च तस्या: प्रचार: प्रसारश्च भविष्यतीति धिया च संस्कृतकविसम्मेलनं समायोज्यं भवति। संस्कृतज्ञेषु संस्कृतप्रणयिषु च कवितालेखने प्रेरणा च प्राप्ता भविष्यतीति अयं कार्यक्रमो 'जयतु संस्कृतम्' प्रभृति संस्थानां कृतेऽत्यावश्यक एव। सर्वेषां भाषाभाषिणां भाषिकावताञ्च संस्कृतमेकतासूत्रमस्तीति एतादृश: कार्यक्रम आवश्यक एव।

विविधशीर्षकेषु भावपूर्णां व्यङ्ग्यपूर्णां समाजसुधारोन्मुखीं विषयवस्तुप्रतिपादिकाञ्च कवितां विलिख्य कविगोष्ठ्यां तां साभिनयं प्रपठ्य च कविगोष्ठीं सफलयन्तोऽस्मानुपकुर्वन्तश्च कविवर्या धन्यवादार्हा:। अत्र चोच्चकोटिका मध्यमा सामान्याश्च कविता: सन्तीति पठनवेलायां ज्ञातं भविष्यति। एकस्य कवेरनेका अपि कविता: सन्ति। तत्र कवितायाः प्रथमशीर्षके कवेर्नाम वर्त्तते, नान्यासु। कविताशीर्षकाणि क, ख, ग इत्यादिरूपेण प्रत्तानि सन्ति। तत्र नाम्न: पुनरुक्ति र्न कृता। विभिन्नानां वर्षाणां कविगोष्ठ्या: कवितात्वेनापि ता अनेका: सञ्जाता:। अनेकासां कवितानां कृते अनेकधन्यवादभाज एव ते। कृतेऽपि सम्पादने तत्र भाषिकी छान्दसी भावात्मिका च न्यूनता दृश्येत एव। तत्र भाविन्यां कविगोष्ठ्यां प्रस्तुतये आगतासु कवितासु ता निराकृत्य आगमिष्यन्तीति आशास्यते।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi
त्रुटीर्निरासयितुं वहुप्रयत्नमाचरद्भिरप्यस्माभिस्तत्र पूर्णा सफलता नाधिगता इति विभावयन्तु पाठकाः। कविभि नैंज्यः कविता जीर्णेषु कर्गजखण्डेषु तत्रापि अस्पष्टाक्षरै र्लिखिताः । संस्कृतम्, जयतु संस्कृतम्, संस्कृत-कविगोष्ठी, संस्कृते लिखितानां कवितानां प्रकाशनञ्चास्माकं सर्वेषामभीष्टमिति बोधयता सम्पादनसहयोगिभ्यः प्रा. रामहरिः दाहाल, सहप्रा. भीप्रसादः कण्डेल, सहप्रा. माधवप्रसादः लामिछाने, सह.प्रा.मुकुन्दप्र. लामिछाने प्रभृतिभ्योऽन्येभ्यः सहयोगिभ्यश्च धन्यवादाः समर्प्यन्ते ।

अथ च अस्य संस्कृतकवितासंग्रहस्य प्रकाशनेऽस्याः संस्थाया अध्यक्षाः, उपाध्यक्षाः, सचिवाः कोशाध्यक्षाश्च धन्यवादार्हाः सन्ति । एषां सक्रियतायाः कर्मठताया अनुकूलतायाः सद्भावनायाश्चाभावे इदं कार्यमपूर्णं स्यादिति विनिवेदयन् -

गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः ।
हसन्ति दुर्जनास्तत्र समादधति सज्जनाः ॥ इति
स्मरन् स्मारयँश्च विरमति -

प्रा.डा. विष्णुप्रसादशर्मा देवकोटा
सदस्यः ।
जयतु संस्कृतम्, काष्ठमण्डपस्थः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विषयसूची

१)	पठत संस्कतम्	श्रीभद्रशर्मा	१९
२)	कविवरं कुलमणिं संस्मृत्य	भरतराजशर्मा मन्थलीयः	१९
३)	कीर्तिरिव शरीरम्	आहिताग्नितीर्थराजदीक्षिताचार्यः	२०
४)	वाग्वन्दना	प्रा. दुर्गाप्रसादः दवाडी	२१
५)	नवनेपाल आगतः	टीकारामः पन्थी	२३
६)	अभ्युदयनिःश्रेयसयोः साधनं धर्मः	प्रा.डा. राधाकृष्णः धिकारी	२४
७)	सरस्वती नः सुभगा मयस्करत्	प्रा. सिद्धिनाथगौतमः	२९
८)	यज्ञप्रार्थना, यज्ञविवेचनञ्च	प्रा.डा. डिल्लीप्रसादगौतमः	३०
९)	सेव्यं सदा संस्कृतम्	नारायणदत्तः शास्त्री	३१
१०)	काल-गतिः	पं. लोकनाथ आचार्यः	३२
११)	गीतिकाष्टकम्	आचार्यः खेमराजः केशवशरणः	३३
१२)	'चरैवेति' वदन्ति किम् ?	राजेश्वरः देवकोटा	३४
१३)	पठत संस्कृतम्	कमलराजः रेग्मी	३४
१४)	विविधं पद्यम्	आचार्यः पूर्णचन्द्र उपाध्यायढुंगेलः	३५
१५)	पटमूर्खस्य गणितम्	प्रा.तेजःकेशरि उपाध्यायः (पटमूर्खः)	३६
१६)	अवनिसुपमा	प्रा.डा.माधवः भट्टराई	३८
१७)	ज्वलितम्	प्रा.शिवहरिः मरहट्टा	३९
१८)	क) नेपालकीर्तिकौमुदी कृष्णा	प्रा.डा.वेणीमाधवः ढकाल	४१
	ख) शान्तिश्चिरं रोदिति		४२
१९)	क) शान्तिप्रियो भवतु...	प्रा.डा.टीकारामः अधिकारी	४३
	ख) सुरवाक् शुभकामना	"	४५
	ग) जय जगदम्बे	"	४७
	घ) मातृभूशोकदुर्दिनम्	"	४८
	ङ) योगिनरहरिवन्दना	"	५०
२०)	आनन्दमयजीवनस्य रहस्यसूत्राणि	हेमराजः ज्ञवाली	५१
२१)	क) शान्तिप्रियो भवतु नूतनवत्सरोऽयम्	प्रा.रामहरिः दाहाल	५२
	ख) उत्तरापेक्षा	"	५३
	ग) वाणीवन्दना	"	५६

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

	घ) परं गृहे भा न विराजते कुतः	"	५७
	ङ) कुर्यामहं किं जगतो हिताय	"	६०
	च) पठ कीरवाचम्	"	६२
२२)	पशुपतिः	डा. हरिप्रसादः अधिकारी	६४
२३)	क) जयतु वाङ्मयं संस्कृतात्मकम्	प्रा.दुर्गाप्रसादः दाहाल	६५
	ख) गङ्गावन्दना	"	६६
	ग) षड्देवात्मकसाईबाबास्तवः	"	६७
२४)	क) क्व विद्यते राष्ट्रियता...	सहप्रा.मुकुन्दप्रसादः लामिछाने	६९
	ख) शान्तिप्रियो भवतु नूतनवत्सरोऽयम्	"	७१
२५)	क) मयोक्तमाचर	प्राज्ञो ज्ञानमणिः नेपालः	७३
	ख) सत्यस्य पिहितं मुखम्	"	७३
२६)	कथं सुखे स्यान्मम मातृभूमिः ?	यदुः पन्थी (उपसचिवः)	७५
२७)	शान्तिप्रयासः	प्रा. गोपीकृष्णशर्मा	७७
२८)	त्राणदाता मुरारिः	रमेशः खकुरेलः	७८
२९)	कथम्	प्रा. हरिप्रसादशर्मा आचार्यः	७९
३०)	मनोनिरीक्षणम्	प्रा.घनश्यामः कँडेल	८०
३१)	सुवर्णखालः	गणेशः पाण्डेय 'वल्कल'	८१
३२)	कविता	प्रह्लादः पोखेल	८३
३३)	संस्कृतं संस्कृतेर्मूलम्	प्रा.डा. राचन्द्रगौतमः	८४
३४)	क) तत्र देशस्य का दशा	प्रा.डा. ऋषिरामः पोखरेल	८५
	ख) नेतृवर्गान् प्रति	"	८६
३५)	क) इतो नव्यं किमीहसे	प्रा. विष्णुप्रसादशर्मा देवकोटा	९०
	ख) वृथा गतं तस्य नरस्य जीवनम्	"	९२
	ग) सामयिकी	"	९३
	घ) विषमा स्थितिरत्र चित्रिता	"	९६
	ङ) नेपाले गणतन्त्रता	"	९९
	च) मातृभूमिं प्रणयत	"	१०१
	छ) शिक्षां प्रति	"	१०२
	ज) नेतृन् प्रति	"	१०२
	झ) एवञ्च	"	१०३
	ञ) अद्यतनी स्थितिः	"	१०४
३६)	वैदिकी शुभाशंसा	रामचन्द्रशर्मा पौडेल	१०५

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

३७)	संस्कृतं संस्कृतेर्मूलम्	प्रा.डा. हरिप्रसादः गौतमः	१०५
३८)	क) नेपालभूमिं प्रति	प्रा. नारायणप्रसादशर्मा, कट्टेल	१०६
	ख) अत एव	"	१०७
३९)	मम भणितिः	सहप्रा. श्रीरामः सापकोटा	१०८
४०)	जीवनम्	सहप्रा.डा. जीवनः अधिकारी	१०९
४१)	लोकतन्त्रं प्रणौम्यहम्	डा. गोपालभण्डारी	११०
४२)	देशदशा	प्रा.डा. दुर्गाप्रसादः अर्याल	१११
४३)	क) सम्प्रति	प्रा. तोयराजनेपालः	११३
	ख) नेपालस्य वर्त्तमाना स्थितिः	"	११४
	ग) न देशो नूतनायते ?	"	११४
४४)	वैष्णवो देश एषः	सोमराजः कट्टेल 'अभय'	११६
४५)	क) सा संस्कृतिः संस्कृतिः	सहप्रा. नवराजः कट्टेल	११७
	ख) अयि भुवि मानवता कुत्र गता ?	"	११८
	ग) चन्द्रः	"	१२०
	घ) मन्दं हास्यं हृदि विलसतात् सुन्दरं सुन्दरीणाम्	"	१२१
	ङ) वर्षा	"	१२२
	च) सीतां वन्दे	"	१२४
	छ) वनमुपवनम्	"	१२५
४६)	वहुधर्मावलम्विनी धरा	सहप्रा. आनन्दप्रसादः घिमिरे	१२६
४७)	चिद्विलासः	सहप्रा. भीमप्रसादः कण्डेल	१२७
४८)	क) दृष्टियुद्धं बभूव	मेदिनीनाथः सुवेदी	१३०
	ख) एकाक्षरी समस्यापूर्ति र्विभिन्नविपयेपु	"	१३०
४९)	शान्ते एह्येहि	सहप्रा. चन्द्रमणिनेपालः	१३२
५०)	क) विना	प्रा.डा. विष्णुराज आत्रेयः	१३३
	ख) सुप्रभातम्	"	१३४
५१)	वालसन्ताष्टकम्	खेमरञ्जनः भट्टराई 'लामिडाँडे'	१३६
५२)	क) विकस्वरा शठ-नीतिः	हेमराजः पौडेल	१३८
	ख) विलुप्ताया मातुरन्वेषणम्	"	१३९
५३)	क) मुक्तकम्	सहप्रा.ध्रुवप्रसादः भट्टराई	१४१
	ख) कथं जयतु संस्कृतम् ?	"	१४१
५४)	संस्कृतभापा वैदिकं ज्ञानञ्च	प्रा.डा. दुर्गादत्तशर्मा	१४२
५५)	अनुभूतिः	पूर्वसचिवः शरत्कुमारः भट्टराई	१४३

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

५६)	शान्तिः	सहप्रा. श्रीरामः अधिकारी	१४४
५७)	विजयतां संस्कृतम्	जनार्दनः घिमिरे	१४५
५८)	विभाति नेपालधरा स्वकान्त्या	"	१४६
५९)	विस्मृता देववाणी	विष्णुहरिः पौडेल	१४७
६०)	कार्यं करोमि	प्रा. अच्युतरमणः धिकारी	१४७
६१)	वर्तमानकालः	माधवप्रसादः लामिछाने	१४८
६२)	क) गणेशचत्वारिंशी	डा. लक्ष्मीकान्तः पन्थी	१४९
	ख) श्रीकृष्णार्पणमस्तु	"	१५२
६३)	क) हा गण्डकि ! त्वं कथमत्र लोहिता	हिमालयः भट्टराई	१५४
	ख) नमत रे मनुजाः ! सकलं खलम् !!!	"	१५५
	ग) कुरु राजनीतिम् !!!	"	१५६
	घ) लोकतन्त्रम्- १	"	१५७
	ङ) लोकतन्त्रम्- २	"	१५८
	च) कन्दुकमहिमा	"	१५९
	छ) कस्य त्यागं करिष्यति	"	१५९
६४)	अहं किंकर्तव्यविमूढो जातः	घनश्यामः खतिवडा	१६०
६५)	कलौ मुद्रा	मुकेशमिश्रः	१६१
६६)	योग एव मनुष्यस्य जीवनम्	विद्याकुमारी वज्राचार्य	१६२
६७)	सुविचारं विभो देहि	डा.वद्री पोखरेल	१६३
६८)	क) न खलु कान्तिपुरी रुचिरायिता	जनार्दन उपाध्यायः	१६४
	ख) कथं नैकत्वम् ?	"	१६५
६९)	मुक्तकयुगलम्	ध्रुवप्रसादः भट्टराई	१६६
७०)	वयं स्मरामः	श्रीधरपन्तः	१६७
७१)	प्रजातन्त्रे नेतारः	माधवप्रसादः पाण्डेयः	१६८
७२)	शान्त-नेपाल-देशः	रञ्जनः सिग्देल	१६९
७३)	एकं शब्दचित्रम्	श्रीहरिः रुपाखेती	१७०
७४)	कस्य हानिर्वा	विश्वनाथः रूपाखेती	१७१
७५)	लोकतन्त्रे युवशक्तिः	वरदानः थपलिया	१७२
७६)	जयतु संस्कृतम्	शिवशंकरः न्यौपाने,	१७३
७७)	प्रभो ! शूलपाणे ! त्वमेकः शरण्यः	माधवः घिमिरे (छात्र):	१७४
७८)	मम ग्रामो रमणीयः	यज्ञराजः रेग्मी	१७५
७९)	मातृभूमिं प्रति जिज्ञासा	ठाकुरप्रसादशर्मा	१७६

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

८०)	अतिक्रन्दति नेपालः	भानुभक्त आचार्य	१७७
८१)	वीरभोग्या वसुन्धरा	रूपकालङ्कारः	१७८
८२)	जीवनम्	कोषराजः न्यौपाने	१७८
८३)	नेपालवन्दना	कृष्णप्रसादन्यौपाने,	१७९
८४)	वयं भाग्यवतां श्रेष्ठाः	बालकृष्णः त्रिपाठी	१८०
८५)	आह्वानम्	गणेशः तिमल्सिना	१८१
८६)	प्रियास्मरणम्	पीताम्वरः निरौला	१८२
८७)	कोषवन्तः	पूर्णशङ्करगौतमः	१८३
८८)	जयतु संस्कृतम्	हेमन्तराजः अर्यालः	१८४
८९)	हे धूम निर्गच्छ रे !	डा. चन्द्रमणिः नेपालः	१८५
९०)	जयतु संस्कृतम्	डा. नारायणः भण्डारी	१८६
९१)	पिण्डेश्वरं प्रार्थये	सहप्रा. रोहिणीविलासः लुइटेल	१८७
९२)	संस्कृत-गजलाः	प्रा.डा. भीमप्रसादः खतिवडा	१८८
९३)	प्राचीनभाषा संस्कृतम्	नारायणप्रसादशर्मा कट्टेल	१८८
९४)	संस्कृते किं किं न विद्यते ?	दामोदरः दाहाल	१८९
९५)	श्रीपञ्चकन्यास्तोत्रम्	प्रा.डा. भरतभट्टराई	१९०
९६)	जयतु संस्कृतम्	योगेश्वरः वडाल	१९१
९७)	शिववन्दना	लोकनाथः लुइटेल	१९२
९८)	कविता विलुप्ता	महानन्दः तिमिल्सिना	१९३
९९)	जयतु संस्कृतम्	नारायणः भण्डारी	१९४
१००)	नयपालदेशः	टेकनाथः घिमिरे	१९५
१०१)	परित्राणस्तवः	दामोदरः पोखरेल शास्त्री	१९६
१०२)	सूत्राक्षरी कविता	पुरुषोत्तमः खतिवडा	१९८
१०३)	सच्छिक्षा	रोहिणीप्रसादः खनाल	१९९
१०४)	संस्कृत-कविताङ्ग्रहस्थानां कवितानां...	नवराजः कट्टेल	२००

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जयतु संस्कृतम् विश्ववान्धवं
जयतु संस्कृतम् विश्वमानदम् ।

जयतु संस्कृतम् विश्वशक्तिदं
जयतु संस्कृतम् विश्वप्रेमदम् ॥

जयतु संस्कृतम् धर्मदं सतां
जयतु संस्कृतम् ह्यर्थदं नृणाम् ।

जयतु संस्कृतम् कामदं भुवां
जयतु संस्कृतम् मोक्षदं नृणाम् ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्रीभद्रशर्मा, महाकविर्भरतराजशर्मा मन्थलीयः, प्रा.डा. टीकारामपन्थी, प्रा.डा. राधाकृष्णोऽधिकारी, प्रा.डा. डिल्लिप्रसादगौतमः, लोकनाथ आचार्यः, अग्निहोत्री तीर्थराज आचार्यः, प्रा. सिद्धिनाथगौतमः,
प्रभृतयः कवयो दिवङ्गताः । दिवङ्गतानां कवीनां कृते हार्दिकीं श्रद्धाञ्जलिम् अर्पयद्भिरस्माभिस्तेषां कवीनां कविताः पूर्वमत्र प्रस्तूयन्ते -

पठत संस्कृतम्

-श्रीभद्रशर्मा
तनहूँजनपदीयः
(जयतु संस्कृतमित्यान्दोलनस्य जयतु संस्कृतमिति संस्थायाश्च संस्थापकः)

पठत हे जनाः संस्कृतं सदा
पिबत तद्रसं शाश्वतामृतम् ।
न खलु विद्यते तत्समं भुवि
किमपि यत्सदाऽनन्ददायकम् ॥

कविवरं कुलमणिं संस्मृत्य

-भरतराजशर्मा मन्थलीयः
रामेछापमण्डलीयः

कुलमणिं कुलमस्य कुलेऽव्रणो
मणिरितीरयति स्म न केवलम् ॥
कमलकोमलकान्तकवित्वतो-
निजगदुः कवयोऽपि तथाविधम् ॥१॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भुवमिमामधुना परिहाय हा !
दिवमितः स इति श्रुतिमागतः ।
विलपति व्यथया जगती गिरा-
ममरतां कृतयस्तु नयन्ति तम् ॥२॥

सुरगिरा सुरलोकमथापि स
कवितयैव विनोदयतामिति ।
कथयतो मम चैप कृताञ्जलिः
शमधिकं वितनोतु तदात्मनि ॥३॥

कीर्तिरेव शरीरम्

-आहिताग्निस्तीर्थराजदीक्षिताचार्यः
तनहूँजनपदीयः

समे जाता याताः प्रकृतिनियमाद् भोगवशतः
स जीवन्नेवास्ते सुरुचिरकृतिं यः प्रकुरुते ।
शरीरे सत्कीर्त्तिर्निवसति सदा दिव्यवपुषा ।
शरीरं भूतोत्थं विलयमुपयाति ध्रुवमिदम् ॥

गोस्वामी तुलसीदासः

महात्यागी भक्तप्रवरतुलसीदासमुनिराट्
नमः कुर्वन् तस्थौ रघुवरपदद्वद्वन्द्वयुगले ।
नमस्यासन्दीप्ते हृदि रघुपतिः प्रादुरभवद्
वरं दत्वा तस्मै त्वरितभगवद्धामनि निजे ॥

वरं लब्ध्वा तुष्टो, ज्वलितहृदयो रामकथया
समेषां शास्त्राणां रसमधु समाकृष्य मधुरम् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

समासां भाषाणां मधुरमिलनं गीतिरुचिरं
व्यधाद्भक्त्या रामभ्रमरमहितं ग्रन्थमतुलम् ॥

अपूर्वोऽयं ग्रन्थो ह्यविरलवहद्भक्तिसरसः,
समस्तैः सम्मान्योऽभवदनुदिनं भारतभुवि ।
महान्तो विद्वांसोऽप्यतिगरिमगोस्वामिवचनम्,
प्रमाणीकुर्वन्ति श्रुतिविहितधर्मानुपथगम् ॥

मनोवाञ्छासिद्ध्यै वहुविधजना रामहृदयाः
स्वशक्त्या सद्भक्त्या प्रतिदिनमुताहो नवदिनैः ।
पठन्तीदं रामायणमविरतं मासविधिना,
लभन्ते प्रत्यक्षं फलमभिमतं रामकृपया ॥

सुकीर्त्या सत्कृत्या सरलविधया भक्तिपरया
जनानामुद्धारं समभवदहो ! येन वपुषा
सदेहो निर्यातो वरदतुलसीवत्तु तुलसी
चिरंजीवन्नास्ते रविरिव स रामायणवपुः ॥

वाग्वन्दना

-प्रा. दुर्गाप्रसाददवाडी
काश्कीजनपदीयः

जय जय हे अज्ञानविरोधिनि संस्कृतभारति वृद्धिप्रदे
पदकमलं करुणानिलये वरिवस्यति योऽनुदिने तव हे ?
अयि वरदे वरहंसलये वरवाङ्निलयः स कथं भवेत् ।
तव पदमेव परं पदमस्त्विति शीलयतो मम किं न शिवम् ।
जय जय हे अज्ञानविरोधिनि संस्कृतभारति मुक्तिप्रदे ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अयि विधिनन्दिनि नन्दितमेदिनि विश्वविनोदिनि विश्वनुते
तव पदपङ्कजसमाश्रितमानवबुद्धिविधायिनि शान्तिप्रदे ।
भगवति हे परमेष्ठिकटुम्बिनि पुस्तकधारिणि हंसरते ।
जय जय हे अज्ञानविरोधिनि संस्कृतभारति वुद्धिप्रदे ।

अयि मयि दीनदयालुतया दययैव तथा द्रष्टव्यमिति,
अपि जगतो जननीति यथासि तथासि तथानुमतासि शिवे
यदुचितमम्ब ! मत्पुरत: कुरु भारति देवि दयाङ्कुरु मे
जय जय हे अज्ञानविरोधिनि संस्कृतभारति भुक्तिप्रदे ॥

तव पदकुन्जसमाश्रितमानववुद्धिविधायिनि शान्तिप्रदे ।
भगवति हे परमेष्ठिकुटुम्विनि पुस्तकधारिणि हंसरते
जय जय हे अज्ञानविरोधिनि संस्कृतभारति वुद्धिप्रदे ।

सर्वदा भारती क्वाधुना पूज्यते ?
हिन्दवो नोऽधुना भारतीतत्परा:
नो निजे संस्थिते सभ्यतासंस्कृती
कथ्यते केवलं जीवातात् संस्कृतम् ॥

कुत: ?
जयतु संस्कृतं घोषसुन्दरम्,
जयतु संस्कृतं नामसुन्दरम् ।
जयतु संस्कृतं कार्यसुन्दरम्,
जयतु संस्कृतं विश्वभूषणम् ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नवनेपाल आगतः

- टीकारामः पन्थी
गुल्मीजनपदीयः

जल्पाका अग्रगम्मन्याः प्रतिगामि–विरोधिनः ।
नवनेपालनिर्माणं घोपन्ति घोपयन्ति च ॥१॥
प्रजातन्त्रं वराकं तन्महारण्यां प्ररोदिति ।
लोकतन्त्र-गणतन्त्रे गर्जतो नववर्त्मनि ॥२॥

महीशिरोभागविराजितोऽसौ
तपोगिरिर्ज्ञानगिरिर्हिमाद्रिः ।
व्यासादिसद्भिः समधिष्ठितोऽभूद्
वेदस्मृतिज्ञानप्रवाहशीलैः ॥३॥

'यद् वैदिकं राज्यमिह प्रसिद्धं
कालान्तरेऽभाव्यत हिन्दुराज्यम् ।
पुरातनी संस्कृतिरर्दनीया
विध्वंसनीयः किल वेदमार्गः' ॥४॥

इति ध्यायद्भिरग्रीयैर्नवनेपालमिच्छुभिः ।
ध्वंसितं हिन्दुराज्यं तद् हतं विद्रावितं द्रुतम् ॥५॥
राष्ट्रियैक्यदिने पृथ्वीनारायणजयन्तिका ।
न्यक्कृता सर्वकारेण नामग्राहो निपेधितः ॥६॥

पृथ्वीनारायणस्यैका प्रतिमा पोखरास्थिता ।
निर्मातुं नवनेपालं कुट्टिता धूलिसात्कृता ॥७॥
शिक्षासंस्थास्तथा मार्गराजनामभिरङ्किताः ।
नामान्तराणि काङ्क्षन्ति नवनेपाल आगते ॥८॥

लोकनीति-लोकधानी लोकदूतादिरूपतः ।
सर्वे शब्दा राजपूर्वाः परिवर्त्याः पुरागमैः ॥९॥

निरङ्कुशा शास्तिरहो गतैका !
निरङ्कुशान्या नृपु वाहनीया ?
भवेत् किमाश्चर्यमथो तदन्यन्-
नवीननेपालविनिर्मितौ नु ॥१०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जनैरनिर्वाचितसांसदा अहो
ह्रिया विहीना उपहास्यतां गताः ।
वयं हि शास्तार इति प्रगर्जिताः
प्रवञ्चयन्ते जनतां हि सर्वतः ॥११॥

शरारवः प्रत्यहमेव देशे
निघ्नन्ति लुण्ठन्ति जनानदोषान् ।
शान्तिं सुरक्षां न ददाति शास्ति-
र्नवीननेपालधरा वराकी ॥१२॥

विध्वंसितो हि प्रासादः पाल्पास्थोऽन्ये परश्शताः ।
शास्तिसंस्थालया ध्वस्ता नवनेपालनिर्मितौ ॥१३॥
शर्शरीकैर्हता येषां जननीजनकाग्रजाः ।
नग्नाः क्रन्दन्ति वालास्ते नवनेपाल आगतः ॥१४॥

निगृहीता हता नैके गोपिताश्च शरारुभिः ।
ते चात्मीयैरनिर्ज्ञाता नवनेपाल आगतः ॥१५॥
आपणाश्च तथा वाटाः संस्थाश्चान्दोलकैरहो !
प्रत्यहमवरुध्यन्ते नवनेपाल आगतः ॥१६॥

हत्याहिंसापहरणलुण्ठनातङ्कसम्भवाः ।
नवसंरचना नव्यनेपालो नवसंविधिः ॥१७॥
वैदेशिका वदन्त्यत्र वर्वर्ति वन्यशासनम् ।
नृत्यन्ति नवनेपालं निर्मातुं ननु नायकाः ॥१८॥

अभ्युदयनिःश्रेयसोः साधनं धर्मः

प्रा.डा. राधाकृष्णोऽधिकारी
कास्कीजनपदीयः

शैल्यास्तत्र समीक्षणं प्रथमतो यत्रार्थबोधो यतः
कैः शव्दैः कथितः कथमिति पुनर्यत्रोक्तशब्दान्वयः ।
सम्यक् सिद्धिमवाप्नुयादिति विधेः कार्या समीक्षा पुन-
रित्थं चेद्विहिता भवेद्रसमयी व्याख्यार्थसंदीपिका ॥१॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ईशावास्योपनिषदि गताः सन्ति व्याख्या अनेका
काचित् काञ्चित्कलयति कलां तासु सन्दर्भशून्याम् ।
अन्यामन्या कलयति पुनः सापि सन्दर्भशून्या
सर्वा व्याख्या स्फुरति विदुषामर्थसन्दर्भशून्या ॥२॥

वेदः सर्वो निखिल-वपुषाऽभीष्टसिद्धिं विधत्ते
स्वर्गो मोक्षो निखिलमनुजैरीप्सितोऽर्थः प्रदिष्टः ।
आद्यः स्वर्गो भवति चरमो मोक्षरूपोऽपवर्गः
स्वर्गो भावं जनयति पिता पुत्रतुल्यं हि मोक्षम् ॥३॥

तस्मात्पूर्वं कर्मकाण्डं प्रदिष्टं प्रोक्तञ्चान्ते मोक्षदं ज्ञानकाण्डम् ।
एका नीतिर्लौकिकी वैदिकी वा पौर्वापर्यं पाल्यतां शास्त्रसिद्धम् ॥४॥
तस्माज्ज्ञानं कर्मजन्यं हि सिद्धं ज्ञानान्मुक्तिर्ज्ञानजन्या च सिद्धा ।
मुक्ते रूपं चादिबीजं प्रदिष्टं दानादानं यद्धि तत्सर्ववीजम् ॥५॥

दाने भवति ह्यादानं दानं यागात्मकं स्मृतम् ।
तस्मात्कर्मणि संप्रोच्य ज्ञानमुक्तं ततः परम् ॥६॥
सहस्रशीर्षा पुरुषः प्रकृत्या संयुतो यदि
सहस्रशीर्षा स्त्रीपुंसौ जगत्यां यज्जगच्च सः ॥७॥

अमूर्तस्य शिरस्कत्वं नान्यथा तूपपद्यते
प्रकृतिस्तस्य रूपं तु शक्तिर्मायाश्च कीर्तिताः ।
अरूपश्च सरूपश्च प्रोक्तो धर्मवपुस्ततः ॥८॥

मायापुरुषयोर्निष्ठं यद्वैचित्र्यं विभिद्यते ।
तत्र सन्दिह्य लोकोऽयं नानाभ्रममुपाश्नुते ॥९॥
तस्मिन् भ्रमे वर्तमानः शक्ते प्राधान्यमिच्छति ।
शक्तिरूपधरोऽरूपो यो वै धर्मवपुःस्मृतः ॥१०॥

स एव हि प्रधानोऽस्तीत्येतल्लोकेऽपि दृश्यते ।
गर्भोत्पत्तिर्न नारीणां गर्भोत्पत्तिस्तु पौरुषी ॥११॥
ताभिर्युताश्च पुरुषा उत्पद्यन्ते चरात्मकाः ।
पुरुषःप्रकृतिश्चोभौ दानादानं परस्परम् ॥१२॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

एवमेव हि कुर्वाते प्रत्यक्षमिव तत्तथा ।
यथेह दृश्यते लोकेऽलोके चापि तथैव तत् ॥१३॥
एवं विचिन्त्य विहिता व्याख्या तत्त्वेन संयुता ।
तत्त्वं सम्पादयेल्लोके दृष्टं संयोगजं फलम् ॥१४॥

न वास्तवेन तत्त्वेन विना धर्मः प्रवर्धते ।
न धर्मेण विना क्वापि लोके शान्तिः प्रदृश्यते ॥१५॥
स्वधर्मः स्वस्य वै शान्तिं परधर्मः परस्य हि ।
शान्तिं प्रकुरुते नान्यः एष शाश्वतिको विधिः ॥१६॥

जगद्वपुर्धर्मवपुर्गतं सन्दर्भसंहितम् ।
अनुसृत्यैतमाख्याता व्याख्या तुष्टिकरा भवेत् ॥१७॥
मनस्तुष्टिर्यथाशास्त्रमुपपद्येत सर्वथा ।
ईषावास्योपनिषदस्तथा व्याख्या न लभ्यते ॥१८॥

जगद्वपुर्धर्मवपुरुभयोर्हि परस्परम् ।
दानादानं ख्यापयति विधिर्वेदप्रचोदितः ॥१९॥
येन सर्वमिदं व्याप्तं व्यापकः स प्रभुः स्मृतः ।
प्रभुदत्तं हि लभते जगद् भोगं च सम्पदम् ॥२०॥

यत्प्राप्तं येन यस्माच्च तत्तस्यार्पणपूर्वकम् ।
भोगो भोक्तुर्विधिर्दृष्टो यागहोमजपादिकः ॥२१॥
यतो हि धर्मवपुषः पूर्णात्पूर्णो जगद्वपुः ।
आप्नोति पूर्णधर्मोऽपि लोकाऽनुष्ठितकर्मभिः ॥२२॥

आध्यात्मिको धर्मवपुर्भौतिकोऽप्यात्मिकश्च वै ।
जगद्वपुस्तौ सम्पृक्तौ वर्धते हि परस्परम् ॥२३॥
कर्मकाण्डज्ञानकाण्डे प्रबोधयत तत्कथम् ।
प्रोच्यते नास्ति मुक्त्यर्थं ज्ञानकर्मसमुच्चयः ॥२४॥

कर्मकाण्डं वितनुते यं धर्मं सैव सर्वथा ।
लोके परत्रापि गतिं प्रदास्यति सुनिश्चितम् ॥२५॥
तस्यैव मनुजैः सर्वैः स्वकीयत्वेन चिन्तनम् ।
धर्मात्मकस्य जगतो धर्मत्वेन हि चिन्तनम् ॥२६॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दृष्टस्त्यागविधिस्तत्र भोगार्थमुपकल्पितः ।
जगद्वपुर्धर्मवपुरुभयोस्त्यागचोदनः ॥२७॥
ईशावास्यमिदं तेन हेतुनोद्दिश्य तं त्यज ।
ईशा दत्तेन भुञ्जीथाऽऽदाने दानं न चान्यथा ॥२८॥
गृहीतं च धनं यस्मात्पुनस्तस्यार्पणं स्मृतम् ।
वेदे यत्प्राप्यते तद्वल्लोकेऽपि च तथैव तत् ॥२९॥
अप्राकृतं प्राकृतं वा प्राप्नोति परतो यदि ।
आनृण्यं तत्र सम्प्रांतं धर्मानुष्ठानचोदना ॥३०॥

आदत्ते वस्तु यः कोऽपि गृह्णाति हि परार्पितम् ।
परदत्तस्य च पुनः प्रत्यर्पणविधिः स्मृतः ॥३१॥
जगद्वपुर्धर्मवपुरुभावेवं परस्परम् ।
दानादानं प्रकुर्वन्तावेधेते हि न चान्यथा ॥३२॥
उभयोर्वर्धनार्थोऽयं मन्त्रो वै प्रथमः स्मृतः ।
ईशावास्योपनिषदि न तद्व्याख्यासु लभ्यते ॥३३॥
विना धर्मवपुर्लोकविहितेन सुकर्मणा ।
समृद्धिं समवाप्नोतीत्येतद्वेदनिरूपणम् ॥३४॥

जगद्वपुर्विना धर्मवपुषा स्वसमुद्भवम् ।
स्थितिं च लभते नैव वेदाऽर्थोऽयं समग्रतः ॥३५॥
तस्मात्तदनुरूपा हि व्याख्या भवति सङ्गता ।
ईशावास्योपनषदि मन्त्रस्य प्रथमस्य तु ॥३६॥
प्राप्ता या धर्मवपुषा समृद्धिर्यागकर्मभि : ।
साऽऽदानं तस्य किञ्जातं तत्तृप्तः स ददाति च ॥३७॥
लोकमूर्ध्निगतो भावः स्वभावो वर्तने नृणाम् ।
जगद्वपुर्धर्मवपुः सम्पृक्तौ तं जनिष्यतः ॥३८॥

जगद्वपुर्धर्मवपुरुभौ यत्र समन्वितौ ।
उत्पद्यन्ते समे भावास्तत्रोत्कर्षप्रदायकाः ॥३९॥
दानार्थविहिताऽऽदानमतः प्रियकरं स्मृतम् ।
आदानमप्रियकरं दानाभावे वुधैः स्मृतम् ॥४०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दानादाने प्रकुर्वाते जगद्धर्मौ परस्परम् ।
निःश्रेयसाभ्युदययोः प्राप्तिमार्गप्रदर्शनम् ॥४१॥
अग्नौ हुतं च धर्माय तद्दानं जगतः स्मृतम् ।
आदानं कुरुते तस्माज्जगत्तत्त्वार्थसम्भवम् ॥४२॥
चराचरजगत्सर्वं यागानुष्ठानजं फलम् ।
धर्मस्य मूर्तरूपत्वं जगत्तत्त्वार्थसम्भवः ॥४३॥
अमूर्तधर्मसम्प्राप्तिर्निःश्रेयस उदाहृतः ।
मूर्तोऽकर्षकरो धर्मोऽभ्युदयः सम्प्रकीर्तितः ॥४४॥

अमूर्तोऽग्निर्यथा मूर्तिमाप्नोति कर्मणा तथा ।
धर्मोऽपि मूर्तिमाप्नोति यागहोमजपादिभिः ॥४५॥
नाधारं हि विना वह्निर्धर्मश्चात्र चकाशते ।
आधारेण तु संयुक्तौ तावुभौ सम्प्रकाशकौ ॥४६॥
अग्निना ध्रियते तावत्तदाधारस्य संस्थितिः ।
भावाभावेन रूपेण धर्मेणापि तथैव तत् ॥४७॥
सूर्याग्निचक्षुषामेकं धर्मनिष्ठं प्रकाशनम् ।
मानवानां धर्मनिष्ठं नानारूपप्रकाशनम् ॥४८॥

गुणसम्पद् द्रव्यसम्पत्कर्मसम्पदनेकधा ।
प्रकाशनं मनुष्याणां धर्मो हि दुरतिक्रम : ॥४९॥
कुर्मन्नेवेह कर्माणि जिजीविषेच्छतं समाः ।
कर्मानुष्ठानतो नान्यज्ज्ञानकाण्डेऽपि दृश्यते ॥५०॥
कर्मानुष्ठानतो लभ्यं ज्ञानस्याप्युपपद्यते ।
निःश्रेयसाऽभ्युदययोः कर्मैव साधनं धनम् ॥५१॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सरस्वती नः सुभगा मयस्करत्

-प्रा. सिद्धिनाथगौतमः
धादिङ्जनपदीयः

संस्कृतं विश्वसर्वस्वं विश्वकल्याणकारकम् ।
ज्ञानविज्ञानसम्पन्नं शाश्वतं चिरनूतनम् ॥१॥
संस्कृतं नाम दैवी वाक् इति कृत्वा मुहुर्मुहुः ।
नेपालवासिभिः सर्वैः संस्कृतं स्वीकृतं पुरा ॥२॥
शैलाधिराजमहिता महनीयमूर्तिर्विश्वोत्तमोत्तमजनैश्च सुगीतकीर्तिः ।
नेपालपालजनताहितराजशक्तिर्देशे **विराजति** च विश्वजनीनवृत्तिः ॥३॥
ईदृङ्नेपालराष्ट्रे विरचितविभुताराजसंशुद्धभावाद्
भूयो भूयः समन्ताद् विनतिततियुता लेशभाराभिभूताः ॥४॥
स्वं स्वं भावं विभाव्य प्रथितगुरुवरस्वाभिमानप्रसक्ता
राराजन्ते प्रसन्नाः सततसुकृतिनः सौम्यवाचो जनास्ते ॥५॥
सर्वेषां भक्तिश्रद्धाविलसितवचसां गौरवेण प्रकृष्टां
पूज्यां गीर्वाणवाणीं प्रथयितुमनसां कोविदानां समाजः ॥६॥
संस्थाप्यैवं विचित्रं बहुविधविषयाकारभारायितं तद्
विद्याया मन्दिरं यद् विलसति बहुधा स्वर्णजन्मोत्सवेन ॥७॥
वाल्मीकौ संस्कृताख्ये, ह्यतिशयमहिते यत्र विद्यालये सा,
रीतिः पौरस्त्यवृत्तिः समधिकविषयाः साधुसन्धानपक्षाः ॥८॥
सश्रद्धं शिष्यवर्गाः प्रमुदितवचनैः प्राज्ञवर्यैः श्रमेण
प्राध्याप्या विश्वविद्याः समयसुकृतितः पाठिताः पूर्णरूपात् ॥९॥
जयतु संस्कृतं यत्र सार्थकं जयतु संस्कृतं यत्र सक्रियम् ।
जयतु संस्कृतम् यत्र गर्जनं जयतु संस्कृतं यत्र वास्तवम् ॥१०॥
जयतु संस्कृतं धर्मभूतये, जयतु संस्कृतं लोकभूतये ।
जयतु संस्कृतं राष्ट्रभूतये, जयतु संस्कृतं विश्वभूतये ॥११॥
इतीत्थमान्दोलनलक्ष्यलक्षितं कार्यं विशिष्टं क्व गतं बताधुना ।
धर्मस्य राज्ञो जननीधराया विश्वस्य भूतिर्ह्यनपेक्षिता किम् ? ॥१२॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यज्ञप्रार्थना, यज्ञविवेचनञ्च

-प्रा.डा. डिल्लीप्रसादगौतमः
धादिङ्जनपदीयः

निःश्वासभूता वेदाश्च सर्वे यज्ञस्य धारकाः ।
कर्मयज्ञविदो नाथाः स्वर्गफलप्रदायकाः ॥१॥
तत्राह्वानकरैर्मन्त्रैराहूतंस्त्वविभावसो ! ।
जय हे ! जगतां हेतो ! सर्वकुण्डाधिवासनः ॥२॥

उदितेऽनुदिते सूर्ये समयाध्युषिते तथा ।
होतव्यं सर्वथा विप्रैरिति वेदस्य घोषणा ॥३॥
तथैव सर्वदा विप्रैः पालनीया श्रुतिः सदा ।
फलं दातुं समर्थोऽस्ति भवेयुः फलदायकाः ।
तस्माज्जुहोमि हे ! वह्ने ! समिद्धे तव ज्योतिषि ॥५॥

गार्हपत्याऽहवनीयाऽवसथ्याऽग्निदेवताः ।
आहूयाहूय हूयन्ते यज्ञधर्मपरायणैः ॥६॥
प्रणीता-प्रोक्षणी-स्रुवस्फाश्चेति साधनैर्धनैः ।
अनुष्ठितो मया यज्ञः सर्वान् कामान् ददातु मे ॥७॥

श्रौतस्मार्तानि कर्माणि सर्वाणि विधिपूर्वकम् ।
अत्राधानविधानेन क्रियन्ते याज्ञिकै : सदा ॥८॥
अग्निहोत्रं दर्शयागः पौर्णमासश्च वैदिकाः ।
यथा सर्वे विधीयन्ते श्रौतसूत्रानुसारतः ॥९॥

एवमेव सोमयागश्चातुर्मास्यश्च यागकः ।
सर्वे यज्ञा विधीयन्ते वेदोक्तसूक्तिभिः सदा ॥१०॥
हिरण्यगर्भो विश्वात्मा विश्वेशः सर्वभावनः ।
गृह्णाति वह्निरूपेण पदार्थान् यज्ञसञ्चितान् ॥११॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सेव्यं सदा संस्कृतम्

-नारायणदत्तशास्त्री
तनहूँजनपदीयः

अस्माकं प्रथिता विशालहृदया भूयात्सदा संस्कृति-
र्भाषासंस्कृतसंस्थिता च जननीसादृश्यभावं गता
ज्ञेया कोमलभावसज्जितपरा नेपालिभाषा तथा
भाषासंस्कृतिरक्षणाय सततं सेव्यं सदा संस्कृतम् ॥

नेपालीयपरम्परासहगता मा देववाणी मता ।
सा पूज्या मनसा प्रयुक्तवचसा धार्या तथा धारणा ॥
भाषासंस्कृतवादिनां न च कदा नैपालकानां भवेत्,
शिक्षा संस्कृतग्राह्य-पाठ्य-विषये संस्थापनीया सदा ॥

भाषा सैव भवेच्च ब्राह्मणधृता सर्वोन्मुखी भारती,
सा भूयाच्च सदा चतुर्मुखधरा हिन्दुत्वराष्ट्रोद्भवा ।
ग्राह्या संस्कृतधारणा च गणिता विद्या भवेत्सुन्दरी,
एतां संस्कृतभारतीं प्रतिदिनं जानन्तु सर्वे जनाः ॥

भाषा-संस्कृति-राष्ट्रभावजनितं नेपालराष्ट्रोद्भवम्,
भूयात्सार्थकभावमत्र विदुषां सत्यं शिवं सुन्दरम् ।
कालुष्यं विषसन्निभं प्रतिहतं वाक्यं तथानर्गलम्,
त्याज्यं दूरमनाहतं प्रतिदिनं सेव्यं सदा संस्कृतम् ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

काल-गतिः

-पं. लोकनाथ आचार्यः
काष्ठमण्डपस्थः

वुधैः संग्रथितान्यत्र सन्ति शास्त्राण्यनेकशः ।
तेषु या भणितिः सर्वा कालोऽनन्तोऽजरोऽमरः ॥१॥
स कालो निधनो रुद्रः शिवः सङ्कर्षणः स्मृतः ।
कालो हि सृजते सर्वं कालात्मा ग्रसते पुनः ॥२॥
पठने पाठने चैव कालो हि बलवान् प्रभुः ।
एकैकं सहसा सर्वं व्याप्नोति व्यापकं जगत् ॥३॥
तत्र व्यावर्तमानस्य कालस्य शासनं परम् ।
केनाप्येनमपाकर्तुं शक्यते न वयं पुनः ॥४॥
'कालस्य वशगाः सर्वे न कालः कस्यचिद् वशः ।'
ऐतिह्यं वर्तते स्वच्छं तदेव हि सनातनम् ॥५॥
तस्मात् कालात्मकं सर्वं स एष परमेश्वरः ।
यद्यत्करोति तत्सर्वं शुभं भवतु निश्चितम् ॥६॥
अधुना विप्लवो देशे न वै शान्तिः प्रवर्तते ।
समायातं च वैदग्ध्यं विद्वद्भिः संविचार्यताम् ॥७॥
कालाऽधीना वयं सर्वे न क्षमाः कालशासने ।
तथाऽपि जयवृद्ध्यर्थं वदन्तु जय संस्कृतम् ॥८॥
उद्घोष्यं वर्तते प्रत्नं सर्वेषां हितकारकम् ।
ऐतिह्य-भूतमस्माकं जगज्जयतु संस्कृतम् ॥९॥
रम्या सा लेखनी सौम्या भावना च बलीयसी ।
वर्वर्ति संस्कृता वाणी लेख्या संस्कारपद्धतिः ॥१०॥
लेखने लेखनी रुग्णा नैषा सरति सर्वथा ।
इदानीं विपयीभूतं जयतु जयसंस्कृतम् ॥११॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गीतिकाष्टकम्

-आचार्यः खेमराजः केशवशरणः
काष्ठमण्डपीयः

प्रथमगीतिका

जय बुधरञ्जनि! कलुषनिकन्दनि ! जय सुरवाणि ! सदा
सत्पददोहनसुरभिः सुधियां विहरसि मनसि मुदा ॥ जय..॥
विद्या सकला ज्ञानं निखिलं तव वाङ्मयनिहितम्
विततगभीरं दर्शनममलं भुवने तव विदितम् ॥ जय..

सालङ्कारा सद्गुणललिता सरसा भावमनोज्ञा
गृहलक्ष्मीरिव मङ्गलरूपा हरसि मनस्त्वमभिज्ञा ॥ जय ..
कः स्यात्तादृशपुरुषो यस्ते नो विद्यान्महिमानम्
सिंहीव त्वं भाषाविपिने प्रथयसि निजगरिमाणम् ॥ जय ..

नैके देशास्तव सम्बन्धान्नेदीयस्त्वं दधति
सञ्जीवनमिदमुज्ज्वलमैत्र्याः कालातीतं लसति ॥ जय ..

अष्टमगीतिका

शान्ते ! कुरु करुणां मनुजेषु ।
दृष्टिगतामपनीय विषमतां सृज समतां हृदयेषु ॥ शान्ते ..
स्थिरताऽपगताऽभ्युन्नतिरस्ता श्लथतां दृष्टिनिपातै-
र्मनुसन्ततिमखिलामनवद्यैर्भूषय सद्गुणजातैः ॥ शान्ते ..

तव विरहे न हि मानवताया गरिमा भाति जगत्याम्
चिन्तितमनसा विश्वं प्रतिपलमास्थां वहति भवत्याम् ॥ शान्ते..
स्वर्गतुलां दधदनुपममेतद्भूतलमतिशयरम्यम्
मानवविहितैः सुन्दरसुकृतैः सततं भवतु प्रणम्यम् ॥ शान्ते...

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

'चरैवेति' वदन्ति किम् ?

राजेश्वरदेवकोटा, गोरखाजनपदीयः
जयतु संस्कृतमित्यान्दोलनस्याग्रणीर्नेता च ।

स्वत्वं विस्मृत्य यत्राहं जीवितं निभृतं मृतम् ।
पार्थक्यं किञ्च तत्र स्यात् अक्षम्यो विस्मृतो गतः ॥
यद्दृश्योऽस्मि छायायां यथा पत्राहितस्तरुः ।
धन्यास्ते कृतसंस्काराः 'चरैवेति' वदन्ति किम् ?

पठत संस्कृतम्

-कमलराजरेग्मी
पाल्पाजनपदीयः
जयतु संस्कृतमित्यान्दोलनस्याग्रणीर्नेता च ।

शस्त्रास्त्रपाणौ समये
सम्प्रति विवेकहीने
क्रियाहीना धिया हीना जनाः
संस्कृतन्तु निरर्थकम्
वदन्ति
परन्तु
आस्था यत्र वलीयसी यदि भवेत्
आशा चिरं जीवति ।
तदा
सापि चिरं जीवति ।
अत एव पठत संस्कृतम्
लिखित संस्कृतम् ॥
ओम् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विविधं पद्यम्

आचार्यः पूर्णचन्द्र उपाध्यायः ढुंगेल

नीतिविषयकं पद्यम्-

जगतीह समुन्नतौ गतः सुसमाजोऽस्ति स एव संप्रति ।
पृथिवीतलमर्त्यजातिपु यदि यस्याऽस्ति गिरः समादरः ॥१॥

भक्तिविषयकं पद्यम्-

बिल्वादिभिः प्रतिदिनं समुदं सपर्यां
कर्तारमाशु विदधाति रमापतिं यः ।
विश्वार्णवस्य च तितीर्षुजनैकधामा
गौरीपतिर्भवतु शङ्कर आश्रयो मे ॥२॥

शृङ्गारिकं पद्यम्-

नवजलदसुनीरैः पूरिता निर्झरिण्यो
विहितपुलिनभङ्गा उद्धतास्तास्तरुण्यः ।
नवजलधरकाले सङ्गमोत्काः सरन्ति
जलनिधिपतिमेता दर्शितावर्तभङ्ग्यः ॥३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पटमूर्खस्य गणितम्

-प्रा.तेजःकेशरि उपाध्यायः (पटमूर्खः)
काष्ठमण्डपजनपदीयः

प्रश्नरूपम्

मध्ये प्रोद्धरणं पिधाय कलनं कार्यं प्रकोष्ठत्रये
स्पृश्यं वेदधनर्णभागगुणनैस्तद्वर्गमूलेऽव्यये ।
शून्ये मूल्यसमीकरे प्रतिशतं प्रश्नेऽस्ति योद्गारता
कैर्ज्ञाता पटमूर्खगण्यगणिते कासारताऽसारता ॥१॥

उत्तररूपम्

रम्यां वाञ्छति सत्कलां कविकलाकारस्य नेत्रं सदा
मिष्टां वाञ्छति सत्कृतिं कविकलाकारस्य कर्णः सदा ।
पूर्णां वाञ्छति साधनां कविकलाकारस्य सृष्टिः सदा
पूर्णां वाञ्छति कामनां कविकलाकारस्य दृष्टिः सदा ॥२॥

दृष्ट्वैवं प्रकृतेश्छविं सुललितां ताङ्गैरमासोपमाम्
गर्वोऽस्तङ्गमितो जडः कविरभूत् कर्तुं कृतिं सोपमाम् ।
वभ्रामान्तरहो मनोगतिरतः किं वच्मि नो वच्मि वा
श्रद्धाभक्तिरभूत् क्व वाऽधरमहो प्रोद्घाटये वा न वा ॥३॥

कः स्वर्णे वितनोतु सौरभनिभां शुभ्रां शुभां भावनाम्
कुर्यात् कश्च पवित्रवन्धननिभां स्वच्छां मनःकामनाम् ।
लक्ष्यं किं नरजन्मनोऽस्तु भवतादुद्देश्यमुच्चैः कथम्
कर्तव्यं किमु मातृभूमिविषये कः स्मारयेन् निर्व्यथम् ॥४॥

वृत्तं स्थापयितुं शरीरमनसोर्वज्रोपमं प्रोज्ज्वलम्
भावञ्चान्तरनाविलं रचयितुं मुक्ताफलं निर्मलम् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रोद्यच्चापकलम्ववन्नयनयोः प्रोत्तुङ्गकोटिद्वयम्
शोभां सौरभमाकिरत् प्रतनुतामास्येन्दुपद्मोदयम् ॥५॥

निःसारं खलु पुस्तकस्य पठनं विद्या पराऽन्यैव सा
मन्दं तन्ननु चर्मचक्षुरमला दृष्टिः पराऽन्यैव सा ।
तेजः कीदृशमुष्णशीतमृदुलं स्यात् कीदृशः केशरी
को ज्ञाताऽन्तरनाविशन्नुपमितिं कृत्वा वहिर्वोपरि ॥६॥

भाषा नास्ति कथञ्चनापि कुटिला वक्रेव या दृश्यते
स्पष्टोऽर्थोऽस्ति तथापि गूढनिहितो भावो न किं ज्ञायते
सत्यं वेत्ति न रूपमक्षिपटले अक्षाल्य वै तत्स्फुटम्
स्पष्टार्थोऽपि न वुध्यते कटिगतं भित्वा न वद्धं पुटम् ॥७॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अवनिसुषमा

-प्रा.डा.माधवः भट्टराई
खोटाङ्जनपदीयः

भाति स्थली प्रकृतिसुन्दरराजधानी,
रम्या गिरेर्हिमवतोऽङ्कतले निषण्णा ।
शैलैर्मनोज्ञवनकुञ्जयुतैः समन्ता-
दावेष्टिता कुसुमिता युवतीव साक्षात् ॥१॥

ऊर्ध्वं घनैः शिरसि संपिहिता विशेषा-
मध्ये स्तनैरिव युतास्ति विचित्रशृङ्गैः ।
नीचैर्मनोहरपटैरिव शोभिताऽस्ति,
कूलङ्कषाजलचयैरवनीवधूर्या ॥२॥

सूर्योदयेन दिवसे विहितप्रकाशा
चन्द्रत्विषा निशि च विस्फुरिताखिलाशा ।
ग्रामस्थितिः सततमुज्ज्वलितास्ति तत्र,
सौभाग्यसम्पदिव राजति भूमिरत्र ॥३॥

आकर्षतीव सकलान् किमु मेलनाय
स्वाङ्गप्रदर्शनमुखेन रहःस्थिता या ।
दृष्ट्वा तदीयनवभावमनन्यभावा
आनन्दमाप्य रसिका युवका रमन्ते ॥४॥

मध्ये नितान्तरुचिरोर्वरवाटिकास्ति,
पार्श्वे निकुञ्जघनकाननपूर्णतास्ति ।
पादे सरित्सलिलसंप्लवचारुतास्ति,
सर्वत्र साधु सुषमामहिमा चकास्ति ॥५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ज्वलितम्

-प्रा.शिवहरिः मरहट्टा
गोरखाजनपदीयः

एतन्मदीयं ननु तत् त्वदीयम्,
स मे स्वदेशः परकीयदेशः ।
विहाय चैनं मलिनं विभावम्,
प्रकाशितं नः क्व गतं प्रियं तत् ? ॥१॥

नवीनचीनांशुकवस्त्रमुज्वलम्,
विचित्रनिर्माणकलाविशिष्टम् ।
देशे विदेशेऽपि च गन्तुमुत्सुकम्,
शैलायितं कुत्र गतं प्रियं तत् ? ॥२॥

वर्षातपाघातनिरोधनार्हम्,
यदुच्चतायाश्च सदा प्रतीकम् ।
अस्मच्छिरोभूषणरत्नरूपम्,
विचित्रमासीत् क्व गतं प्रियं तत् ? ॥३॥

स्वसभ्यता-संस्कृतिख्यापनेन,
तदार्षसन्देशप्रकाशनेन ।
मूलञ्च यद् राष्ट्रियचेतनायाः
केनापि नीतं क्व च वा विलुप्तम् ॥४॥

अखर्वगर्वायितशक्तिरूपम्,
व्रह्माण्डवीजायितबोधरूपम् ।
विश्वात्मवादादि च यस्य लक्ष्यम्
श्रुतेः स्मृतेः ख्यापनकेन्द्रभूतम् ॥५॥

स्वल्पेऽपि दृष्टे गुणगौरवेण,
प्राग्जीवनादर्शप्रदर्शनेन ।
परम्परानैतिकमूल्यभावात्,
तन्नेदमासीन्नयनाभिरामम् ॥६॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अध्यात्मविद्यातननाय घोषितम्,
नानावदानैर्विदुषां प्रतिष्ठितम् ।
विद्यावतां संश्रयभूमिसंज्ञितम्,
सद्यः श्रुतं नो ज्वलितं शिरोधनम् ॥७॥

उपेक्षया वा ऽक्रियया भृशं तथा
भियान्यनिर्देशपरेण हेतुना
तद्रक्षणे येऽधिकृताः पलायनम्,
कुर्वन्ति तत् केन सुरक्षितं भवेत् ? ॥८॥

लालाटिका ये ऽपुरुषार्थवादिनः
प्रदाय नित्यं प्रभुपादसेविनः ।
त्यक्त्वा स्ववस्त्रं सहसा पलायनम्,
कुर्वन्ति भो ! केन सुरक्षितं भवेत् ? ॥९॥

कार्यावरोधो दहनप्रभावात्
मनांसि खिन्नानि शुभेच्छुकानाम् ।
अस्मच्छिरो वा ज्वलितं शिरस्त्रम्
निमील्य नेत्रे न निरीक्ष्यते किम् ? ॥१०॥

शिरस्त्रदाहेन शिरः प्रकम्प्यताम्
प्राप्ताधिकारैस्त्वरितं विमुच्यताम् ।
भस्मीकृतेऽपि प्रथिते शिरोमणौ
विनाशमीयान् नहि धीर्न पौरुषम् ॥११॥

तन्नाशबीजन्तु कुतः प्रवृत्तम्,
सम्वर्धने केन जलादि दत्तम् ।
विभिन्नमानैर्निपुणं समीक्ष्य
प्लवङ्गवृत्तिर्न कथं निरस्या ? ॥१२॥

व्यालोऽपि भीमो मणिना विहीनो
माहात्म्यहीनन्तु वदन्तु केचित् ।
एकात्मभावेन दृढैः प्रयत्नैः
किं स्यादसाध्यं भुवि भावनीयम् ॥१३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

क) नेपालकीर्तिकौमुदी कृष्णा

-प्रा.डा. वेणीमाधवः ढकाल
पाल्पाजनपदीयः

जगत्तुंगैः श्रृङ्गैर्हिमगिरिगतैरञ्चितयशा
विलासानां साक्षी परमशिवयोः पुण्यपदयोः ।
नदीनां लीलाभूः प्रकृतिरमणीचुम्बितमुखो
युवा नेपालोऽयं विलसति महानायक इव ॥

पवित्रे नेपाले हरिविमलगण्डात् प्रपतिताम्
नदीनां तां पीनाममलसलिलां गण्डजनदीम् ।
शिलाशालग्रामैर्हरिहरमयैरञ्चिततनुम्
जनः कृष्णानाम्ना जपति सततं भावविनतः ॥

इयं मुक्तिक्षेत्रात् प्रवहति प्रतिप्रीतिसरसा
पतन्ती पापाणे क्वचन वनकुञ्जेऽप्यतिघने ।
रुरुक्षेत्रं यात्वा प्रणमति हृदीशं प्रमुदिता
हृषीकेशं भक्त्या कृतपदसमर्चा भगवती ॥

रुरुक्षेत्राद् गन्तुं जलनिधिमियं लौकिकपतिम्
हरेर्लब्धादेशा पुलकिततनुश्चञ्चलमनाः ।
तरङ्गैर्गायन्ती किमपि हृदयाह्लादमधुरम्
जवाद् देवाघट्टं स्पृशति मिलितुं चेतरसखीः ॥

इयं शुक्लां शुक्लैर्जललवकणैरञ्चिततनुम्
त्रिशूलीमाराध्यां शिवगिरिभवां पावनजलाम् ।
दरौंदीं मात्स्येन्द्रीं सरितमपि वृद्धां शुभजलाम्
मिलित्वा तां मादीं जलधिपथयात्रां प्रकुरुते ॥

गृहीत्वा तां गङ्गां तदनु कपिलस्याश्रममिता
हृदा नत्वा सिद्धं रमणभुजपाशं प्रपतिता ।
तरङ्गैरुत्तुङ्गैः स्पृशति जलधौ चुम्बति मुखम्
रसेऽपारे मग्ना जलनिधिविलीना भवति किम् ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ख) शान्तिश्चिरं रोदिति

सन्मैत्री स्खलिता दया विगलिता सन्दिग्धता सन्तता,
श्रद्धा ह्रासमिता गता मनुजता धर्मो विषण्णः स्थितः ।
सर्वत्रैव भयं जडा इव वयं मृत्युर्नरीनृत्यति,
द्यौः शान्तिः शुभमन्त्रपादपतिता शान्तिश्चिरं रोदिति ॥१॥

गौरी कुत्र गता ? कथं पशुपतिर्नेत्रे निमील्य स्थितः
सीता किं कुरुते, जगद्गुरुरहो बुद्धः कथं निश्चलः ।
देवाः कुत्र गताः, कथं च पितरस्तिष्ठन्ति मौना इव
उद्धर्ता न विलोक्यते भुवि वयं पङ्के निमग्ना इव ॥२॥

नेपालं गृहयुद्धगर्तपतितं दारिद्र्यदुःखाहतम्,
नग्नं भग्नकुलं विलोक्य दयया नेपालपुत्रा द्रुतम् ।
उन्मादं परिहृत्य देशजनताः कल्याणमाकाङ्क्षत,
पृथ्वीस्वर्गमिमं गुणैरभिनवैः सत्कृत्य संरक्षत ॥३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

क) शान्तिप्रियो भवतु नूतनवत्सरोऽयम्

- प्रा.डा. टीकारामोऽधिकारी
कास्कीजनपदीयः

दुर्भाग्यदुष्टमधुना खलु विश्वमस्ति
मिथ्याविवादनरहिंसननष्टशक्ति ।
कुर्वन् सदा शुभविकासमशान्तिहीनं
शान्तिप्रियो भवतु नूतनवत्सरोऽयम् ॥१॥

वन्धुत्वमस्तु जगति प्रणयश्रियाढ्यं
गेहे समृद्धनगरेऽभयमस्तु शस्तम् ।
सम्पादयन् मनुजमानसमात्मदीप्तं
शान्तिप्रियो भवतु नूतनवत्सरोऽयम् ॥२॥

सूर्यो भवेज्जनहिताकलनानुकूल-
श्चन्द्रोऽस्तु विश्वहितकृत् स्वकलादुकूलः ।
तारागणोऽभयकरोऽस्तु सदा नराणां
शान्तिप्रियो भवतु नूतनवत्सरोऽयम् ॥३॥

सत्ये समीरयतु विश्वमयसमीरो
भद्राय दिग्गजगणोऽपि सदाऽस्तु धीरः ।
विश्वम्भराऽस्तु शुभशान्तिकरी सहर्षं
शान्तिप्रियो भवतु नूतनवत्सरोऽयम् ॥४॥

नानालताकुसुमकुञ्जकलाविकासं
कुर्वन् मुदाऽमलघनावलिमन्दहासम् ।
सम्पादयन् कविमनोमुकुलप्रकर्षं
शान्तिप्रियो भवतु नूतनवत्सरोऽयम् ॥५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विद्यार्थिपूज्यगुरुपण्डितसाधकानाम्
प्रज्ञावतां निखिलजन्तुदयापराणाम् ।
कृत्वा विपच्छमनमात्मवतां यथेच्छम्
शान्तिप्रियो भवतु नूतनवत्सरोऽयम् ॥६॥

सन्त्रासजालजनका न भवन्तु मूर्खाः
सद्भावसिन्धुरसिकोऽस्तु सदा मनुष्यः ।
प्रज्ञाकलाऽभिनयनीतिमतामवश्यं
शान्तिप्रियो भवतु नूतनवत्सरोऽयम् ॥७॥

भाग्यप्रियोऽधनजने वलदोऽवले च
मोक्षप्रियोऽस्तु सति दण्डधरः खले च
स्नेहाम्वुना सफलयन् हृदि भावपुञ्जं
शान्तिप्रियो भवतु नूतनवत्सरोऽयम् ॥८॥

काव्यक्रियासहचरः कविकोकिलस्य
कल्याणकृच्च कृषकेषु समृद्धशस्यः ।
आयुर्यशोविभववृद्धिभिरेककालम्
शान्तिप्रियो भवतु नूतनवत्सरोऽयम् ॥९॥

मोहं निरस्य समरस्य दुराशयात्तम्
क्षान्तिं वितत्य भवनेषु न चेषुपातम् ।
धृत्वा समस्तधरणीं सकुटुम्बभावं
शान्तिप्रियो भवतु नूतनवत्सरोऽयम् ॥१०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ख) सुरवाक् शुभकामना

रुचिकरी दिवि या रुचिराक्षरा
प्रकृतिगा पदषट्पदगुञ्जिता ।
स्थिररसा शुभकल्पलतेव या
भवतु सा सुरवाग् भुवि सुस्थिरा ॥

द्रुतसुवर्णचिता रचिताऽमरैः
पदभरैश्च रसध्वनिमञ्जुलैः ॥
अविचला कविकाव्यकलाकुला
भवतु सा सुरवाग् भुवि सुस्थिरा ॥

अपुरुषापुरुषैश्च पुरातनैः
कविभिरिद्धतनुस्तरुणीकृता ।
धृतधराप्यधराऽसवसारदा
भवतु सा सुरवाग् भुवि सुस्थिरा ॥

भुवि रताऽभवभूतिरताऽपि या
हृदि सदाशय-वाणसमादृता ।
नवरसापि करैरनवीकृता
भवतु सा सुरवाग् भुवि सुस्थिरा ॥

नलकथाललिताऽनलताच्युता
सहृदयै र्हृदयेषु सदार्चिता ।
नवनवाऽप्यसकुन्त-शकुन्तला
भवतु सा सुरवाग् भुवि सुस्थिरा ॥

सुवितता दयितावचनामृतैः
प्रतिगृहं गृहिभिः परिचुम्बिता ।
सुमधुरा शिशुकालकलाञ्चिता
भवतु सा सुरवाग् भुवि सुस्थिरा ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ललितगीतकथाकवितादृता
कनककङ्कणवद् वनिताधृता ।
भ्रमरझङ्कृतवद्वनगुञ्जिता
भवतु सा सुरवाग् भुवि सुस्थिरा ॥

जलधिबद्धरणीतलविस्तृता
गगनवद्गिरिगह्वरसङ्गता ।
रविशशिच्छविवत् प्रमुदावहा
भवतु सा सुरवाग् भुवि सुस्थिरा ॥

नयनयोरुभयोःस्थिरकर्णयोः
सुषिरयोरपि सौरभविज्ञयोः
सुवितता हृदि भाविकसम्पदा
भवतु सा सुरवाग् भुवि सुस्थिरा ॥

मगरलिम्बुतमाङजनादिषु
गुरुङचौधरिक्षत्रियवन्धुषु ।
विविधधार्मिकपर्वणि सौख्यदा
भवतु सा सुरवाग् भुवि सुस्थिरा ॥

नटनटीवचनामृतकामिनी
स्मिततरङ्गघटाधवलीकृता
जलधरध्वनिधन्यपदावहा
भवतु सा सुरवाग् भुवि सुस्थिरा ॥

शिवगणेशरमेशसरस्वती-
करुणया कलनादमवापिता ।
अहरहः सकलैर्नृगणैः श्रिता
भवतु सा सुरवाग् भुवि सुस्थिरा ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ग) जय जगदम्वे

प्रणमति मातस्त्वदनुचरोऽयं
सविनति कुर्वन् तव वरिवस्याम् ।
त्वमसि गतिर्मे नुद निजधर्मे
हर विपदं मे जय जगदम्वे ॥

पथि नभसि त्वं मम सदने त्वम्
मम वपुषि त्वं मम वचरि त्वम् ।
त्वदितरमम्वे नहि भवसृष्टम्
विहरसि मातः सकलभुवि त्वम् ॥

भव हृदि गुप्ता त्वमसि शरण्या
जगति सदा मां वह वहुमान्या ।
त्वदितरदेवे नय न मनो मे ।
मतिमव धन्ये ! जय जगदम्वे ॥

कलुषवशोऽहं ग्रहगणदृष्टः
प्रतिपदमार्तो ननु वहुकष्टः ।
नय नयमार्गे सदसुगणं मे
सकलशरण्ये जय जगदम्वे ॥

अणुरसि सृष्टौ भव मम दृष्टौ
जननि जनिं मे श्लथय भवाव्धौ ।
अनुपमगुण्ये भुवि ततपुण्ये
कुरु करुणां मे जय जगदम्वे ॥

अहरहरस्मि स्मयपरिखिन्न-
स्त्वदनुग्रहे स्यां सततमखिन्नः ।
हरिहरवन्द्ये धृतनरमुण्डे
कुरु भरणं मे जय जगदम्वे ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

घ) मातृभूशोकदुर्दिनम्

कथमद्य विषाक्तधूमवद् गगनं भ्रान्तपतत्त्रिसङ्कुलम् ?
हिमशैलमनोहराऽटवी रुचिहीना ज्वलतीव हा ! भुवि ॥
॥१॥

गिरिनिर्झरझर्झरध्वनिः कथमार्तिस्वनगुञ्जितोऽजनि ?
गजगोमृगसुन्दरी दरी मनुजैरासवभूः कृता भुवि ॥
॥२॥

वसुधाऽसि सुधेव वल्लभा ससुराणाञ्च विपश्चितां शुभा ।
कथमद्य कृताऽस्थिरा स्थिरा जननि ! त्वं निजसन्ततिप्रिया ?॥
॥३॥

तव चित्तसरोजमव्ययं क्षतवैक्लव्यमयं धरे ! कथम् ? ।
नयनं चलतारकं खवत् क्षरदम्वु प्रतिभाति निष्प्रभम् ॥
॥४॥

सुकृते सुकृतैस्तपस्यता विहिता त्वं कृतिना स्वयम्भुवा ।
मनुजैरिह भावदूषिता सह पीडां जननि ! स्थिरा सदा ॥
॥५॥

त्वमसि प्रमदेव सुन्दरी सुकुमारीव शिरीषमञ्जरी ।
विकसद्गुणगौरवाञ्चिता वत ! सीतेव खलैरपाकृता ॥
॥६॥

नयभूषणभाग्भिरुज्ज्वलैः कतिभिर्भूपतिभिर्धियाञ्चिता ।
विवुधैः कवितेव सेविता कथमद्यासि खलैः प्रपीडिता ?॥
॥७॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भवती सुरसृष्टिरुत्तमा सुरसावत् सुरसाऽऽवृता क्षुधा ।
इति मातरिमामपाकृतिं सह कण्डूतिसमां नरैः कृताम् ॥
॥८॥

तव वक्षसि शोणितैरपि मनुजैर्युद्धरतैः कृता नदी ।
हृदयं शतधा सहस्रधा सह दीर्णं क्षमया क्षमे ! नुता ॥
॥९॥

अहहा ! तव शोकदुर्दिनं विषवन्मे हृदयं निकृन्तति ।
किमु मातुरवस्थयाऽनया सुरलोकोऽपि सदैव खिद्यते ?॥
॥१०॥

विपिने रुदतीव वानरः करवालैर्दलितोऽथवा नरः ?
इति साध्वसभग्नमानसे ! सह पीडामधुना वसुन्धरे !
॥११॥

मरणं प्रकृतिः प्रकोधिता कविभिः सिद्धवचोऽमृतैरिह ।
इति का परिदेवनाऽवनौ जननि ! त्वं विपदां शुभासि नौः ॥
॥१२॥

शुभमेष्यति शोकदुर्दिनं जनताजाड्यतुषारसम्भवम् ।
कथितं विपदन्तरं सुखं विपदुन्मूल्य सुखोन्नताभवम् ॥
॥१३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ङ) योगिनरहरिवन्दना

नमः थापावंशे ललितजनकाल्लब्धवपुषे
नमो नाम्ना ख्यातिं भुवि च बलवीरेति भजते ।
नमः कालीकोटावनितिलकबालाय भवते
नमो लालुग्रामेऽखिलसहचरैस्ते विरमते ॥१॥

नमः क्षिप्रानाथाभिधगुरुमठावासरुचये
नमस्ते मोहाख्यं पितृसदनवन्धं विजहते ।
मृगस्थल्यां नाथैः सविधि पदशास्त्रञ्च रटते
नमो गीता-चण्डी-रसिक-सुकुमाराय भवते ॥२॥

प्रियस्त्वं नाथानामपि सदसि नाम्ना नरहरिः
प्रियस्तद्वत् पूर्वं पठनसमये भारतभुवि ।
हरिद्वारे योगाश्रमगुरुकुले लब्धसुरगीः
कृता लाहौराख्ये प्रथितगुरुवंशेऽपि वसतिः ॥३॥

प्रियोऽभूस्त्वं ज्ञानिप्रमुखजगदेवादिविदुषा
महो ! दोग्धाऽसि त्वं निखिलपद-वेदोपनिषदाम् ।
स्वदेशाऽऽख्यानानां त्वमसि मुखवेत्ता नरहरे !
नमोऽस्त्वोमित्याख्यं भुवनहितशस्त्रं निवहते ॥४॥

भवानष्टाशीत्या भुवि च वयसां मण्डलचरः
शुभैर्होमैर्मन्त्रैः समजनि च शान्तिस्तुतिपरः ।
भवानेको योद्धा विपदि खलु नेपालजगत-
स्तपोमूर्तिं वन्दे निखिलमखजन्याञ्च भवतः ॥५॥

गवामुद्धर्ता त्वं विविधमखमाङ्गल्यजनुषाम्,
प्रतिष्ठाता पूर्वस्त्वमसि विधिपूर्वं सुरगवाम् ।
तनुस्त्वं योगानामसि नरहरे ! कीर्तिवपुषे
नमस्तुभ्यं योगिन् ! पशुपतिसमाधिस्थ ! भवते ॥६॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

आनन्दमयजीवनस्य रहस्यसूत्राणि

-हेमराजः ज्ञवाली
बाँकेजनपदीयः

संसारी वा साधकः यः कः फलाकांक्षा तस्य वाधिका :
उद्देश्यं कर्मणः पूर्णा स्यान्नास्ति सदयमावश्यकता ॥
सर्वान्क्रोशस्त मां संस्मर योगिन् ! सपथि सदाऽभिसर
अथ योगं शरणं गच्छामि भज बुद्धं शरणं गच्छामि ॥

किमप्यत्राऽनुकूलं स्थात् किमप्यत्र प्रतिकूलं स्थात्
वयं कातरा इव कम्पयामः परिणाम अत्र पुप्पाणि सन्ति कण्टकैःसह ।
वीचयः सन्ति विरमन्त्येव अन्तश्चेतनां सवलां कुरु
निस्यन्दं शरणं गच्छामि भज बुद्धं शरणं गच्छामि ॥

जीवनमेकं तृणमिव भाति संसारो भयानको काननमिवास्ति
क्षणमपि प्रहरो दूरे मातुर्हरणाय शरणाय रावणस्तत्रायातः ।
अतः काननमृगं न कामय उल्लङ्घ्य लक्ष्मणरेखाम्,
अथ साक्षिणं शरणं गच्छामि भज बुद्धं शरणं गच्छामि ॥

यदा ताड्यसे त्वं केनाऽपि प्रति शोकभावना दूरयत्वेव ?
मनसि यदि नास्ति दूराग्रहः स्मर तत्र तथ्यमवभात्येव ।
यत्र मनसि नास्ति दुराग्रहस्तन्मनो भवति वैरायतनम्
अविरोधं शरणं गच्छामि भज वुद्धं शरणं गच्छामि ॥

(नेपालिभाषायां प्रकाशितायाः आनन्दप्रज्ञागीतमालायाः जीवनप्रज्ञासूत्रारम्भस्य संस्कृतानुवादः)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

क) शान्तिप्रियो भवतु नूतनवत्सरोऽयम्

-प्रा.रामहरिः दाहाल
धादिङ्जनपदीयः

दुर्भावदुर्धरदवावलिमासमन्ताद्
धाराजलैस्सुमतिभिः सकलं निशाम्य ।
दत्वा जनाय नवजीवनदायिशक्तिं
शान्तिप्रियो भवतु नूतनवत्सरोऽयम् ॥१॥

भिक्ष्यार्थिने विपुलभैक्ष्यमयं प्रदत्तात्
रोगार्दिताय सुपथौषधमेष दद्यात् ।
दत्ताज् जनाय नवजीवनमेष नूनं
शान्तिप्रियो भवतु नूतनवत्सरोऽयम् ॥२॥

बाल्यं वयोऽस्ति मनुजस्य प्रभातकालः,
स्यात् स्फूर्तिदं युववयो दिनमध्यकालः ।
लोकाय चार्पित इहास्ति शिवोपहारः
शान्तिप्रियो भवतु नूतनवत्सरोऽयम् ॥३॥

अग्न्यास्त्रचूर्णरहिताः प्रवहन्तु वाता
नोढ्वा जनौघरुधिरं सरितो वहन्तु ।
संराजतां वियदसौ कटुनादहीनम्,
शान्तिप्रियो भवतु नूतनवत्सरोऽयम् ॥४॥

पीयूषमस्ति समता सततं धरायाः
प्राणायिताऽस्ति समता सततं कलायाः ।
शान्तिर्विभाति समताश्रयिणीत्यवश्यम् ,
शान्तिप्रियो भवतु नूतनवत्सरोऽयम् ॥५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

देशे भ्रमन्तु भयहीनतया मनुष्याः
कामादिदोषवशगा न भवन्तु दूष्याः ।
लोकोपकारव्रतमाकलयन्तु नित्यम्
शान्तिप्रियो भवतु नूतनवत्सरोऽयम् ॥६॥

शान्तेः सुमानि जनमानसतोषणानि
फुल्लन्तु भो त्रिभुवने भवने वने च ।
नेहेत कोऽवनितले समभावरत्नम्,
शान्तिप्रियो भवतु नूतनवत्सरोऽयम् ॥७॥

गोभूमिरत्नधनधान्यपदार्थजातम्,
यन्नश्वरं जगति सर्वजनप्रसिद्धम् ।
तल्लब्धये परहितं किमु कृन्तनीयम् ?
शान्तिप्रियो भवतु नूतनवत्सरोऽयम् ॥८॥

ख) उत्तरापेक्षा

धरणिखननतुल्ये पुण्यकार्ये स्वदेहम्
श्रमविमलजलैर्यो स्नापयत्येष नित्यम् ।
तदपि कृषकवर्गो ग्रासहेतोर्विषण्णो
भ्रमति यदि तदा भो मानवाः किं भवेम ॥१॥

अगणितबहुतापः कष्टसाध्ये सुकृत्ये
श्रमिक इह शरीरं प्रत्यहं हन्त युङ्क्ते ।
तदपि स निजदेहं नैव धर्तुं प्रभुश्चेत्
कथमिव जनसेवी वक्तुमीशः सदा स्यात् ॥२॥

अहमिव क इहास्ते धीरवीरो मनस्वी
रिपुदलदलने को नित्यशक्तो यशस्वी ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मम मतिमनुगच्छेदन्यः किं भो श्रमेण
जन इह वचनं मे पालयेदादरेण ॥३॥

इति निगदति नेता यत्र स्वार्थे निमग्नः
सकलजनहितैषी स्यात् कथं सोऽतिदीनः ।
निज-निजजनलाभायैव नेता प्रवृत्तो
भवति यदि कथं नो स्याद् विकासस्य ह्रासः ॥४॥

इह कतिचन वादाः प्रसृता यत्रतत्र
कतिचन निजवादे सङ्गताः सन्ति तत्र ।
इतरजनवचस्कः श्रोतुमीशोऽधुनाऽऽस्ते
सकलजनमनस्को जेतुमीशोऽधुनाऽऽस्ते ॥५॥

अथ परजनमूल्यं किञ्चिदेवागणय्य,
निजजनगुणवत्तां भूयसाहो प्रचार्य ।
पदमलिनमनस्का नेतृसङ्घा धरायाम्
गणयितुमुचितं कं योगमेते हि दद्युः ॥६॥

कथमिह जनवर्गा रोलपा-डोलपास्था
धनवसतिविहीनाः सन्ति विद्रोहिणश्च ।
क इह सुजननेता वासहीनान् निवास्य
तदुदरपरिपूर्त्यै ग्रासदानाय शक्तः ?॥७॥

अधिकतरमनुष्या दुःखजालेन खिन्नाः
कतिचन तु मदान्धा नित्यसौभाग्यपूर्णाः ।
कथमिव स्थितिरेषा मूलतो हन्त ! नश्येत्
कथमिव सुखबिन्दुं दुःखितो हन्त पश्येत् ॥८॥

प्रतिदिनमिह ध्वंसः श्रूयते साधनानाम्,
प्रतिदिनमिह दाहः श्रूयते वाहनानाम् ।
प्रतिदिनमिह हत्या दृश्यते सज्जनानाम्
प्रतिदिनमिह लाभोः दृश्यते दुर्जनानाम् ॥९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कृषकजन इहास्ते कृष्यमाणः समन्तात्
श्रमिकजन इहास्ते पीड्यमानः समन्तात् ।
दलितजन इहास्ते दल्यमानः समन्तात्
क इह सुचिरमास्ते स्वस्थचेताः समन्तात् ॥१०॥

श्रमिकजनहितेच्छुर्यो परार्थेषु लग्नो
दलितजनसमुत्थानाय चेतो दधानः ।
मदजनितविकारैर्विकृतो यो न दृष्टः
स इह जनसमूहैर्मानितः कोऽस्ति नेता ? ॥११॥

कथमिह प्रतिवादं वर्तमानो विवादः
कथमिह प्रतिमर्त्यं वर्धमानः प्रवादः ।
कथमिह प्रतिकार्यं वर्धमानाः समस्याः
कथमिह परदोषोद्‌घाटने क्षिप्रता च ॥१२॥

इह खलु गिरिदर्यारण्यतीरे स्थितानाम्,
प्रतिदिवसमनेकैर्दुःखजालैर्वृतानाम् ।
धनपदगतिविद्यावृत्तिभिर्वञ्चितानाम्,
बलधनपदवद्भिर्मानुषैः पीडितानाम्, ॥ १३ ॥

निजजठरगुहायाः पूर्त्तये दुःखितानाम्,
विततधरणिमध्ये वासलाभोद्यतानाम् ।
मलिनतनुधराणां सर्वतो हेलिताना-
मशनवसनपूर्त्यै कः प्रभुर्मे सुतानाम् ॥१४॥

इति गदति धरैषा प्रत्यहं रुद्धकण्ठा
शिथिलिततनुवल्ली चिन्तया दुःखग्रस्ता ।
वयमिह तनयाः स्मस्तर्हि नेपालभूमे-
र्दुखदहनविनष्ट्यै तत्पराः किं न स्याम ॥१५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ग) वाणीवन्दना

नाहं जाने त्वङ्का मातः किन्त्वद्रूपं कुत आयाता ?
किन्तु जाने शरणापन्ने सततमहं रक्षितो भविता ॥
विधिरपि मातुः कृपयैवासौ सृष्टिप्रपञ्चं रचयति नित्यम् ।
यदि न मिलेद् वै कृपा भवत्या वक्तुमपि वर्णं प्रभवेत् किमयम् ?

प्रत्ययप्रकृती पदमिति वर्णाः स्थानप्रयत्नोच्चारणशैल्यः
प्राकृतसंस्कृतभाषिकभेदो भाति भवत्या वाङ्मयवेशः ॥
वाचनभाषणशिक्षणरीतिं नर्तनगायनवादननीतिम् ।
बोधति मनुजस्तव कृपयैव किन्न हि कुरुषे जनमदनाय ॥

जडयति चेतो दुर्गुणजातं मदयति वुद्धिं ममता नित्या ।
कार्यकुकार्ये किमु नो जाने संसृतिकूटादव जगदम्वे ॥
तव खलु कृपया मुनिवरकृष्णोऽधिकतरमान्यो समभूल्लोके
वेदसमूहं वर्गीकृत्य वेदव्यासो नाम स लेभे ॥

खगपशुजातं घातं घातं विपिने व्यचरत् कश्चन व्याधः ।
सोऽपि भवत्याः शरणं प्राप्य प्रथमकवित्वं सत्वरमाप ॥
स्वरजातीनां ये ये भेदाः सन्ति च ये ये कलाविशेषाः ।
तान् खलु जननीकृपया वेत्तुं प्रभवति मनुजो यशो विधर्तुम् ॥

उपमारूपकदीपकसारेऽलङ्कृतिभूषितभावविचित्रे ।
भारति, रमयसि कविवरवृन्दं कविवरवृन्दं रमयति विश्वम् ॥
ज्ञानशरीरं जननि त्वमसि ज्ञानविहीनो मनुजो ह्येषः ।
प्रभवति स्तोतुं किं वा वर्णैर्भव सन्तुष्टा भावप्रसूनैः ॥

ये विख्याता दृश्यप्रकाराः प्रथिता येऽपि च श्रव्यप्रकाराः ।
भगवति तव तद् वाङ्मयरूपं ननु तव रूपात् किमपि हि शिष्टम् ?
नवरसरूपां ह्लादस्वरूपां व्यञ्जनबोधनलक्षणरूपाम् ।
कविवरमानसपुष्करवासां नमति सदाऽसौ संस्कृतभाषाम् ॥

Jayatu Sanskritam, Kaṭhmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गुणगणरीतिषु वृत्तिषु मूर्त्तां सरसपदानामवयवभूषाम् ।
कविवदनाम्वुजनित्यनिवासां नमति जनोऽसौ वाङ्मयरूपाम् ॥
तन्त्ररहस्यं, मन्त्रमहत्त्वं यन्त्रविवेको ध्यानसमाधी
सन्ति भवत्याः कृपयैतानि लोकहितार्थं सञ्चलितानि ॥

कलायाः प्रतीकां करे भाति वीणां पराज्ञानरूपां गले ब्रह्मविद्याम् ।
प्रपन्नार्तिझञ्झौघछद्दैकचित्तां तमोनाशमिच्छुः सदा नैमि ताराम् ॥
अयं पङ्गुरन्धोऽक्षमः शब्दहीनो वराकः स्तवेत् किं कलाशब्दमूर्तिम् ।
श्लथैर्वर्णमात्रादिभिर्भावपुष्पैर्नतिं भक्तिसंलालितामर्पयामि ॥

घ) परं गृहे भा न विराजते कुतः

मध्येपथं द्राङ् निपतन्ति गोलिका,
भवन्ति मर्त्या ननु पर्यवेक्षकाः ।
सेवाव्रती कश्चन तत्र हन्यते
कथं हतोऽसाविति नैव बुध्यते ॥१॥

वनेचराः सन्ति सहस्रशोऽधुना
व्याघ्रा वराहा भयदायिनः किमु ?
नो नो ततः किं परमत्र मानुषाद्
भयं भवत्येव हि शस्त्रसंवृतात् ॥२॥

इतस्ततो निर्भयमेव लुण्ठकाः
सद्वेषमाधाय चरन्ति दर्पिताः ।
तेषां दुराचारततेः समाप्तये
प्रशासनं न क्षमते न वा जनः ॥३॥

लोकस्य रक्षाव्रतिनो नरेश्वराः
लोकस्य रक्षाव्रतिनो वरा भटाः ।
धरन्ति शस्त्रं यदि ते वरं मतं
तदन्यथा नो ग्रहणाय सम्मतम् ॥४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्वदेहपोषे परिवारपालने
यथाकथञ्चिद् नियताञ् जनान् किल ।
धनं जनं वा द्रुतमेव देहि भो !
निगद्य चेत्थं किमु भीः प्रवर्ध्यते ॥५॥

मध्येपुरं लोकसमूहमध्यतः
शठोऽयमुक्त्वा सततं प्रताड्य च ।
स्थानीयनेतृत्वपदे स्थितो जनः
पदात् स्वदेहादपि किं विचाल्यते ? ॥६॥

एकं कुतश्चिद् भवनं विराजते
मिथो जनास्तत्र वसन्ति प्रेमतः ।
अन्योऽन्यमेतेषु न स्वार्थभावना
निदर्शनं तद् भवनं व्यशोभत ॥७॥

एवं स्थितौ कालक्रमोऽधिकं गतो
न तत्र कश्चिद् विसुखो व्यजायत ।
अस्त्येव भूमौ भवनं विभूषणं
चर्चाऽचलत् चेत्थमहो तदाऽधिकम् ॥८॥

तदेव भूमेः खलु भूषणं गृहम्,
स एव कालो गतिमान् चलत्यहो ।
त एव कालक्रमवर्धिता जनाः
परं गृहे भा न विराजतेऽधुना ॥९॥

कदाचिदेतद् गदितं तपोवनम्,
मतं कदाचित् खलु योगवैभवम् ।
भोगालयं श्रीलसितं ततोऽभवत्
किं वाऽभवत् सम्प्रति तत् किमुच्यते ॥१०॥

पीडा कुतश्चिद् दहनन्तु कुत्रचिज्
जनापमानं हननञ्च कुत्रचित् ।
मार्गावरोधो धरणञ्च कुत्रचित्
सत्तार्थप्राप्तौ नमनञ्च कुत्रचित् ॥११॥

देशो भवेच्चेद् वलवुद्धिसंयुतः
लभेत शान्तिं जनता भृशं ततः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विचार्य चेत्थं ननु देशरक्षणे
विहाय स्वार्थं यतनीयमेव भो ! ॥१२॥

यदुच्यते तत् क्रियते न कुत्रचिद्
यच्चिन्त्यते तत् क्रियते न सर्वदा ।
मनोवचःकर्मगतीः पृथक् पृथक्
स्वीकृत्य गेहं प्रचलेदहो कथम् ? ॥१३॥

कदाचिदस्मिन् जनको व्यजायत
तथा कदाचित् सुगतश्च शोभितः ।
अहोऽचलद् ब्रह्मसभा दिने दिने
सुखं सुशान्तिं मनुजाः प्रपेदिरे ॥१४॥

किमस्ति चौर्यं किमु लोकशोषणं
किमस्ति दण्डाधिकलोकभञ्जनम् ।
अबुध्य चैतज्जनता तदाऽचलत्
कथावशेषा घटनाऽधुनाऽभवत् ॥१५॥

आवासभक्ष्यादिकवस्तुलब्धये
कामादिचेतोगतदोषशान्तये ।
विपन्नतायाश्च भृशं विमर्दने
चिन्ताऽधुनाऽदृश्यत नैव नेतृषु ॥१६॥

यथा विपन्ना न रुदन्ति सा क्रिया
लोको यथा तुष्यति सा समुन्नतिः ।
परार्थता यत्र च सा मनुष्यता
चरिष्णुतैवाहितजन्मसार्थता ॥१७॥

नेपालभूर्द्वन्द्वकनक्रसङ्कुले
निमज्जमानाऽधिकदुःखसागरे ।
अप्राप्य चोद्धारकदक्षधीवरं
रोदित्यहो कारुणिकं दिवानिशम् ॥१८॥

पीडाग्निशून्यं नयपालभूतलम्,
तथा च धर्तुं सुखशान्तिसंवृतम् ।
वयं सुलग्ना यदि नाम ब्रूमहे
मिथः सुभावं किमु नैव दध्महे ॥१९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अतोऽत्र वैरं खलु दुस्सहं दृढं
त्याज्यं मनुष्यैः शुभलक्ष्यलब्धये ।
विश्वस्य दृष्टौ नयपालवासिनः
कदापि नैवात्र भवन्तु दोषिणः ॥२०॥

भरतवाक्यम्-

मालिन्यं शमतां प्रयातु सततं शालीनता वर्धताम्,
सद्भावं तनुतां मिथो जनगणो न्यायेन संवर्त्तताम् ।
नेतृत्वं सुचरित्रकं विलसतात् सम्भूतिरावर्तताम्
वर्धन्तां विविधाः कला इह शिवे भक्तिश्च संवर्धताम् ॥२१॥

ङ) कुर्यामहं किं जगतो हिताय

अहो व्यतीतं बहु जन्मजातम्,
जातं कथं मानवजन्म सिद्धम् ।
सिद्धं कियल्लोकहितस्य कार्यम्,
कार्यं विशिष्टं कतिधाऽवशिष्टम् ॥१॥

विचिन्त्य चैतत् किमु नैव लग्नम्,
स्वार्थस्य पूर्त्यै तु सदैव लग्नम् ।
विधाय कुक्षेः परिपूर्तिमात्रम्,
जातोऽस्मि सत्यं क्षितिभारमात्रम् ॥२॥

अनेन लब्धं नरजन्म भूत्यै
लोकस्य स्थित्यै जनरक्षणाय ।
तथापि किञ्चित् सुकृतं कृतं नो
कथं निरर्थं श्वसितीह हंहो ॥३॥

उद्दिश्य चैनं वुहुधा कुजातम्,
विनिन्द्य पूर्वे च परे गदेयुः ।
किंवा न वाच्यो धरणौ भवामि
यतो निरर्थां जनिमावहामि ॥४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अन्नं वितीर्णं न वुभुक्षिताय
दत्तं न वासोरहिताय वासः ।
कृतं न किञ्चिद् वसुवर्जिताय
दीनान्धरुग्युग्जनताहिताय ॥५॥

पदे पदे तैश्छलमादधानैः
पदे पदे सञ्छलिताः वयं स्मः ।
न साधवः कापटिकाश्च नास्मः
कथं धरायां जनिमावहामः ॥६॥

समाः कियत्यो धरणौ व्यतीताः
रामाः कियत्यो धरणौ च भुक्ताः ।
तथापि चेतो न हि तुष्टिमेति
इत्थं वृथा जीवनमस्तमेति ॥७॥

अहो नु पूर्वैर्धरणेर्हिताय
कृतानि कर्माणि सुमङ्गलानि ।
अस्मिन् हि वात्स्ये महनीयवंशे
जातोऽस्ति वा नैष जनोऽस्ति जातः ॥८॥

व्यतीतमर्धं वयसः प्रमाणम्,
सुभुक्तमन्नं बहु पेययुक्तम् ।
न जातु कर्माण्यभवन् शुभाय
कुर्यामहं किं जगतो हिताय ॥९॥

खादन्ति सिंहा महिषा वराहाः
खादन्ति मत्स्या विहगाश्च जीवाः ।
किं वा नरो खादनमात्रदक्षः
परोपकृत्यैव भवेत् प्रशस्यः ॥१०॥

अदत्तभोगी न भवेयमत्र
न वा भवेयं बहुसञ्चयी च ।
जीवामि वाऽहं मरणं वृणोमि
भूमौ सुकार्यं यदि नाचरामि ॥११॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

च) पठ कीरवाचम्

किं ब्रह्म किं जगदिदं किमु पञ्चतत्त्वम्,
कानीन्द्रियाणि किमिदं मनसः स्वरूपम् ।
इत्थं विविच्य कथयद् नररूपजातम्,
कल्याणमिच्छसि सखे पठ शौकशास्त्रम् ।
के कौरवाः कपटवञ्चनकर्मशूराः
के पाण्डवा जनहिताय सदार्द्रचित्ताः ।
युद्धात् कदापि विजयो मिलतीह नैवम्,
लोके वदत् पठ सखे मधु कीरशास्त्रम् ॥

सेव्याः सुखाय वनितात्मजभृत्यगेहाः,
यद्वा विचार्य चपला इति ता निरस्याः ।
एतद् यथार्थमधिगन्तुमना भवेस्त्वम्,
सम्यक् पठेर्ननु सखेऽमृतकीरवाचम् ॥
तत् स्वं त्वदीयमिति जीवसि यावता त्वं
भूयोऽधिकं मृगयसे ननु चौरवत् त्वम् ।
एवं जनाय समतादृशमर्पयन्तीम्,
सद्ज्ञानमिच्छसि सखे पठ कीरवाचम् ॥

वन्यैस्तृणैर्जनिभृतः करिकीशखड्गान्
संलालितानजकपोतककुक्कुराँश्च ।
पश्येत् स्वपुत्रमिव स्नेहदृशा वदन्तीम्,
सद्बुद्धिमिच्छसि सखे पठ कीरवाचम् ॥
कैस्कैः सुकर्मभिरयं मिलितो नृदेहः
किं किं विधाय सफलः प्रभवेत् धरायाम् ।
इत्थं सदैव जनता अभिप्रेरयन्तीम्,
स्वाराज्यमिच्छसि सखे पठ कीरवाचम् ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सन्त्येव देवमहिताः श्रुतयश्चतस्र-
स्ताः सन्ति नन्दनसुरालयसौख्यसारम् ।
शेषः सनन्दनमवोचत यद्रहस्यम्,
तन्मुक्तिहेतु पठ भागवतं पुराणम् ॥

ईश्वरो भाति सर्वत्र स्थावरे जङ्गमेऽपि च ।
स्थावरान् जङ्गमाश्चैव तस्माच्च प्रणमेद् बुधः ॥
प्रेम्णा चखाद भगवान् शबर्या स्वदितं फलम् ।
किं फल्गुभिर्द्रव्ययोगैरेकं प्रेमैव जीवति ॥

कामा लोभा न पूर्यन्ते कदाचिदपि जन्तुषु ।
इति वुद्ध्वा वुधो नित्यं कामान् लोभाँश्च वर्जयेत् ॥
यावत् क्षीणौ न जायेतां कामक्रोधौ महारिपू ।
तावत् कथं स्युर्मनुजा विवेकवलशालिनः ॥

लव्ध्वा साम्राज्यभोगं कतिचन कृतिनो भूमिपाला वभूवु
र्योगे वैविध्यपूर्णे वयमिह कुशलाः साधु केचित् समूचुः ।
सर्वे नैवाऽऽसते ते कथमिह सुजनैर्ध्येयमेतद् गदन्तीम्,
सेवध्वं भद्रतायै सततमिह सुधानिर्झरीं कीरवाचम् ॥

द्रव्यैरुच्चावचैर्यो भवति न वशगो युक्तिमत्यापि वाचा
सिद्धान्तैः सांख्ययोगादिभिरथ न विभुर्ध्यानयागैश्च वश्यः ।
दम्भासूयाविहीनैः सरलनुतिवचो वैभवैः केवलं भो ।
तुष्येल्लावण्यधामा भवदवशमने वारिवाहश्शरण्यः ॥

दुःखं घोरं भवेद् वा विपुलतरसुखं जायतां जीवनेऽत्र
चिन्तानापैतु कस्मिँश्चिदपि च समये दुःखहर्ता व्रजेशः ।
इत्थं सञ्चिन्त्य नित्यं प्रणतजनमनोरोगहर्तारमीशं
शान्त्यै ध्यायन्तु भद्राः सततमिति शुको वक्ति श्रीमद्रहस्यम् ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पशुपतिः

-डा. हरिप्रसादोऽधिकारी
वाराणसीवास्तव्यो भूटानीयः

पशुपतिं भवतापनिवारकम्,
निखिललोकसमर्चितविग्रहम् ।
सुवरदं प्रणतार्तिहरं परम्,
शुभकरं जनदुःखहरं नुमः ॥१॥

सकलमानवभाग्यविवर्धिनी
निखिलदैन्यविनाशनकारिणी ।
सुजनसेवितमार्गविबोधिनी,
विजयतां सुरगीरवनीतले ॥२॥

विमलभावविभासनभास्वरा
सुखकरी भवरोगहरा परा ।
बुधवरैः सततं परिसेविता
विजयतां सुरगीरवनीतले ॥३॥

दनुजभावविनाशनदीक्षिता,
भयहरा भजतां सुमनोहरा ।
विविधकाव्यचमत्कृतिचर्चिता
विजयतां सुरगीरवनीतले ॥४॥

सकलभेदविमर्दनकारिणी
गुणवतां शुभसद्मविहारिणी ।
पतितलोकसमुद्धरणे रता
विजयतां सुरगीरवनीतले ॥५॥

जयति भुवनमध्ये वैदिकं दिव्यज्योतिः
जयति च सुविशाला संस्कृतिर्हैन्दवीया ।
जयति सकलनाथः सर्वकल्याणकारी
जयति जयति वाणी संस्कृता सर्वकाले ॥६॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

क) जयतु वाङ्मयं संस्कृतात्मकम्

-प्रा.दुर्गाप्रसादः दाहाल
ओखलढुङ्गाजनपदीयः

ऋषिगणैः स्तुतं वेदमूलकं सुरवरैर्नुतं सौष्ठवावहम् ।
बुधविशारदैः सादरं श्रुतं जयतु वाङ्मयं संस्कृतात्मकम् ॥
॥१॥

विपुलभेदकैः शास्त्रसञ्चयैर्युगयुगान्तरं भ्राजते हि यत् ।
मनुजजीवनं यत्र मृग्यते जयतु वाङ्मयं संस्कृतात्मकम् ॥
॥२॥

न खलु भारती भूरियं सदा भवति गोलकं दिग्विदिङ्मयम् ।
विपुलया गिरा रज्यतेऽनिशं जयतु वाङ्मयं संस्कृतात्मकम् ॥
॥३॥

बदरकानने संस्थितो मुनिर्धरणिकर्णभू रामचिन्तकः ।
सहजलेखनैर्यद् वितेनतुर्जयतु वाङ्मयं संस्कृतात्मकम् ॥
॥४॥

विमलमानसैर्विश्वभावकैर्भुवनमित्रता या विभाव्यते ।
मिलति यत्र सा भावने शिवे जयतु वाङ्मयं संस्कृतात्मकम् ॥
॥५॥

प्रथमचेतना विश्वसभ्यता मनुजभावनाव्यापि चिन्तनम् ।
दिविजभूमिजैः सुष्ठु चर्चितं जयतु वाङ्मयं संस्कृतात्मकम् ॥
॥६॥

य इह पण्डितो ज्ञानसागरं दृढमतिप्लवैस्तर्तुमिच्छति ।
जयति यस्य वाग्राशिमुज्ज्वलं जयतु वाङ्मयं संस्कृतात्मकम् ॥
॥७॥

किमधिकं वयं चिन्तयामहे विमलवाङ्मये श्रीगुणावहे ।
स्वयमहर्निशं सेव्यतां बुधैर्जयति वाङ्मयं संस्कृतात्मकम् ॥
॥८॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ख) गङ्गावन्दना

गङ्गे ! कृष्णपदाब्जमिश्रतुलसीसौगन्ध्यसंवाहिके !
गौरीनाथजटाविहारिणि ! जगत्सन्तापसन्तापिके !
भूभृन्नाथसुते कृपाजलयुते त्रैलोक्यनाथे दये !
लग्नं स्यान्मम मानसं तव पदे मुक्तिप्रदे निर्भये ॥१॥

हे पाथोनिधिवल्लभे तव जलं पीयूषकल्पं पिवन्
नित्यं नन्दतनूजपूजनविधिं प्रेम्णा सुसम्पादयन् ।
ध्यायं ध्यायमहर्निशं गिरिसुतादेहार्धभूतं शिवम्,
मातस्त्वत्कृपया कदा नु भविता कल्पोऽपि स्वल्पः क्षणः ॥२॥

हे भागीरथि किं भगीरथपितृनुद्धर्तुमेवाऽऽगता
यद्वा दर्शयितुं हरेर्निरुपमां कीर्तिं मनोहारिणीम् ।
किं वा शोभयितुं शिवस्य मुकुटं वा क्रीडितुं स्वेच्छया
लीलां ज्ञातुमतीव शैलतनये ! वाञ्छाऽस्ति चित्ते मम ॥३॥

हे जह्नुप्रभवे ! तटे तव शुभे स्यादाश्रमः शोभनः,
स्याद्वेदाध्ययनं पवित्रवटुभिः प्रोच्चारितं मोहनम् ।
स्यादेकस्तुलसीमठः सुललितः स्याद्धेनुरेका शुभा
किं नाकेन धनेन कल्पतरुणा किं भूपभोगेन वा ॥४॥

हे हेमाद्रिसुकन्यके तव जलं किञ्चिद् जलं वा सुधा
मन्ये नैव जलं सुधास्ति शुभदा सद्भुक्तिमुक्तिप्रदा ।
वाञ्छन्ति प्रभवोऽपि देवि ! सततं ब्रह्मेन्द्ररुद्रादयो
यस्याः वाःकणसेवनात् विगलितप्रक्षीणसर्वाधय : ॥५॥

नित्यं मूर्ध्न्यदधाद्ध्रुवोऽपि गिरिजे ! यत्पादपङ्केरुहम्
एतद्वै कुलदैवतं शुभकरं विष्णुप्रसादोद्भवम् ।
धातुः स्वर्णकमण्डलौ विनिहितं कृष्णाङ्घ्रिसम्पूजनम्
श्रीनारायणलोकदं सुखकरं वाञ्छावधिः स्यान्मम ॥६॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यन्नीरस्य सुसेवनात् त्रिभुवने प्रख्यातितां प्रापितो
धन्योऽभूत् खलु दानवोऽपि भगवद्भक्तोऽथ वैरोचनिः।
हे गङ्गे ! तव पावनाङ्घ्रियुगले किं वर्तते तादृशम्,
यत्सङ्गादजडो जडोऽपि निखिलः प्राप्नोति मुक्तिं पराम् ॥७॥

वाञ्छा नैव कदापि हेमतनये ! स्वर्गेन्द्रसिंहासने
यद्वा भूमितलेऽपि दुर्लभतरे भोगेऽपि तृष्णा मम ।
त्वत्तीरे वसतिः सदैव सुखदे स्याज्जन्मजन्मान्तरे
आशीर्वादमिमं प्रयच्छतु शिवे ! कृष्णप्रसादोद्भवम् ॥८॥

ग) षड्देवात्मकसाईबाबास्तवः

भूमौ दुष्टकलेरुपद्रवचयं दृष्ट्वा मुहुर्ग्लापिताः ।
ब्रह्मोपेन्द्रमहेन्द्रपाशिसदृशा देवा जगत्पालकाः ॥
कृत्वा दिव्यसभां मतैक्यसरणीमालम्ब्य भूमेर्हिता
यं वै तुष्टुवुरन्तरात्मवचसा साईं शिवं तं श्रये ॥

यः पूर्वं भुवनं विभाव्य मनसा दुःखेन शोकेन च ।
व्याप्तं पर्वतजाप्रियः स्ववचनं सत्यं विधातुं स्वयम् ॥
भारद्वाजकुले कुलैश्च मुकुटे लेभे जनिं पावने ।
सत्यं तं भगवन्तमाद्यपुरुषं साईं नमामीश्वरम् ॥

सुत्वा यं कुलदीपकं हरिहरात्मानं जगद्रक्षकम् ।
पुत्रं पुण्यतमा बभूव नितरामम्वेश्वराम्भा सती ॥
वेङ्कय्या च पिताभवत् भुवि महान् ख्यात्याश्रयः शीलवान् ।
अम्वातात-सुलालितं शिशुवरं तं स्वामिनं संश्रये ॥

संग्रामे खलु भारते नरवरं पार्थं रसं पाययन् ।
गीतार्थं श्रुतिसारजश्रुतिनुतो ग्लानिं पुरा योऽहरत् ॥
गोविन्दोऽस्ति स एव पर्तिनगरे सत्यं स्वरूपं दधत् ।
वन्दे तं जगतोऽस्य मोहहरणं साइं गुरुं केशवम् ॥

भानुर्विश्वविभासकः प्रतिदिनं गाढं तमो नाशयन् ।
नित्यं संरचते कृपार्द्रमनसा विश्राममवर्जं दिवि ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अज्ञानं हृदयस्य मोहजनितं तद्वत्सदा ध्वंसयन् ।
भक्तानां हृदयेषु यो विचरति स्वामीश्वरं नौमि तम् ॥

पूजामग्रतमां सदैव लभते यो वै गणानां पति-
र्विघ्नान् नाशयते समस्तजगतां किं स्युर्नतेऽसंख्यका: ॥
साक्षात्कान्तिपुरीश्वरोऽपि पशुपो यद्दर्शनं संशति ।
सोऽयं पुट्टपुराधिपो विजयते साईप्रभुर्विघ्नहा ॥

पार्वत्या: स्तनकुम्भजां रसमयीं पित्वा सुधां पावनीम् ।
सम्पुष्टिं लभते स्म शम्भुतनय: पञ्चेश्वर: क्रौञ्चभित् ॥
दिव्यश्रीशिवशास्त्रराशिमनुपं विस्तारयामास य: ।
देव: सोऽस्त्यधुना प्रशान्तिनिलये स्वामीश्वरं तं नुम: ॥

यासीत् शुम्भनिशुम्भदैत्यहननी विश्वात्मिका पार्वती ।
लोकेभ्य: प्रददाति मानसवलं शक्तिञ्च शारीरिकीम् ॥
सेयं भक्तहृदि स्थितान् रिपुगणान् कामादिकान् मूलतो ।
हन्तुं तिष्ठति पुट्टपर्तिनगरें तां साईदुर्गां भजे ॥

श्रीस्वामीश्वरपादपद्ममधुपो दुर्गाप्रसादोऽस्म्यहम्
नेपालात् समुपेत्य पर्तिनगरीं वावापदालंकृताम् ।
पुण्यां साइगुणान्वितां सुललितां चक्रे स्तुतिं सादरम्
श्रुत्वा तुष्यतु तां सुवाञ्छितपद: श्रीसाइवावा गुरु: ॥

ये शव्दा: खलु लोकेऽस्मिन् वर्तन्त ईशवाचका:
श्रीसत्यस्वामिनं स्तुत्वा कृतकृत्या भवन्ति ते ।
गुरुपूजान्वितां भव्यां सम्प्राप्य गुरुपूर्णिमाम्
कृत्वा स्तोत्रमिदं पुण्यमर्प्यते गुरुपादयो: ॥

साइवावाष्टकं स्तोत्रं य: पठेत् प्रेमपूर्वकम् ।
स साईसुप्रियो भूत्वा सद्यो वावापदं व्रजेत् ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

क) क्व विद्यते राष्ट्रियता समुज्ज्वला

-सहप्रा.मुकुन्दप्रसादः लामिछाने
बर्दियाजनपदीयः

वाणी विकासाय विवर्तते न वा
मनो विनाशाय विवर्द्धते न वा ।
विचारयेयुर्विवुधाः सुनिश्चलाः
क्व विद्यते राष्ट्रियता समुज्ज्वला ॥

विद्यालये वा स्वजनालयेऽथवा
मन्त्रालये वा वसनालयेऽथवा ।
नाट्यालये वा भुवनालये शुभा
क्व विद्यते राष्ट्रियता समुज्ज्वला ॥

देवालये भव्यविवाहसद्मसु
सभासु गोष्ठीषु विकासभूमिषु ।
स्वतन्त्रसामाजिकभावमञ्जुला
क्व विद्यते राष्ट्रियता समुज्ज्वला ॥

गञ्जासु नव्यासु विलासभूमिषु
भ्रूभङ्गभाषासु स्मरालयेषु वा ।
उद्यानपुष्पाकरसौरभेषु वा
क्व विद्यते राष्ट्रियता समुज्ज्वला ॥

सम्पन्नताऽऽभाति विदेशभूमिषु
विपन्नता भाति स्वदेशभूमिषु ।
गन्तुं विदेशं जनतैव चञ्चला
क्व विद्यते राष्ट्रियता समुज्ज्वला ॥

सदा सदाचारविचारपेशला
माधुर्यविश्रम्भविशेषमञ्जुला
हर्षातिरेकामृतसिञ्चिताऽमला ।
क्व विद्यते राष्ट्रियता समुज्ज्वला ॥

विपद्युता कर्मकरा कृषीवला-
स्तिरष्कृताः शिक्षितसभ्यसज्जनाः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

समृद्धिमन्तो व्यभिचारिणः खलाः
क्व विद्यते राष्ट्रियता समुज्ज्वला ॥
अवैधलाभैः परिवर्द्धिता गला
पुरस्कृतास्ते पुनरत्र तुन्दिलाः ।
दृष्टाऽत्र सर्वाधिकनूतना कला
क्व विद्यते राष्ट्रियता समुज्ज्वला ॥
कार्यक्रमो देशविदेशघातकः
कृतो जनौघो मरुभूमिचातकः ।
सन्दर्शिता राष्ट्रविनाशिनी कला
क्व विद्यते राष्ट्रियता समुज्ज्वला ॥
निधाय राष्ट्रं कवलीकृतं धनम्,
न्यासीकृता राष्ट्रियता धनाय वा ।
देशे विदेशे भुवनेऽत्र निर्मला
क्व विद्यते राष्ट्रियता समुज्ज्वला ॥
विधाय कार्याण्यतिराष्ट्रवादिभि-
र्निदर्शनान्यत्र प्रदर्शितानि नो ।
निष्ठामृते दक्षजनाश्च निष्फला
क्व विद्यते राष्ट्रियता समुज्ज्वला ॥
समाश्रितानि विपिनानि नित्यशो
विध्वंसितानि भवनानि सर्वतः ।
प्रवाहिता रक्तनदी हता नराः
क्व विद्यते राष्ट्रियता समुज्ज्वला ॥
शिक्षालयध्वंसविहीनचेतना
विद्युल्लताच्छेदनशून्यसूचनाः ।
कृताश्च ग्रामा जनता भयाकुलाः
क्व विद्यते राष्ट्रियता समुज्ज्वला ॥
वुधा दलासक्ततयाऽत्र पङ्किला-
श्छात्राश्च विद्युद्गृहदाहचञ्चलाः ।
आद्येषु विद्वत्सु नरेषु वाऽमला
क्व विद्यते राष्ट्रियता समुज्ज्वला ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ख) शान्तिप्रियो भवतु नूतनवत्सरोऽयम्

आसृष्टमङ्गलसुखो विवुधैः प्रशस्यो
विक्षिप्तविघ्नतिमिरो विमलप्रकाशः ।
जाड्यान्धकाररहितः सफलः प्रसिद्धः
शान्तिप्रियो भवतु नूतनवत्सरोऽयम् ॥१॥

आविर्भवन्निव पुनर्जनलुप्तहासः
विद्योतताां प्रतिदिशं प्रगतेः प्रकाशः ।
विभ्राजतां गुरुसुखं जनपद्मवृन्दम्,
शान्तिप्रियो भवतु नूतनवत्सरोऽयम् ॥२॥

विद्वेषिपक्षयुगलायतजन्यहीनः
सौख्याब्धिखेलनपरायणदिव्यमीनः ।
कृष्णाम्बरं भयकरं प्रविहाय नित्यम्,
शान्तिप्रियो भवतु नूतनवत्सरोऽयम् ॥३॥

भूम्यम्वरीशभरताम्वरसौम्यभाव
आविश्वमत्र परिवर्धितमर्त्यलाभः ।
सङ्गच्छतां भुवनतस्सकला तमिस्रा
शान्तिप्रियो भवतु नूतनवत्सरोऽयम् ॥४॥

विद्याप्रभावविभवैः शुभसिद्धिभिश्च
सृष्टिं विभूष्य निखिलां भुवनं प्रकाश्य ।
आगच्छताद् भुवि मनोहररामराज्यम्,
शान्तिप्रियो भवतु नूतनवत्सरोऽयम् ॥५॥

संशोध्य कल्मषकलङ्कमयान् विकारान्
संवर्द्धय मङ्गलमयान् नरदिव्यभावान् ।
सत्यव्रतो दृढतरः प्रथितोऽतिवेलम्,
शान्तिप्रियो भवतु नूतनवत्सरोऽयम् ॥६॥

लिप्साजलौघशतवाहितमित्रवर्गान्
विभ्रान्तिपङ्कपतितांश्च नरान् विपन्नान् ।
उद्धृत्य कर्मपथगान् सकलान् विधातुम्,
शान्तिप्रियो भवतु नूतनवत्सरोऽयम् ॥७॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

युद्धे हतान् नरवरान् सकलान् विबोध्य
चित्तव्रणान् समयजान् निखिलान् निरस्य ।
वैद्यो यथा भवति जीवनदोऽत्र नूनम्,
शान्तिप्रियो भवतु नूतनवत्सरोऽयम् ॥८॥

उज्जीव्य जर्जरितमानवदेहगेहान्
पान्थान् विमार्गपतितान् सततं सुरक्ष्य ।
विस्थाप्य दोषनिवहान् वसुधेव नित्यम्
शान्तिप्रियो भवतु नूतनवत्सरोऽयम् ॥९॥

नद्यास्तटं भवतु दूष्यमलैर्विहीनम्,
रम्यं वनं सुविपुलं विगतान्तरायम् ।
शान्तं यथा भवति तद्वदनल्पभद्रः
शान्तिप्रियो भवति नूतनवत्सरोऽयम् ॥१०॥

दावानलप्रशमनाम्वुधरेण तुल्यो
दुर्भिक्षदुःखदमनादिगुणैरतुल्यः ।
सद्भावसौख्यधनवृष्टिभिरत्र नूनम्,
शान्तिप्रियो भवतु नूतनवत्सरोऽयम् ॥११॥

आयोधनाच्च मनुजा विमुखा भवन्तु
कर्तव्ययज्ञनिरताः सकला लसन्तु ।
विद्राव्य पापकलुषान् दिवसाँश्च नित्यम्,
शान्तिप्रियो भवतु नूतनवत्सरोऽयम् ॥१२॥

विद्याधनाः सुमतयो युवका भवन्तु
शीलान्विता युवतयः परितो रमन्ताम् ।
स्वाभाविकेन चरितेन खलान् विभिन्दन्
शान्तिप्रियो भवतु नूतनवत्सरोऽयम् ॥१३॥

सन्नायिकेव लसताच्छुभशान्तिरत्र
सन्नायके लसतु नूतनवत्सरश्च ।
सम्प्रार्थयेऽत्र भगवन् ! जगदीश ! नित्यम्,
शान्तिप्रियो भवतु नूतनवत्सरोऽयम् ॥१४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

क) मयोक्तमाचर

-प्राज्ञो ज्ञानमणिर्नेपालः
भोजपुरजनपदीयः

न जन्मभूमिं प्रति भक्तिरस्ति
न देशवासिन्युपकारचिन्ता ।
न लोककल्याणविधौ विधित्सा
न देशसंमृद्धिविधौ दृढेच्छा ॥

मुखे च मधुरा वाणी कल्पनाजालजृम्भिता ।
आकाशकुसुमाऽभासाऽऽशातन्तून् तनुतेतराम् ॥
आशात्रासप्रदैर्वाक्यैर्दुःखमेव प्रदीयते ।
दुःखेन पीडितैर्लोकैर्दैन्यमेवाऽनुभूयते ॥

न परीक्षणशक्तिरर्जिता
न च विज्ञानविवेकजा मतिः ।
न च निर्णयशक्तिसाहसः
स जनो वै परिभूयते परैः ॥

वञ्चितः स्वार्थकार्यैर्य आशापाशैर्नियन्त्रितः ।
किङ्कर्तव्यविमूढोऽसौ दीनो दैन्येन दूयते ॥
भाषणे कुशलाः सर्वे उपदेशे च पण्डिताः
मत्कृतं नाऽनुकार्यं ते **मयोक्तं सर्वमाचर** ॥

ख) सत्यस्य पिहितं मुखम्

प्रत्यक्षं दृश्यते दृश्यं मनोहारि तथाऽद्भुतम्
सत्यं वाऽनृतमेवापि कुरुते च कुतूहलम् ॥१॥
प्रख्याप्यमानं वहुधाऽसत्यं सत्यं प्रतीयते ।
अन्तर्निहितमव्यक्तं वस्तु तथ्यं च न स्फुटम् ॥२॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

बहिः प्रख्याप्यते यच्च तर्हि लोकेषु विश्रुतम् ।
कामं गच्छतु लोकोऽयं तूष्णीं विश्वासमश्नुते ॥३॥
हिरण्मयेन पात्रेण सत्यस्य पिहितं मुखम्,
तेन लोकेऽनृतकथा वृथा विस्तारमेति हि ॥४॥
लोभामर्षाभिभूतानां कामोपहतचेतसाम् ।
घोरसाहसिके कार्ये मिथ्याख्यानं सहायकम् ॥५॥
कार्येषूत्पद्यमानेषु सम्पन्नेषु च भूरिशः।
कारणानि भवन्तीह बाह्याभ्यन्तरजानि च ॥६॥
वाह्यं तु कारणं सर्वैर्ज्ञायते स्फुटमेव तत् ।
आभ्यन्तरमविज्ञेयमन्तर्गूढं यतः स्थितम् ॥७॥
अतोऽसत्यकथा लोके प्रचारं बहुधाऽऽप्नुते ।
अद्भुताऽऽपातरम्या च सा हि कौतुककारिणी ॥८॥
पृथग्जनेषु प्रख्याता सर्वलोकाय रोचते ।
मिथ्याचारो हि लोकेऽस्मिन् सर्वतो व्याप्य तिष्ठति ॥९॥
प्रख्याप्यमाने च पुनस्तत्प्रभावः समेधते ।
यथा तुषाग्निर्निर्वायुः सरलो नैव विद्यते ॥१०॥
यथा चिकित्सको रोगनिदानं न निरीक्षते ॥
स निवारयितुं व्याधीनुपचारान्न शक्नुते ॥११॥
यथा ज्यौतिषिको मूलदशामात्रं निरीक्ष्य च ।
अन्तर्दशामविज्ञाय फलं वक्तुं स चाऽक्षमः ॥१२॥
तथा विपश्चिद् यः कश्चिन्निदानं कार्यहेतुकम् ।
वीजभूतं न जानीते सत्यं ज्ञातुं स नार्हति ॥१३॥
इत्थं गुहानिहितसत्यनिदानभूते
ज्ञानेऽवरुद्धमतिरावरणैस्तु बाह्यैः ।
स्वार्थान्धदृष्टिभिरसद्गुणवद्भिरेवं ।
विभ्राम्यते हि हतकैः सुमतिश्च लोकः ॥१४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कथं सुखे स्यान्मम मातृभूमिः ?

-यदुः पन्थी (उपसचिवः)
गुल्मीजनपदीयः

ग्रामाः सर्वे तरुणरहिता ऊर्वरा क्षीणशक्ति
भूमीपुत्राः सकलकृषकाः कर्षणे खिन्नचित्ताः ।
गेहे गेहे मनुजहृदये लुण्ठ्यते धर्मराशिः
श्रद्धा शान्तिर्विलपति कथं हर्षिता स्याद्धरित्री ॥१॥

चिन्ताऽस्माकं चलति मनसि लक्ष्यमाप्नोति छात्रः ?
शङ्का ह्येषा प्रचलति कथं रक्षणीयः स्वदेशः ?
मार्गे याताः सरलपथिकाः किं गृहं प्राप्नुवन्ति ?
बालाः किं वा नगरपथगाः स्थूलगर्ते पतन्ति ॥२॥

स्मृत्वा पुत्रान् तनयरहिता मातरस्ता निशासु
उष्णोच्छ्वासान् विरहसहितान् मुञ्चयन्त्यो मरुत्सु ।
जीर्णाः शीर्णाः शिथिलदशना ह्यश्रुभिः सिञ्च्यमानाः
सर्वा रात्र्यो युगपरिमिता यापयन्ते रुदत्यः ॥३॥

केचिद् युद्धे रुधिरगलितां मृत्तिकां लेप्यमानाः
केचिद् दूराद्रुधिरलिखिताः पत्रिकाः पठ्यमानाः ।
पथ्यां काँश्चिच्छिशुगणवरान् उच्चविस्फोट्यमानान्
दृष्ट्वा सर्वे दुःखितमनसः सन्ति ह्युल्लासहीनाः ॥४॥

स्तब्धा ग्रामा गलितप्रतिभाः शून्य-विद्यालयाश्च
पूजाहीना बहुसमयतोऽनाथदेवालयाश्च ।
दृष्ट्वाऽस्माकं दुखितहृदयं छिद्यते भिद्यते च
भाग्यादस्मन्मनुजहतकैर्नाश्यते च स्वदेशः ॥५॥

स्निग्धा क्लिन्ना रुदति विधवा षोडशी क्लान्तदेहा
दीना हीना स्वजनरहिता ग्लानमुद्रा निरीहा ।
बालाः सर्वे जनकरहिताः सन्ति संरक्षणीया
इत्थं दृष्ट्वा प्रसरति कथं मानवो ध्वंसनेऽपि ॥६॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

एका भूमी सकलमनुजाः सन्ति पुत्रा हि तस्याः
ज्ञाने योग्यास्तरुणप्रतिभाध्वंसने संलगन्ति ।
नेपालस्य ह्यखिलजनता बान्धवा स्मो वयं त्वम्,
किं किं जातं रिपुरिव कथं याम को वेत्ति सत्यम् ? ॥७॥

तेजोयुक्तास्तरुणितरुणा यत्र ध्वंसे लगन्ति
नेतारस्तु प्रतिपल-धनं सञ्चयन्तो भ्रमन्ति ।
छात्राः सर्वे पठनविमुखा ध्वंसने दत्तचित्ताः
कस्माद्राष्ट्रं विकसति च नो यत्र सर्गस्तु नास्ति ॥८॥

कस्मात् कालः प्रपतति सखे वन्दुकेभ्यो ह्यसिभ्यः
कुत्रास्ते ? वा प्रचलति कथं ? मानवानां करेभ्यः ? ।
विध्वंस्यन्ते सरलजनता यत्र कुत्रापि, देशे
दीर्घा शान्ति र्लसति च कथं ? नास्ति सौख्यं स्वदेशे ॥९॥

धर्मध्वंशी विहरति युवा मन्दिरं संविपाट्य
वेदाँश्छित्वा प्रहसति सदा मानवान् संप्रताड्य ।
पूज्यान्मान्यानपि प्रतिदिनं पीडयन् रोषयुक्तः
साट्टाहासैः वहुविलसितो नृत्यति ध्वंसने च ॥१०॥

पीड्यन्ते ते सकलगुरवो देवभाषासुविज्ञाः,
संस्काराश्च प्रतिपलमपि संह्रसन्ते ह्यवज्ञाः ।
लुण्ठ्यन्ते ता नगरपथिषु स्वगृहे वा युवत्यो,
विध्वंस्यन्ते निखिलप्रतिभा उच्चतां यात्यसत्यम् ॥११॥

मर्त्यास्त्रस्ता भयविलुठिता वायवो वान्ति नित्यम् ।
नद्यो रक्ता रुधिरसहिता शून्यतोया वहन्ति ।
उत्पाद्यन्ते प्रतिवलवमाः मानवानां विनाशे
शान्तेर्धारा प्रवहति कथं ह्यद्य नेपालदेशे ? ॥१२॥

रुदन्ति रात्र्यो दिवसा रुदन्ति आकाशदिग्वायुप्रभा रुदन्ति ।
वन्याश्च ग्राम्याः पशवो रुदन्ति कथं निरुक् स्यान्मम मातृभूमिः ॥१३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शान्तिप्रयासः

- प्रा. गोपीकृष्णशर्मा
पाल्पाजनपदीयः

इतिहासपुराणेषु नेपाल इति विश्रुतम् ।
धनधान्येन सम्पृक्तो देशो हैमाद्रिसंयुतः ॥
सीताया भृकुटीदेव्या राज्ञो वै जनकस्य च ।
इयं भूमिः सदा धन्या शान्तरूपा सुसंस्कृता ॥१॥

सदाचाररताः सभ्या यत्र तिष्ठन्ति मानवाः ।
शान्तिप्रिया वरेण्याश्च परार्थसाधने रताः ॥
अधुना केन मार्गेण स देशोऽशान्तितां गतः ।
परस्परं भिद्यमाना जना दुर्नियतिं गताः ॥२॥

इतिहासाच्च सम्प्राप्तां सभ्यतामनुसृत्य च ।
सर्वैः सम्भूय शान्त्यर्थं कुर्मो देशसमुन्नतिम् ॥३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्राणदाता मुरारिः

-रमेशः खकुरेल
काष्ठमण्डपजनपदीयः

भाराक्रान्ता भूरियं क्रन्दतीव
विष्णो त्रायस्वेति चिन्तातुरेव ।
श्रुत्वा तस्याः क्रन्दनं विष्णुनैव
सृष्टो मन्ये वावुरामाख्य एषः ॥

जातो भ्राता तत्सखाऽयं प्रचण्ड-
श्चण्डः क्रूरः कोपनस्तीक्ष्णदण्डः ।
हिंसाकार्यं सौख्यमापद्यते सः
वाधायै च धर्मपूजादिकञ्च ॥

चण्डो मुण्डो वा मधुः कैटभो वा
शुम्भो जातः स्यान्न शुम्भेन किं वा ।
मन्ये कुम्भोऽयं निकुम्भेन युक्तः
किं वा साक्षाद्रावणः कुम्भकर्णः ॥

एतौ दैत्यौ दैत्यसेनासमेतौ
हिंसाकार्ये सज्जनानामुपेतौ ।
वह्निं दत्वा पुस्तकं दाहयन्ति
भित्वा भङ्त्वा मन्दिरं नाशयन्ति ।

छात्रावासे वापि विद्यालये वा
विद्यादानं रोचते नैव तेभ्यः
मिष्टान्मिष्टां संस्कृतां देववाणीम्
न्यक्कृत्यैव शिक्षकान् वाधयन्ते ॥

नैषा गाथा नूनमद्यैव जाता
काले काले दुःकथा सम्प्रजाता
सत्ये त्रेतायां तथा द्वापरे च
धर्मद्वेषे रावणाद्याः प्रवृत्ताः ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

धर्मो जेता नात्र सन्देहलेशः
पापिष्ठानां निश्चयं नाश इष्टः ।
नूनं ध्येयस्त्राणदाता मुरारि-
र्दुष्टानां वै यो हि संहारकारी ॥

कथम्

-प्रा. हरिप्रसादशर्मा आचार्यः
प्रतिष्ठानपुरजनपदीयः

कथं पृथ्वीनारायण- समयतो राष्ट्रमुदगात् ?
कथं तत् पुष्टाङ्गं सवितति बहादूर-समये ।
सुगौली- सन्ध्याख्ये न्यपतदवटे तद्वत ! कथं ?
कथं पञ्चास्याभो व्यपददपि राजेन्द्रनृपतिः ? ॥१॥

महेन्द्रस्योदित्यां भुवन- विदिताभं कथमभूत् ?
कथं शान्तिक्षेत्रं भवितुमपवैरं स्म यतते?
समार्थीदं राष्ट्रैः कथमु रसरुद्रै (११६) रपि कथं ?
निरस्ता माहेन्द्री जनपरिवृता राष्ट्रसरणिः ? ॥२॥

ज्वलद् - भीमातङ्कं प्रखरनरसंहारमधुना
तदेवेदं राष्ट्रं कथमिति विपत्क्षेत्रमिव ? हा !
विवक्तावत्रोन्नत्यवनतिनिदाने ध्रुवमलम्,
सितं कृष्णं तत्तत्समयक- समाजाग्र्य- चरिते ॥३॥

अतोऽधुना देश- समाज- सेवा- सज्जैः समाजेऽभ्युदयैकलक्ष्यैः ।
महामहिम्नो महनीयकीर्ते र्महोपदेशोऽनुपमोऽवधेयः ॥४॥

"तदेव युक्तं यदहं ब्रवीमि परे तु देशद्रुह एव सर्वे ।
नूनं प्रजातन्त्रमिति स्वभावात् फलेग्रहि स्यान्न कदाचनेति ॥"५

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मनोनिरीक्षणम्

-प्रा.घनश्यामः कँडेल
धादिङजनपदीयः

किमिदं, कीदृशं, केन मे मनोऽस्ति प्रचालितम् ।
शक्नोति स्वेच्छया द्रष्टुं जगत्सर्वमिदङ् कथम् ?
कथमस्यैव सङ्केते सक्रियाणीन्द्रियाणि च ।
स्थिते मनसि विश्वञ्च प्रतिभाति कथं स्थितम् ॥

अस्यैव दर्पणे सृष्टिर्दृश्यते प्रतिबिम्विता ।
स्वस्थे मनसि स्वस्थं स्यात् रुग्णे रुग्णं भवेत् सदा ॥
अनेनैव कथंप्राप्ता वायोर्द्रुततरा गतिः ।
क्षणमात्रञ्च कुत्रापि कथमेतन्न तिष्ठति ॥

किमुद्दण्डो हयोऽस्त्येतद् धावति योऽनियन्त्रितः ।
पातितस्स्यां कदानेन सदाऽहमिति चिन्तितः ।
अस्ति मर्कटवत् किं वा मनो निःसर्गचञ्चलम् ।
सशङ्कोऽहं कदा कुर्यात् किमुत्पातमकल्पितम् ॥

बन्धनन्न मया दृष्टं येन वद्धमिदं भवेत् ।
न पौरुषं मया दृष्टं मनो यस्य वशं व्रजेत् ॥
न च दृष्टं जलं येन शक्यं प्रक्षालितं भवेत् ।
निर्मलं स्यान्मनो येन साधनं नास्ति किञ्चन ॥

सद्यः प्रसन्नतां याति सद्यो भवति दुःखितम् ।
कः शक्नोत्यनुमातुं किङ् कदा स्यात्परिवर्तनम् ॥
कथं सुस्थिरतां यायात् विश्रान्तिमाप्नुयात्कथम् ।
मनो भवेत् कथं स्वस्थं स्वस्मिन्नेव कथं स्थितम् ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कुत्र विद्यालयः कुत्र गुरुर्योग्यतमो भवेत् ।
मनो विकृतितो मुक्त्यै शिक्षकः संस्कृतो भवेत् ॥
रागद्वेषादिभिर्मुक्तस्तृष्णात्रासादिवर्जितः ।
झञ्झावातेऽपि स्वस्थाने शैलवत् सुस्थिरो भवेत् ॥

सम्यगष्टाङ्गमार्गेषु श्रुतङ् गच्छति यो जनः ।
योगैः समाधि-प्रज्ञाभि र्यो बध्नाति सदा मनः ॥
वशवर्त्ति सदैव स्यात् तस्यैव वीतरागिणः ।
सचेतसो मनो येन निष्पृहेण निरीक्षितम् ॥

सुवर्णखालः

- गणेशपाण्डेयः 'वल्कल'
अर्घाखाँचीजनपदीयः

यत्रत्या मृत्तिका मे तनुजननविधौ हेतुभूता सुगन्धा,
पानीयं स्वादु पेयं गिरिशिखरझरात्स्यन्दमानं सुधाक्तम् ।
वायुर्यत्रानुकूलः प्रसरति सततं जीवयन् म्लानमङ्गम्,
पुण्यव्यूहेन लभ्यो गुणगणमहितश्चास्ति सौवर्णखालः ॥१॥

उत्सङ्गे पर्वतस्य क्षपितकलिमले तत्र पुण्यैकदेशे,
क्षेत्रे कुल्याभिषिक्ते हरिततरुलताकुञ्जमध्ये मनोज्ञे ।
विख्याते 'धर्तिसारा' इति जनगदिते बालकृष्णो द्विजेन्द्रः,
सम्प्राप्तो धातिवाङात् परिजनसहितः प्रार्थ्यमानोऽग्रगण्यैः ॥२॥

यो देधे शुभ्रवस्त्रे चरणयुगलके पादुके काष्ठबद्धे,
भाले शुभ्रं त्रिपुण्ड्रं रजतनियमितां कण्ठदेशेऽक्षमालाम् ।
स्वल्पोच्चः क्षिप्रगामी स्मितिमयवदनः स्थूलभालः सुनेत्रः,
शाकाहारी यतात्मा श्रुतिविहितपथालम्बनो भव्यमूर्तिः ॥३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तस्य प्रज्ञावतः षड्गुणगणमहिताः सूनवः सत्यनिष्ठाः
जातास्तेषु द्वितीयः श्रुतिधरपदवीमण्डितः पारदृश्वा ।
ज्ञाता षड्दर्शनानां प्रवचननिपुणः, साधनापूतदेह-
स्तुल्यः श्रीमान् मुनीन्द्रैरनुपमधिषणः सिद्धवाक्सिद्धिनाथः ॥४॥

विद्याऽभ्यासे गुरूणामतिशयितगुणैः स्नेहपात्रं विनीतो
वृन्दारण्ये शुकाख्याद् वुधमुखकमलाद् योऽग्रहीच्छौकशास्त्रम् ।
तेजस्वी शास्त्रदृष्टिः सकलबुधगणैर्वन्दितस्त्यक्तगर्वो,
गेहे तिष्ठन् तपस्याधनजपनिरतः कोविदः सिद्धिनाथः ॥५॥

तेजोवत् वाक्प्रकाशं तिमिरनिकरविध्वंसने सूर्यकल्पम्
यस्मिन्नित्यं विकीर्योदयगिरिसमतां यच्छति स्वैः सुकृत्यैः ।
सम्वद्धस्तस्य लोकप्रथितसुयशसोऽभिख्यया योऽस्ति रम्यो
ग्रामः सौवर्णखालः सकलजनिमतां गौरवस्थानभूतः ॥६॥

नेतारो यत्र जाताः समधिकगुणिनस्तेषु पीताम्बरोऽग्र्यः
शालिग्रामश्च तारापतिरिरिति गदितं बद्धकक्षो विकासे ।
यत्रस्था विश्ववन्द्या सकलहितकरी कालिकाख्या पराम्वा
रक्षन्ती सर्वलोकं धनसुखबलदा दाशते मङ्गलौघम् ॥७॥

सिञ्चन्त्यो यत्र भूमिं गिरिसरिदुदकैः स्थूलकुल्या त्यजन्ति
धान्यैरामोदवन्तः प्रचुरफलयुता वड्रवप्रा विभान्ति ।
पालाशं सर्वदिक्षु प्रसृतमपि महत्काननं दक्षिणस्ता-
च्चूरे तिष्ठत्युदीच्यामतिविपुलमहाभारताख्यो महीध्रः ॥८॥

सेयं मे मातृभूमिर्हृदयविगलितां स्नेहधारां वहन्ती
पुत्रं दूरे वसन्तं तरलितमनसा संस्मरन्त्याह्वयन्ती ।
ध्वानैस्स्निग्धैर्गभीरैर्गिरिसरिदुदितैश्चित्तमामोदयन्ती,
मातस्त्वं प्रेरयन्ती हृदयमधिगता राजसे सर्वदा मे ॥९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कविता

-प्रह्लादः पोखेल
भोजपुरजनपदीयः

वहमाना सरिदिव नो चेत् सा कविता किमु ।
मलिनायां पुष्करिण्यां तरिसञ्चालनात् किमु ?
न भ्राजते सवितृवत्तया कवितया किमु ?
गगने तिमिराच्छन्ने पतङ्गचालनात् किमु ?

॥१॥

उदात्तं मृदुभावत्वं भवेत् सहनशीलताम्
वहमानं सुजीवनं काव्यं जीवनमाचरेत् ।
शव्दवाक्येषु पीयूषसागरोऽपि प्रवर्त्तयेत् ।

॥२॥

पुष्येत् यत्र प्रेमसत्यं सौन्दर्यं मन्दमावहेत्
शङ्का मन्दा भवेद्यत्राऽऽतङ्कगन्धोऽपि नो वहेत्
कठोरता न चायातुच्छन्दो माधुर्यमावहेत् ।

॥३॥

कविता कवितेवेह स्वहस्ते चेन्न सा कथम्
कुरूपा पदगुच्छाद्या गले माला प्रधार्यते ?
कविता कवितातुल्या लिख्यते चेन्न सा कथम्
शव्दराशिं विलिख्येह हीनमर्थं प्रकुर्वते ?

॥४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

संस्कृतं संस्कृतेर्मूलम्

-प्रा. डा. राचन्द्रगौतमः
धादिङजनपदीयः

भूपालपालितो नित्यं पशुपत्यभिरक्षितः ।
फलौषधादिभी रम्यो हिमशैलसुशोभितः ॥१॥
वन-दुर्ग-लता-कुञ्ज-कन्दरादिमनोहरः ।
वहन्तीनां विशुद्धानां नदीनां वारिसिञ्चितः ॥२॥
ऋषीणां मन्त्रद्रष्टृणां तपोभूरिति विश्रुतः ।
यज्ञीय इति विख्यातः कृष्णसारमयान्वितः ॥३॥
देव-देवीसमायुक्तः पुण्यतीर्थविभूषितः ।
शान्तिदः सुखदः श्रौत-स्मार्तकृत्येन निर्मलः ॥४॥
नेपालोऽयं सुविख्यातो वर्ण-जातिसुशोभितः ।
निषेकादिस्मशानान्ताः संस्काराः शास्त्रसम्मताः ॥५॥
दुर्गोत्सवो रामपूजा कृष्णजन्माष्टमीव्रतम् ।
लक्ष्मीपूजा शिवपूजा ऋषिपूजा विशेषतः ॥६॥
कृच्छ्रादिकं व्रतं दानं पर्वाणि विविधानि च ।
यागादिविविधं कर्म पितृणां श्राद्धतर्पणम् ॥७॥
बुद्धजयन्तिकेत्यादि लोसारपर्व कथ्यते ।
एतादृश्यः संस्कृतयः पारम्पर्यक्रमागताः ॥८॥
समादृताः प्रचलिता देशेऽस्मिन् सन्ति रक्षिताः ।
पूर्वोक्तासु समेतासु बहवो वेदनिःसृताः ॥९॥
वेदः संस्कृतरूपत्वात् तस्मान्निर्गतसंस्कृतेः ।
मूलं संस्कृतमित्याहुः संस्कृतिज्ञा मनीषिणः ॥१०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

क) तत्र देशस्य का दशा

-प्रा.डा. ऋषिरामः पोखरेल
काष्ठमण्डपजनपदीयः

स्व-स्वनेतृत्वलाभाय जातिभाषाविभाजने ।
राष्ट्रं विभज्यते तत्र प्रदेशस्य तु का दशा ॥
सहास्तित्वं मानवता श्रद्धा धर्मश्च संस्कृतिः ।
यस्मात्तान्येव निन्दन्ति तत्र देशस्य का दशा ॥
संविधानसभासत्सु सभ्यता दूरदर्शिता ।
नास्ति काचित् शुभा दृष्टिस्तत्र देशस्य का दशा ॥
उत्कोच-दलचन्दादिपीडिता व्यवसायिनः ।
व्यापारिणो जनाः सर्वे तत्र देशस्य का दशा ॥
दलपक्ष-विपक्षस्य कर्मचारिसमाकुलाः ।
कार्यालयाः सन्ति यत्र तत्र देशस्य का दशा ॥
लाभांशचित्ताः सचिवास्तच्छिष्टाः कर्मचारिणः।
दलस्वार्था मन्त्रिवर्यास्तत्र देशस्य का दशा ॥
यत्र नद्यो नित्यवहाः प्रभूतं जलजं धनम् ।
तृपार्ता जनतास्तस्य तस्य देशस्य का दशा ॥
वनं राष्ट्रधनं यत्र धूर्त-तस्कर-दावकैः ।
संक्षीयते प्रतिदिनं तस्य देशस्य का दशा ॥
विद्वांसो नैव पूज्यन्ते चाटुकाराः प्रपूजिताः ।
असंस्कृताश्च नेतारस्तत्र देशस्य का दशा ॥
तीक्ष्णशस्त्रास्त्रपाणीनां नेतॄणां यत्र गर्जनम् ।
अपराधः प्रतिदिनं तत्र देशस्य का दशा ॥
आवासो भोजनं वृत्तिर्निवृत्तिभरणं यतः ।
कृतघ्नास्तं विनिन्दन्ति तत्र देशस्य का दशा ॥
सज्जना यत्र सीदन्ति प्रसीदन्ति तु दुर्जनाः ।
न्यायाधीशाः पक्षधरास्तस्य देशस्य का दशा ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

आयुर्वेदं निराकृत्य फलमूलौषधद्रुमाः ।
यत्र काकिणिविक्रेयास्तत्र देशस्य का दशा ॥
प्रमाणपत्रमात्रेण यत्र शिक्षितमान्यता ।
चाटुता पूज्यते यत्र तत्र देशस्य का दशा ॥

स्वधर्मकर्मसंस्कारहीनाः शिक्षापुरस्कृताः ।
स्वमस्तित्वं न जानन्ति तत्र देशस्य का दशा ॥
नग्नप्राया युवतयो युवानो मदमोहिताः ।
प्रायो दुर्व्यसनासक्तास् तत्र देशस्य का दशा ॥

असंस्कृतान् संस्करोति दीनान् पुष्णाति संस्कृतान् ।
किन्तु स्थानं न तस्यास्ति तत्र देशस्य का दशा ॥
विरोधिनः पत्रकारा लेखकाश्च दिने दिने ।
हीयन्तेऽथ च वध्यन्ते तत्र देशस्य का दशा ॥

इत्येताभिस्तु पीडाभिर्व्यथितो नितरां सदा ।
राहुग्रस्तो यत्र देशस्तत्रत्यस्य च का दशा ॥
धन्यः पशुपतिः पाति सर्वा यत्र प्रजाः सदा ।
यत्रान्नपूर्णा रमते तस्य देशस्य का व्यथा ॥

ख) नेतृवर्गान् प्रति

१ उपक्रमः

भवन्तो "जनतानां हि सेवार्थं वयमर्पिताः।
कारागारनिवासादिकष्टैरत्यन्तकर्षिताः ॥१॥
धनयौवन-सम्पत्ति-परिवार-सुखादिकम् ।
सर्वं विहाय राष्ट्रस्य समुन्नत्यै धृतव्रताः" ॥२॥

इति मधुरभाषाभिश्छद्मभिः सर्वदा जनान् ।
प्रलोभयन्तो नितरां वञ्चयन्तीव लक्ष्यते ॥३॥
तस्मात् केचिदिह प्रश्नाः स्थाप्यन्ते भवतां पुरः ।
तेषामुत्तरदानेन लोकशङ्कां हरन्तु नः ॥४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

निर्वाचितास्तथा केचिद् भवन्तो जन्मतोऽधिकाः ।
शस्त्रास्त्रजनबाहुल्यात् भगवानिव संस्थिताः ॥५॥

२ प्रश्नाः

यदि सेवैव राष्ट्रस्य व्रतं नित्यं भवेत् तदा ।
विहाय लोककल्याणं त्यक्त्वा च राष्ट्रसेवनम् ॥६॥
आशां वलवतीं दत्वा प्रतार्य च निरन्तरम् ।
एतावत्कालपर्यन्तं किङ्कृतं प्रब्रुवन्तु नः ॥७॥
बलं छलं समादाय व्ययं कृत्वा पुनः पुनः ।
निर्वाचने स्वविजयं कस्मादिच्छथ ब्रूत भो ॥८॥
यदि सेवैव कर्तव्या जनतायास्तदा कुतः ।
तत्तत् क्षेत्रविकासाय तद्धनं नार्पितं स्वयम् ॥९॥

अद्य यावद् वहुधनं सञ्चितं तव वर्तते ।
तर्हि दत्वा तद्धनेन विकासः किं न जायते ॥१०॥
जन्मस्थान-ग्राम-सेवा राष्ट्र-सेवा स्फुटा तदा
जायते नैव किं लोकः स्वतो युष्मान् वरिष्यति ॥११॥
इति सामान्यबुद्ध्यापि विचारो नात्र किं कृतः ।
यद्वा निर्वाचने यावद् व्ययितं स्वधनं हि तत् ॥१२॥
सहस्रगुणमादातुं वलान्निर्वाचनं जितम् ।
इत्यादिवहुशः प्रश्नाः सन्ति तत्रोत्तरं हि किम् ॥१३॥

हर्म्याणि सन्ति युष्माकं भूषणं हीरकं बहु ।
सर्वापि स्फाटिकी भित्तिः किं रात्रौ वर्षितं धनम् ? ॥१४॥
यानानि चाप्यनेकानि वस्त्राणि साधनानि च ।
कथं दुहन्ति नेतारो राजनीतिरपस्पशा ॥१५॥
श्रीखण्डखदिरादीनि विक्रीतानि च मूर्त्तयः ।
क्व गतं तद्धनं राजनेतारो ब्रूत सम्प्रति ॥१६॥
अनेके निर्धनाः सन्ति सन्त्यनेके च रोगिणः ।
दुर्गमाः सन्ति पन्थानो ग्रामा वसतयो वहु ॥१७॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सन्ति नद्यो दुस्तराश्च सेतवस्तत्र नार्पिताः ।
अशिक्षिता जनाः सन्ति नैव सन्ति च शिक्षकाः ॥१८॥
व्यापारिणः प्रतिदिनं मूल्यं संवर्धयन्ति च ।
कथं जीवन्ति जनता उत्तरं कुत्र वर्तते ? ॥१९॥

उद्योगव्यवसायाश्च न सन्ति वृत्तिदा नृणाम् ।
औषधानि च मूलानि सन्ति राष्ट्रे समन्ततः ॥२०॥
एकतो जलपानाय जलं नास्ति ततोऽन्यतो
नद्यः प्रभूतजलदा वहन्ति गिरिशेखरात् ॥२१॥

क्व तत्र चिन्ता भवतामस्ति राष्ट्रस्य भण्यताम् ।
कार्यं किं किं स्वराष्ट्रस्य समुन्नत्यै कृतं कदा ॥२२॥
दिगम्वरा सन्त्यनेके सन्त्यनेके निराश्रयाः ।
शिक्षकै रहिताः सन्ति कति विद्यालया इह ॥२३॥

पाठ्यपुस्तकहीनाश्च वेषहीनाश्च बालकाः ।
कस्मान्न व्ययितं तेषां हितायात्तं धनं हि वः ॥२४॥
समाजराष्ट्रकल्याणनाम्ना राष्ट्रस्य शोषणम् ।
लोकप्रतारणं कृत्वा धनं कति समर्जितम् ॥२५॥

विदेशयात्रयाऽप्राप्तं कतिवारं धनं कियत् ।
गृहाः कति कलत्राणि कति गोपायितं धनम् ॥२६॥
जनतायाः कृते यद्वा राष्ट्रोन्नत्यै धनार्जनम् ।
कृतं तर्हि जनस्थानिविकासः कुत्र वा कृतः ॥२७॥

यदि सेवार्थमेवात्तं धनं तस्करकर्मणा ।
सेतुप्रपाराममार्गाः के के विद्यालयाः कृताः ॥२८॥
सुसम्पन्नाः कथमिह भवन्तो धनिनः कथं
पितरो निर्धना दृष्टाः सामान्याः श्वशुरा अपि ॥२९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

व्यापारिभ्यो जनेभ्यश्च कर्मचारिभ्य एव च ।
बलाद् भीत्या च संगृह्य सञ्चितं क्व गतं धनम् ॥३०॥
शिक्षकेभ्यस्तथान्येभ्यो हरणैस्तर्जनैरपि ।
कर्मैषणाप्रसङ्गेन प्राप्तं कति धनं वहु ॥२९॥

गृहीतं कति तत्काले विदेशे निहितञ्च किम् ?
नाम्नि पत्न्याः सेवकानां प्रमाणं वास्ति रक्षितम् ॥३२॥
भृति-यात्रा-समारोह-गोष्ठीनाम्ना कृतो व्ययः ।
भन्सारोद्योगव्यापारिविक्रये च क्रयेऽपि च ॥३३॥

यद्यत्कवलितं वित्तं तस्य का गणना भवेत् ।
उद्योगोत्पादने शिक्षायातायातादिकर्मसु ॥३४॥
लोकानामेव भूत्यर्थं करसंग्रहणं कृतम् ।
कुत्र तद् व्ययितं क्वास्ते विदेशादागतं धनम् ॥३५॥

तत्र तत्र विक्रीतानां योजनानां धनं कियत् ।
आत्मीयाः स्वजनाश्चैव नियुक्ताः कुत्र के च ते ? ॥३६॥
केषां क्रमश्च मर्यादा छिन्नौ के के च वञ्चिताः ।
किमुत्तरं दीयतेऽत्र के जना घातिता त्वमा ॥३७॥

इत्यादिवहवः प्रश्ना भवतां पुरतः स्थिताः ।
प्रमाणानि नाशितानि दीयतां स्वयमुत्तरम् ॥३८॥
पाठकैश्च विचार्यन्तां नेतारो यदि बौद्धिकाः ।
आत्मनैतिकतायुक्ताश्चोत्तराणि ब्रुवन्तु नः ॥३९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

क) इतो नव्यं किमीहसे

-प्रा. विष्णुप्रसादशर्मा देवकोटा
गोरखाजनपदीयः ।

कविगोष्ठीं गरिष्ठानामधिष्ठाय सुमेधसाम् ।
काव्यानि स्वदमानोऽस्मि सरसानि मधूनि च ॥
कविताकरणे तद्वत् क्षमतात्र न वर्तते ।
अथापि प्रयते धृष्टः प्रणमन् संस्कृतां गिरम् ॥
भवत्काव्यसुधापाने तल्लीना भ्रमरायिताः ।
न्यक्करिष्यन्ति मत्काव्यमिति मे निश्चया मतिः ॥
अथापि विकृतिं दृष्ट्वा देशजां व्यथते मनः ।
तन्मां नुदति तद्व्यक्त्यै कविकर्मणि सालसम् ॥

नवनेपालदेशेऽस्मिन् सर्वं नव्यमवेहि भो
बम्बविस्फोटनं नव्यं मारणं वञ्चनं तथा ॥
जनसेवासु तल्लीनद्राक्तराद्यपनायनम् ।
सुलभाः नवनेपाले इतो नव्यं किमीहसे ॥
बालापहरणं नित्यं रूप्यकार्थं विनिन्दितम् ।
पित्रोरुत्पीडनञ्चैव किं नृशंस्यमितोऽधिकम् ॥
संविधानाविधानेऽपि कृतकार्याः सभासदः ।
स्वावधिं वर्धमानाश्च न लज्जन्ते कदाचन ॥

सीमातिक्रमणे देशे दृश्यमानेऽपि मन्त्रिभिः ।
नैवातिक्रमणञ्चेति दूतं प्रोत्साहयन्ति ते ॥
आत्मसम्मानदारिद्र्यं स्वाभिमानविवर्जितम् ।
वर्धमानन्तु देशेऽस्मिन् नव्यमस्मात् किमीहसे ॥
महर्घतायष्टिकया ताड्यमानान् जनानपि ।
नेक्षते सर्वकारोऽयं सत्तारक्षणलम्पटः ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्रमं द्रव्यं व्ययीकृत्य पठितारः सुधीजनाः ।
अप्राप्य सेवावसरं विदेशं यान्ति वाधिताः ॥

हानिरेवास्य देशस्य प्रतिभासम्पलायंनम् ।
नवनेपालकादस्माद् अधिका कात्र नव्यता ?
सनातनेन धर्मेण सापेक्षोऽनादिकालतः ।
देशस्तन्निरपेक्षोऽभूत् कारणेन विना नवः ॥
सनातनस्य तत्त्वस्य संस्कृतस्य च नित्यशः ।
उपेक्षामप्यनुभवन् नवीनं किं त्वमीहसे ॥
सर्वेषामपि छात्राणां राजनीतिरभीप्सिता ।
दलसंघटनं लक्ष्यमितो नव्यं किमीहसे ॥

पठनं पाठनं सम्यङ् नास्ति विद्यालयेषु च ।
छात्राः केनाप्युपायेन परीक्षान्तु तरन्ति ते ॥
पदवृद्धेः कामनया शिक्षका नेतृगामिनः ।
स्वकर्तव्यं सदा तैस्तु वञ्च्यते, गलहस्त्यते ॥
उत्साहयन्ति नेतारस्तान् सदैवाविवेकिनः ।
नवनेपालके भूयोऽधिकं नव्यं किमीहसे ॥
उच्चशिक्षाप्रदातारो विश्वविद्यालया अपि ।
नेतृभिः संविभक्ताश्च स्वानुकूल्येन सर्वशः ।

त्रयाणां दलमुख्यानां प्रातिनिध्याय प्रेषिताः ।
दलानुकूल्यं कुर्वन्ति न तु विद्याविवर्धनम् ॥
सौविध्यादिप्रदाने च दलीयाः कर्मचारिणः ।
शिक्षकाश्चोपयुज्यन्ते, नान्ये नव्यं किमीहसे ॥
गुणस्तरौ न दृश्येते शिक्षायाञ्चान्यवस्तुनि ।
कथं स्यादुन्नतिर्देशे ? इत्याधिस्तेन वर्धते ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ख) वृथा गतं तस्य नरस्य जीवनम्

न येन माधुर्यरसाभिवर्षुकम्,
समीक्षितं संस्कृतवाङ्मयं क्वचित् ।
न चापि वैयासकिभारतादिकम्,
वृथा गतं तस्य नरस्य जीवनम् ॥

न येन राज्ञा हरिणा विनिर्मितम्,
शृङ्गारवैराग्यसुनीतिगुम्फितम् ।
तद्वर्धकं स्वादु न चाप्यधीतम्,
वृथा गतं तस्य नरस्य जीवनम् ॥

अधीतवान् सश्रममाङ्ग्लवाङ्मयम्
उपेयिवान् वास्तुकलाञ्च पश्चिमाम् ।
नाधीतवान् स्वादु च संस्कृतं वचो
वृथा गतं तस्य नरस्य जीवनम् ॥

अधीतवान् चर्चितशिल्पशालिनीम्,
विद्यालये बोर्डिङनाम्नि मूलतो
न संस्कृतं तेन यदीह शिक्षितम्,
वृथा गतं तस्य नरस्य जीवनम् ॥

अधीतवन्तो हि सुस्वादु संस्कृतम्,
संस्कारवन्तो विनयान्विता अपि ।
भवन्ति सर्वत्र च वैपरीत्ये
असंस्कृता अश्रमिणोऽधिकव्यया: ॥

तस्मात् संस्कृतसंयुक्ता आङ्ग्लीज्ञानार्थसाधिका ।
देववाग्रहिता सा तु धर्मसंस्कारवाधिका ॥
प्रविधिविधिविशेषे लब्धविद्योऽपि धीमान् ।
स तु भवति विहीनो देववाचोऽवबोधात् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स भवति मणिहीनो नागराजोऽक्षिहीनः
मनुज इव च देशे धर्मसंस्काररहीनः ॥
जगति लसितकीर्तौ पारतन्त्र्येण हीने,
प्रभवतु नयपाले शान्तिसम्पत्तिसौख्यम् ॥
रचितविविधमार्गाः सर्वभागेषु रम्याः ।
जनविकसनकार्ये शैघ्र्यभाजो भवन्तु ॥

ग) सामयिकी

मङ्गलाचरणम्

नेपालं नौम्यहं नित्यं हिमवद्भिर्विराजितम् ।
प्रभुसत्तासुसम्पन्नं स्वतन्त्रं चाप्यखण्डितम् ॥
हिमपर्वतभागाभ्यां तराईभागतोऽपि च ।
देशोऽयं निर्मितो भाति पशोः पत्याभिरक्षितः ॥
महता पृथिवीनारायणशाहेन निर्मितः ।
अखण्डश्च सदा जीव्यात् समावेश्य च सर्वशः ॥
धर्मस्य संस्कृतेर्मूलं भाषाया दर्शनस्य च ।
संस्कृतं वाङ्मयं नौमि पूर्वजैर्रक्षितं ततः ॥

धर्मनिरपेक्षतां प्रति-

सनातनेन धर्मेण सम्पन्नोऽनादितोऽप्ययम् ।
नेतृघोषणया धर्मनिरपेक्षो बलात् कृतः ॥
जनानां मतजातानि चाकलय्य कृतो यदि ।
भवेदथापि न्याय्यः स्यात् तदभावाद् हठो मतः ।
धर्मस्य निरपेक्षायां धर्मान्तरप्रचारकैः ।
प्रचारो हि स्वधर्माणां कृतः स्यादनपेक्षितः ॥
निर्धनेऽशिक्षिते देशे धर्मान्तरणदावतः ।
मर्यादां लङ्घयिष्यन्ति दग्धाः सन्तो जना वत ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मठमन्दिरसामीप्ये चर्चमस्जिदनामभिः ।
गृहाणि सम्भविष्यन्ति विद्रोहबीजवन्ति हि ॥
निर्धनक्रयणं नित्यं भविष्यति स्वधर्मतः ।
पलायनं कारयन्तः समाजं ध्वंसयन्ति च ॥

लोकतन्त्रस्य सर्वस्वं बहूनामादरो मतः ।
उपेक्षितो नेतृभिः स रहस्यमत्र किं वद ॥
कश्मीरबङ्गलादेशौ पाक-भारतराष्ट्रतः ।
न भिद्येयुरिति दृष्ट्या निरपेक्षत्वमीहितम् ॥

अथापि वङ्गलादेशः पाकदेशश्च भारतात् ।
अलग्नौ कश्मीरश्चापि यतमानः प्रदृश्यते ॥
यद्येकतायै धर्मस्याऽपेक्षिता निरपेक्षता
भारतस्य कथं खण्डाः कथं काश्मीरविग्रहः? ॥

धर्मस्य निरपेक्षत्वे तद्वदत्राथ देशके ।
किमत्र दार्जलिङ आदिरन्तर्भूतो भविष्यति ? ॥
नैवं चेन्निरपेक्षस्य धर्मस्यात्र सनातने ।
देशे नास्ति च युक्तत्वं घोषणायाः सुनिश्चितम् ॥

धार्मिकः कलहो नास्ति नाभून्नात्र भविष्यति ।
तस्माद्धि घोषणा व्यर्था धर्मे कलहकारिका ॥

देशस्य एकतां गणतन्त्रं च प्रति-

गणतन्त्रोन्मुखे देशे एकता तुच्छताङ्गता ।
एकतादिवसस्तस्मात् नेतृभिः स्वदितो मुदा ॥
ये संख्ये राज्यकल्पानां द्विचतुर्विंशती पुरा ।
गमनं तत्र देशस्येत्यवधेयं जनैस्तु किम् ?

अनेकासां भाषिकाणां जातेश्चापि विभागतः ।
देशोऽयं खण्डितो न स्याद् गणकल्पनया पुनः ? ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गणतन्त्रस्य लाभैश्च जनताकर्षणं भवेत् ।
न तु तस्य विपक्षाणां मर्दनं तत्प्रयोजनम् ॥
करामलकवद् दृश्ये नेपाले लघुदेशके ।
गणतन्त्रस्य सार्थक्यं कथम् ? एतन्न बुध्यते ॥
गणेषु केन्द्रवत् सर्वनिकायाणामपेक्षणात् ।
तेषां त्वार्थिकभारस्य वोढा कः ? साधु त्वं वद ॥
समस्यासु च राज्यानां विवादः सम्भविष्यति ।
तथा चेद् गणराज्यानां निर्धनानाञ्च का गतिः ॥
काबेर्या जलसम्बन्धी विवादो भारते यथा ।
तथा गणानां सञ्जाते कर्णाल्यादेश्च का गतिः ॥
एवं गणानां तन्त्रस्य कृते न गणतन्त्रता ।
किन्तु लाभानुरूप्याभ्यां प्रस्ताव्या गणतन्त्रता ॥

इदानीन्तनपरिधानं प्रति-

परिधानव्यवस्थायाः शिरस्त्राणस्य स्वस्य च ।
उपेक्षा प्रचुरा दृष्टौ समायाति हि संसदि ॥
परिधानव्यवस्था या पुराऽभूत् स्वत्वबोधिका ।
तस्याः किं प्रतिगामित्वात् स्वैच्छिकी परिकल्पिता ? ॥
लोकतन्त्रस्य तात्पर्यं किमेतदेव वर्तते ।
स्वस्य वैशिष्ट्यसंयुक्तं सर्वं त्याज्यमशोभनम् ?॥
समाचारादिवक्त्रीणां वेशभूषादिदर्शनात् ।
ज्ञायते लोकतन्त्रे हि सर्वं हेयन्तु नैजकम् ॥

ललाटे तिलकं नास्ति चोलिका शाटिकाऽपि च ।
केशानां कवरी नास्ति दृश्यते सर्वमर्धकम् ॥
यदीदृशाश्च संस्काराश्छात्रास्वन्यजनेषु च ।
कृताश्चेत् स्वविवाहेऽपि वधूः **फ्राकेन** नर्त्स्यति ॥
ईदृशा एव संस्काराः सर्वेषु यदि चाहिताः ।
निजार्धनग्नकन्यानां नर्त्तनं रञ्जकं भवेत् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

घ) विषमा स्थितिरत्र चित्रिता

नेपालोऽयं भुवनविदितो बुद्धशान्त्या सनाथः
सीतादर्शैर्निखिलहितकैराप्तवासल्यभावः ।
पृथ्वीत्याख्यैर्नरपतिवरैरेकतासूत्रनद्धः
सत्तास्वार्थैः प्रगतिरहितैर्वञ्च्यते नेतृवर्यैः ॥१॥

देशोऽस्माकं प्रकृतिधनकः स्वल्पसंख्यो जनानाम्,
यद्वत् गेहे निजशिशुजनः पाल्यते स्नेहतश्च ।
तद्वत् सौख्यं समभिलषितं लोकतन्त्राज्जनेन
नष्टं सर्वं प्रतिनिधिजनैर्भ्रष्टभावैरजस्रम् ॥२॥

माओवादः समजनि ततः सर्वदुःखाय देशे
तेनाऽऽक्रान्ता निजजननभूर्भ्रातरो घातिताश्च ।
पूर्वाधारा विकसनविधेर्ध्वंसिताः पातिताश्च
तत्राकृष्टं न भवति मनः क्रान्तिदक्षात्मनां वै ॥३॥

जातां मूलां निजजनवधे व्यापृतां तां समस्याम्,
दूरं कृत्वा बहुजनमनः कान्तये स्थापयन्तः ।
नेतारस्ते प्रतिनिधिसभाजीवनार्थन्तु लग्नाः
प्रारम्भन्ते प्रतिदिनमहो ! स्वार्थपूर्त्यै प्रयत्नान् ॥४॥

सत्तावाप्त्यास्तृषितमनसः सर्वभावेन सत्ता -
माश्लेष्टुं वै कतिपयजनैर्नित्यमान्दोलयन्ति ।
सत्तामोहात्प्रतिनिधिसभां कर्हिचित् स्थापयन्त-
स्तस्या एवोपविशनविधिं तत्परा नाटयन्ति ॥५॥

सत्तामोहो भुजगसदृशो दूरतस्त्याज्य एव
सत्ताभावेऽप्यधिकजनतासेवनं शक्यमेव ।
एतत्तथ्यं बहुजनहितं न्यस्य चान्दोलनार्थम्
नेतृम्मन्या व्यवसितजनान् कार्यतश्च्यावयन्ति ॥६॥

छात्राः पथ्यं निजपठनकं भूयसो दूरयित्वा
कर्माचारानपि बहुविधान् कर्मचारिप्रवर्ग्याः ।
शिक्षाकार्याच्चलितमनसश्शिक्षकाश्चात्र देशे
तस्योत्थानं समभिलषितं स्यात्कथञ्चैवमेव ॥७॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

क्रान्तौ कार्ये निखिलसमयं हापयन्तश्च छात्राः,
कक्षाकार्याच्चलितमनसो नैव विद्याप्रवीणाः ।
निन्द्योपाया निजगुरुजनान् त्रासयन्तस्तु नित्यम्,
सर्वाः कक्षाश्श्रमविरहिताश्चोत्तरन्त्येव दुःखम् ॥८॥

योग्यं योग्याय दातव्यमिति या वास्तवी स्थितिः ।
तत्सर्वं लीनतां यातं दलानां दलनाद् बत ॥९॥
लोकतन्त्रं सदा योग्यं विकल्पो नास्य वै ध्रुवम् ।
परं नेतुः परार्थत्वे जनजागरणेऽथ च ॥१०॥

अनुशासनहानानि कर्मकारेषु यानि च ।
नियुक्तौ नेतृसाहाय्याज्जायन्ते नात्र संशयः ॥११॥
अपूज्यास्ते हि पूज्यन्ते पूज्यानाञ्च व्यतिक्रमः ।
क्रियते नेतृवर्यैस्तु मुक्तिस्तस्मादपेक्षिता ॥१२॥

वर्त्तमानसमस्यानां समाधानं विहाय च ।
अपरासां समस्यानां जननं क्रियते बत ॥१३॥
माओवादसमस्यानां राष्ट्रियाणां हि यत्नतः ।
समाधानस्य कार्यत्वं सर्वैः सम्भूय एव च ॥१४॥

एतत्तथ्यं निरस्यैव नेतारः पदलिप्सवः ।
आन्दोलयन्ति राष्ट्रं वै विकासं बाधयन्ति च ॥१५॥
न्यक्कुर्वन्ति च राजानं मर्यादामतिक्रम्य च ।
स्पर्धन्ते च विना हेतुं दुग्धधौतायिता इव ॥१६॥

माओवादसमस्यानां समाधानादनन्तरम् ।
निर्वाचनस्य पर्याय इति ते किन्नु जानते ? ॥१७॥
संवैधानिकराजेन स्पर्धितुं व्याजचारिणः ।
तत्प्रसाधितकर्माणि त्वन्यथा लापयन्ति च ॥१८॥

महादलीयनेतारो दम्भं कुर्वन्ति केवलम् ।
जनताहितकार्येषु पलायन्ते दिशो दश ॥१९॥
अन्येनानुष्ठितं कर्म महदपि विनिन्द्यते ।
आत्मना त्वकृतं तत्तु नेत्रा चोद्घोष्यते शुभम् ॥२०॥

संस्कारोऽयं सदा त्याज्यो दुराग्रहप्रपीडितः ।
सत्याग्रहो ग्रहीतव्यो नेतृम्मन्यैर्यथार्थतः ॥२१॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

संस्कृतं प्रति-

नेपालस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिः शुभा ।
उभयं यद्युपेक्षेत सूपेक्षिष्यामहे वयम् ॥२२॥
एतत्तथ्यं न जानन्ति पाश्चात्त्येन प्रभाविताः ।
गर्हयन्ति च मूढा वै नवोढायान्तु मातृवत् ॥२३॥
संस्कृतोन्नतये राष्ट्रे विश्वविद्यालयः स्थितः ।
योजना-दृढते न स्तः कथं साफल्यमाप्नुयात् ॥२४॥
त्रयोऽधिकारिणस्तस्य मतभेदसनाथिताः ।
ते कथमुन्नतिं कुर्युस्त्रिदिशो गन्तुमुद्यताः ॥२५॥
राजनीतेः प्रभावोऽत्र जृम्भमाणः प्रवर्त्तते ।
येन लक्ष्यस्य वैफल्यं योग्यतादलनं भवेत् ॥२६॥

विषमायां स्थितौ सदिच्छा-

समस्यानां समाधानं राष्ट्रियाणां द्रुतं भवेत् ।
सच्चरित्राश्च नेतारो योग्यतापक्षपातिनः ॥२७॥
योग्यानामेव नेतृणां चयने सफलो जनः ।
नैपालको भवेदद्य स्वदेशोन्नतये ध्रुवम् ॥२८॥
गुणस्तरौ तु शिक्षायामानेयौ राष्ट्रभूतये ।
नेतृणां नग्नक्रीडा तु नैव स्याच्छिक्षणालये ॥२९॥
राजनीतिन्तु नेतारः कुर्वन्ति नेतरे जनाः ।
ते तु सेवां प्रकुर्वन्ति देशोत्थाननिमित्तिकाम् ॥३०॥
एवमेव हि राष्ट्रस्य शिक्षादेशचोन्नतिर्भवेत् ।
प्रजातन्त्रस्य लाभाँश्च लभेरन् सर्वदा जनाः ॥३१॥
भ्रष्टाचारस्य रोधस्तु दृढतां यातु सर्वदा ।
यतो हि राजयक्ष्मायं देशोत्थानावरोधकः ॥३२॥
शुद्धं प्राज्ञिकक्षेत्रं स्याद्विश्वविद्यालयो भृशम् ।
योग्यास्तत्र तु पूज्येरन् नायोग्यास्तु कदाचन ॥३३॥
संस्कृतोन्नतये मुख्या एकीभूताश्चरन्तु च ।
लक्ष्यं तदेव तेषां वै न तु वैयक्तिकं हितम् ॥३४॥
विषमा स्थितिरत्र चित्रिता नहि वैयक्तिक-लाञ्छना कृता ।
यदि दैवकृता स्थितिः समा, त्वभिलाषैव ममास्तु पूरिता ॥३५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ङ) नेपाले गणतन्त्रता

महर्घता महाव्याली मुखं व्यादाय तिष्ठति ।
विधेश्शान्तेरभावश्च नेपाले गणतन्त्रता ॥
लोकतन्त्रात्मके देशे वाक्स्वातन्त्र्यप्रदायके ।
मुखमाच्छाद्य गमनं नेपाले गणतन्त्रता ॥

जनानान्तु सुरक्षाणां नास्ति सत्ता सुसंस्थिता ।
मानवैर्मानवानान्तु मारणं गणतन्त्रता ॥
कृषिप्रधानके देशे खाद्यान्नं दुर्लभं खलु ।
कर्पास-शर्कराभावो नेपाले गणतन्त्रता ॥

वस्तूनां क्रयणे दक्षा तदुत्पादे त्वदक्षकाः ।
नेपाले सर्वकारो हि गणतन्त्रविशेषता ॥
जनानां क्रयशक्तिश्च प्रत्यहं क्षीणताङ्गता ।
वस्तूनां मूल्यजातेन परा काष्ठा प्रचुम्बिता ॥

उद्योग-कार्यशालानामभावो हि प्रगर्जति ।
तेनैव अर्थशक्तेश्च नाशोऽत्र गणतन्त्रता ॥
विद्युदभावजातेन लोडसेडिङरक्षसा ।
छात्राः पठनसंलग्ना वाधितास्तत् त्यजन्ति च ॥

जलानां स्रोतसा युक्तः प्रकृत्या शोभनोऽपि च ।
गणतन्त्रोऽपि नेपालस्तमसाऽऽवृत एव च ॥
विकासे नैव चेष्टास्ति नेतृणान्त्वधुनापि च ।
कलहे च्यावने चैव चतुरास्तेऽर्थसाधने ॥

राष्ट्रसेवकजातानां वेतने सुविधासु च ।
नास्ति वृद्धिर्बहोः कालान् नेपाले गणतन्त्रता ॥
प्रत्यहं खाद्यपेयादिवस्तुमात्रा लघूकृता ।
मूल्यन्तु वर्धितँ सम्यक् एषा हि गणतन्त्रता ॥

वालानां पाठशीलानां दुग्धादिबुद्धिवर्धकम् ।
जनास्तत्क्रयणेऽशक्ता नेपाले गणतन्त्रता ॥
पठने पाठने चैव शैथिल्यं गुरुशिष्ययोः ।
परीक्षानुकृतौ त्वत्र त्वरा सर्वेषु वर्धिता ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नेतृता सुलभा नित्यं कार्यनिष्ठा तु दूरगा
वैपरीत्याय नेपाले दृश्यते गणतन्त्रता ॥
कर्तव्यं समुपेक्ष्यैव नेता यैस्तु प्रधाव्यते ।
तैरेव पदवृद्ध्यादि क्षिप्रं समधिगम्यते ॥

कर्तव्यनिष्ठा राष्ट्रस्य सेवका ईशमानिनः ।
उपेक्ष्यन्ते प्रताड्यन्ते नेपाले गणतन्त्रके ॥
स्थूलेषु दलजातेषु सम्पृक्ताः छद्मचारिणः ।
कर्तव्यं समुपेक्ष्यापि उच्चतां यान्ति चाटुकाः ॥

अयोग्यादरणेनैव योग्यानादरणेन च ।
कृतकृत्यं तदात्मानं मन्यन्ते नेतृमानिनः ॥
राष्ट्रवादात् प्रहीणेषु स्वावलम्वादुदासिषु
नेपालदेशनेतृत्वं रे रे गर्जति गर्जति ॥

शैक्षिके धार्मिकादौ च राजनीतिः प्रगर्जति ।
गुणस्तरीयता नास्ति स्वेच्छाचारः प्रवर्द्धते ॥
वाह्ये धावनमार्गेऽपि विमानानां समाकुले ।
जीर्णोद्धारेऽपि गर्त्तानि, स्वोदरन्तु प्रपूर्यते ॥

यानैः प्रक्षिप्यमाणेन पङ्कजातेन सर्वदा ।
मार्गगा अभिषिच्यन्ते चित्रवस्त्रा भवन्ति च ॥
मार्गेषु गर्तजातेषु जलपूर्णेषु सर्वदा ।
यानानि कम्पमानानि दोलयन्ति क्षिपन्ति च ॥

सुरक्षा-शान्तिसन्तोषा लोकतन्त्रेण लक्षिताः ।
यत्र लेशोऽपि नास्त्येव तत्र का लोकतन्त्रता ?

अखण्डे शक्तिसम्पन्ने नेपाले राष्ट्रवादिनि ।
आत्मसम्मानयुक्ते च सफला गणतन्त्रता ?॥
इदानीमिव नेपालोऽशान्तोऽपि निर्धनोऽपि च ।
भवेच्चेद् गणतन्त्रस्य विकल्पः संभविष्यति ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पर्यन्ते शुभकामना

नेपालोऽयं जगति बहुशः ख्यातिभाग् वीरतायाम्,
स्वाधीनत्वे श्रमधनचये प्रत्यये चाप्तकीर्तिः ॥
भौगोलिक्यां प्रकृतिमधुरायां त्विषि राजमानः,
देशोऽस्माकं विलसतु सदा उन्नतोऽखण्डितश्च ॥

अस्मिन् देशे प्रकृतिनटिकाऽहर्निशं नर्तयन्ती,
सर्वानन्दं वितरतु सदा स्नेहस्निग्धैरपाङ्गैः ॥
सर्वोच्चा या रजतकनिभाः शृङ्खलास्ता हिमाद्रेः
सच्चारित्र्ये प्रगतिविषये चोच्चतां सन्दिशन्तु ॥

च) मातृभूमिं प्रणयत

राष्ट्रभक्तेन राष्ट्रस्य समृद्धिसुखकामतः ।
मातृभूमितया चापि तद्विकासः प्रकाम्यते ॥१॥
यो न कामयते देश्यामुन्नतिं सार्वकालिकीम् ।
पशुरेव स मन्तव्यो मानवोऽपि स्वरूपतः ॥२॥
देशोन्नत्या न हृष्येच्च नावसीदेच्च तद्विना ।
आकृत्या मानवश्चासौ पशुसाम्यं बिभर्ति सः ॥३॥
यस्योत्सङ्गे प्रकृतिसुभगे लब्धवद्भिश्च प्राणान्,
क्रीडं क्रीडं प्रकृतिसुलभा यापिता बाल्यभावाः ॥
हासंहासं मनसि विविधान् सौख्यभावान् स्वदन्तः,
देशोपेक्षां परिहरत हे ! तस्य पुत्राः भवन्तः ॥४॥
शान्तेर्लोपो विकसनविधौ नैव सम्पादनीयः,
वाग्युद्धादौ निखिलसमयो नैव सङ्क्षेपणीयः ।
इत्यालोच्य स्वनियतिकृता देशवैषम्यभावाः,
उद्घाट्यन्ते विकृतिविषया शोधनेहा यथा स्यात् ॥५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शिक्षां प्रति

शिक्षाक्षेत्रं विकसनविधेः साधनं सम्मतं यद्-
व्यापारेणानुकृतिरुजया ग्रस्ततां यातमस्ति ।
तत्राशान्तिर्गिलति नियतं कार्यरोधश्च दल्यः
प्राप्ते स्यातां कथमिह वुधा दक्षता शिल्पिता च ॥६॥

प्रमाणपत्रप्राप्त्यै तु देशे शिक्षा व्यवस्थिता ।
जीवने स्वाबलम्वो हि परालम्वेन न्यक्कृतः ॥७॥
अधीते योग्यता नास्ति श्रद्धा तत्र कथं भवेत् ।
उभयोरप्यभावे तु शिल्प-सर्जकता कुतः ॥८॥

नैतिकं शिक्षणं नास्ति कथं स्यादीशमानिता ।
राष्ट्रवादेन सम्प्राप्ता राष्ट्रतो गलहस्तिता ॥९॥
क्रयणं परवस्तूनां नास्ति विक्रयणं वत ।
कथमस्मद्विकासः स्याद् भो ! भो ! शोचत शोचत ॥१०॥

नेतॄन् प्रति

राष्ट्रे जातां विविधविपयां दूरयित्वा समस्याम्,
मन्त्रिप्राप्तौ प्रतिदिनमहो ! मार्गमान्दोलयन्ति ।
नेतारस्ते प्रतिगमनकं निन्दयन्तश्च नित्यम्,
दुष्टं कृत्यं निजविहितकं साधु सङ्गोपयन्ति ॥११॥

कस्माज्जातं प्रतिगमनकं नेतृभिर्नामितं यन्
माओवादः समजनि कथं के च दोषा हि नैजाः ।
सर्वानेतान् विकृतिजनकान् दूरयन्-नेतृवर्गान्
दृष्ट्वा दुःखं समनुभवति स्वार्थभावाँश्च दोषान् ॥१२॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

आदर्शतां स्वस्य परान् प्रदर्शयन् तथा परेभ्योऽपि वुधः समीहते ।
दुग्धेन धौता न भवन्ति वाग्वला ये वै स्ववृत्तेन हि हीनतां गताः ॥१३॥

नेतारो यदि नेतारः स्वार्थं निर्वन्धमेव च ।
त्यक्त्वा जर्जरितं देशं रक्षन्तु चोन्नयन्तु च ॥१४॥

त्यागेन सत्ता लक्ष्मीश्च प्राप्ता भवति वस्तुतः ।
सर्वदैव तयाऽऽश्लेषकामनायान्तु नैव सा ॥१५॥

स्थूलानि चैतानि दलानि नित्यशः
स्थूलानि स्वाचारवलेन वृत्ततो ।
भवन्तु देशस्य समृद्धये सदा
नोचेदधो गच्छति देश एषः ॥१६॥

समस्यासु समस्यानां वर्धनान् नहि नेतृता ।
तासां हि सुसमाधानाद् दृढा भवति नेतृता ॥१७॥

'शस्त्रेण रक्षिते राष्ट्रे शास्त्रचिन्ता प्रवर्त्तते ।'
शास्त्रचिन्तात्र दूरेऽस्ति प्राणचिन्ता प्रवर्त्तते ॥१८॥

माओवादेन जातायामशान्त्यां तैः पुनः पुनः ।
आन्दोलनेन तद्वृद्ध्या वाध्यन्ते नयपालिनः ॥१९॥
समस्यासु समस्यानां वर्धनाद् अत्र तैः पुनः ।
माओवादस्य साहाय्यं क्रियते नात्र संशयः ॥२०॥

एवञ्च

राष्ट्रस्य लक्ष्येषु मतैकता नहि
समीक्षणं नैव च स्वीयकर्मणाम् ।
स्वार्थान्धता त्यागपराङ्मुखत्वम्
नेपाल-नेतुः परिचायका गुणाः ॥२१॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अद्यतनी स्थितिः

छात्राणां हस्तयोर्नास्ति पुस्तकं लेखनी शुभा ।
भुसुण्डी-गोलिका-बम्बैः क्रीडन्ते वत ते सदा ॥२२॥
विकासो जीवनं मैत्री सर्जनं शिल्पितापि च ।
नाशे मृत्यौ शत्रुतायां ध्वंसे च परिवर्त्तितम् ॥२३॥

माओवादो न जानाति हृन्मनःपरिवर्त्तनात् ।
लक्ष्यस्य प्राप्तिर्भवति न वै बान्धवमारणात् ॥२४॥
येनैको मारितो जन्तुर्जीवितुं नैव शक्यते ।
सहस्राणान्तु हननेऽधिकारोऽधिगतः कुतः ? ॥२५॥

लघुलक्ष्यस्य प्राप्त्यर्थं बहूनां हननेन तु ।
तस्य वादस्य बालत्वं प्रतिभाति सतां हृदि ॥२६॥
लक्ष्यादानप्रदानानां गृहयुद्धं समाप्य च ।
नेतारो यदि जेतारः शान्तिं संस्थापयन्तु ते ॥२७॥

मातृभूमिं प्रणयत रचनां बान्धवानपि ।
ध्वंसमारणसंत्रासानचैव त्यज भो ! त्यज ॥२८॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वैदिकी शुभाशंसा

-रामचन्द्रशर्मा पौडेल
तनहूँजनपदीयः

यजुर्वेदीय "ॐ आब्रह्मन् ! ब्राह्मणो" इत्यस्य मन्त्रस्य भावपरकौ श्लोकौ -

हे ब्रह्मन् ! ब्राह्मणाः स्युः श्रुतिपठनपरा ब्रह्मवर्चस्विनः स्यू-
राजन्याः शूरवीरा रणनयकुशला वैरिविध्वंसकाः स्युः ॥
दोग्ध्र्यः स्यु र्धेनवो या अजवृषतुरगा वाहका आशुगाः स्युः,
जायन्तां वै पुरन्ध्र्यः परिजनमभितो योषितो हिन्दुराष्ट्रे ॥
जायन्तां जिष्णवो वै रथपथगतयः सङ्गरे शत्रुजैत्राः ।
सभ्या भव्या युवानो गुरुजनविनता वीरपुत्रा भवेयुः ॥
वृष्टिः स्यादिष्टकाले शिवतमरसदा भेषजाः स्युरवन्ध्या ।
योगक्षेमौ भवेतामिह जननजुषां नः सदा हिन्दुराष्ट्रे ॥

संस्कृतं संस्कृतेर्मूलम्

-प्रा.डा. हरिप्रसादः गौतमः
धादिङ्जनपदीयः

संस्कृतं संस्कृतेर्मूलं ज्ञानगङ्गासुधान्वितम् ।
सततं सज्जनैः सेव्यं मानवैः कर्मतत्परैः ॥१॥

ऋद्धिदं सिद्धिदञ्चैव शान्तिदं कान्तिदन्तथा ।
ज्ञानविज्ञानयोर्मूलं सदा जयति संस्कृतम् ॥२॥

मानवत्वविकासाय स्नेहसद्भाववृद्धये
शान्तिसिन्धोः प्रसाराय राजते सुरभारती ॥३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नेपालभूमिं प्रति

-प्रा. नारायणप्रसादशर्मा, कट्टेल
सुनसरीजनपदीयः

एषा मदीया ननु जन्मभूमि-
र्नेपाल-भूमि र्विवुधाग्र्यभूमिः ।
हिमाल-माला वन-शैलवाला
वहन्ति नद्योऽत्र जलैर्विशालाः ॥१॥

क्रोडे हि यस्या नगराजवाला-
मृगाश्चमर्यो मृदुकोकिलाश्च ॥
भृङ्गा विहङ्गा वहुवर्णभङ्गाः ?
क्रीडन्ति नित्यं विलसन्ति नित्यम् ॥२॥

अत्रैव जाता ऋषयः पुरोधसः
सन्नीति-सच्छास्त्र - गुणाभिरामाः ।
समन्ततः कानन-पर्वतेषु
प्राणप्रदा ओषधयो लसन्ति ॥३॥

जाताऽत्र सीता त्रिजगत्पवित्रा
स कर्मयोगी जनको नृपालः ।
वुद्धः स्वयं विश्वहिताग्रदूतः
वीरा वरेण्या विविधा विपश्चितः ॥४॥

सर्वत्र शान्त्या सुखसम्पदा च
स्वाराज्यमासीच्चिरकालतोऽत्र ।
जनाः स्वतन्त्राश्च निरापदश्च
श्रद्धा-दया-शान्ति- समुन्नताश्च ॥५॥

परन्तु नाद्याऽत्र तदस्ति किञ्चित्
व्याघ्राः, वृकाः क्रूरतमाः समन्तात् ।
तपोवनं क्रूरजनाभिजुष्टम्
नेपालमातुर्बहु स्वं विनाशितम् ॥६॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ग्रामे गृहे पत्तनके नगर्याम् ।
समेऽसमे पर्वतमस्तके वा ॥
वने नदीनां पुलिने च मार्गे ।
सर्वत्र मुत्युर्नरिनर्ति चाऽद्य ॥७॥
विषाक्तधूमेन नभोऽभिभूतम् ।
धरा विदीर्णा गुलिकाप्रहारात् ॥
आवालवृद्धं विधवाजनाश्च
दिशो विदीर्णाः परिदेवनेन ॥८॥
इत्थं समग्रं विषदिग्धमत्र ।
शान्तिः समृद्धिः विगते परत्र ॥
दृष्ट्वा दशां चाद्य विदीर्णवक्षाः ।
नेपालमाता विकला विषण्णा ॥९॥

अत एव

शान्त्या विवेकेन सहिष्णुभावात्
बन्धुत्वभावेन परस्परञ्च ।
मनुष्यतावृद्धिमुपैतु सद्यः
समत्वमप्येतु समृद्धियुक्तम् ॥१०॥
वयं हि वीरा जयिनो जनस्य
शेषस्य विश्वस्य कृते हिताय ।
प्रसन्नतायै स्थितिरक्षणार्थ-
मादर्शभूताः प्रथिताः पृथिव्याम् ॥११॥
स्वयं त्विदानीं यदि सत्यमुक्तगो
देशं स्वजातिं निखिलां समृद्धिम् ।
कर्तुं समग्रं गिलितुं प्रवृत्ता ।
हता वराकी प्रकृतिः स्वकीया ॥१२॥
तस्मात् समुत्सृज्य कुकार्यमेतत् ।
समग्रदेशस्य विभूतये वै ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जातित्वबन्धुत्वसुरक्षणाय ।
सम्भूय सर्वैर्यतनीयमद्य ॥१३॥
शान्त्या, श्रिया, शौर्यगुणेन वृत्त्या ।
विकासलक्ष्म्या सुनयेन वाद्य ॥
उत्थाप्य देशं भणितव्यमस्ति ।
नेपालदेशान्ननु को वरोऽस्ति ॥१४॥

मम भणितिः

-श्रीरामः सापकोटा
सिन्धुपाल्चोकजनपदीयः

हेमन्तेऽपि तुषारवत्कठिनता वर्षाऽऽतपै र्दृश्यते,
देशोऽयं सुरभारती च विकला पीडां कथं धारयेत् ।
जानन्ति सुपरीक्षकाः किमकला किं वा कला सादरम्
दुःखे मग्नजनाः सवाष्पनयनाः कुर्वन्ति किं ते कथम् ॥१॥
पाखण्डा दनुजोपमा नरचया नेपालभूमिं श्रिता-
भ्रामं भ्राममनेकशक्तिनिचयै स्सन्त्रासयन्तो जनान् ।
मर्त्यानां भवनानि याननिवहान् दन्दह्य लोके स्थितान्
वाञ्छन्तीव विनाशपूर्णमवनिं मर्त्यान् सदा दुःखितान् ॥
नद्यो यत्र भवन्ति निर्मलतरा ध्यायन्ति ता योगिनः,
शस्त्रास्त्राणि प्रदर्श्य मूकमयतां पश्यन्ति किं भोगिनः ।
चौरे वा विपिने हिमालयतले तिष्ठन्ति ये पर्वते,
ते सर्वेऽत्र जना भ्रमन्तु सततं शास्त्रादिसंरक्षणे ॥३॥
"सङ्घे शक्ति" रिति व्रजेच्च कथनं सन्मार्गसंप्रेरणे
भाषाभेषकला विचार्य सहसा गन्तव्यनिर्देशने ।
शास्त्रं गर्जति लोकधर्मशरणं गच्छन्तु सर्वे जनाः ।
तस्मादत्र विचार्यतां बुधजनैः सच्छास्त्रसंरक्षणे ॥४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जीवनम्

-सहप्रा.डा. जीवनोऽधिकारी
लमजुङ्जनपदीयः

कथयन्त्येतदस्ति जलबुद्वुद्तुल्यं
परं न तथा सारल्येन स्फुटति
स्फुटति चानायासेनोपगते च विधौ विपरीततां
गतवत्यपि तस्मिञ्जगति कियन्तञ्चित् कालं
वरीवृत्यत उभयात्मकेन कृत्यजातेन कथावशेषतया
श्वसदप्यर्धमृतमिव
हसदप्यन्तर्हृदये किञ्चन विदीर्णमिव
नैकविधेषु शकलेषु विभक्तं सदपि
मांसप्राचीरमिव पादाभ्यां वहत्
सन्ततमटति प्रविशति च विग्रहाद्विग्रहान्तरम् ।

अनभिज्ञतायामनुभूयत आनन्दमयं किमपि
सम्वन्धक्रियाप्रतिक्रियादिविचारशून्यं जडमिव
केवलं निजान्त एकाकिना रममाणं
पृष्टे च 'न जानामी' त्युत्तरं कथयन्नात्मरतिमपि नैव प्रकाशयत्
स्तुतिनिन्दादिव्यापारातिक्रान्तं परं चैतन्यमयम् ।

जागरिते च जागतिकसम्बन्धविशेषाभिज्ञत्वे
प्रथममाज्ञाकारिसन्ततिपदलोभेन
कदाचिदनुशिष्टशिष्यत्वाभिलिप्सया
क्वचित् सुयोग्यवरत्वाभिमानेन
कुत्रचिच्चैकपत्नीव्रताचरणभ्रमोत्पादनेन
क्वचित् सुशीलजामातृतया
कुत्रचिद् भगिनीश्यालिकादिवरान्वेषकतया

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

क्वचिन्नैष्ठिकशिक्षाप्रयोजकत्वेन
क्वचिच्च पितृपितामहादेरन्तिमावलम्बनत्वेन
चेत्यादिभिर्दायित्वविशेषैर्निरवच्छिन्नं छिन्नं सदपि
प्रतिक्षणं शतशः खण्डितमपि
निजभागे शकलमेकमपि नावशिष्टमिव
पराधीनमिव सर्वशो निःश्वसिति, भस्त्रिकेव ।

क्वचिदसमये कालकवलितं
नामशेषेष्वपि सहयात्रिषु
भोगावशेषात् किमु प्राणीति शतायुषा
अयाचितमपि लभते याचितमपि न पारयति भोक्तुं
कर्मबन्धनग्रन्थिग्रन्थिलमिवेतस्ततोऽनवरतं
प्रविशति निर्गच्छति गच्छति
प्रत्यागच्छति च पौनःपुन्येन ॥

लोकतन्त्रं प्रणौम्यहम्

- डा. गोपालभण्डारी
धरानस्थः

आशु रुष्टमाशु तुष्टमाशु संवादकारकम् ।
संघञ्च गणराज्यञ्च लोकतन्त्रं प्रणौम्यहम् ॥
विपुलां भावनां त्यक्त्वा जातिवादप्रवर्तकम् ।
क्षेत्रं प्रदेशं गच्छतत् लोकतन्त्रं प्रणौम्यहम् ॥

संघर्पस्यावरोधस्यापहारस्य च क्रान्तिमत् ।
सदा बन्ध्यं सदा मन्दं लोकतन्त्रं प्रणौम्यहम् ॥
जनाधिकारं संप्राप्य सर्वभावेन भावितम् ।
अलब्धं संविधानञ्च लोकतन्त्रं प्रणौम्यहम् ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रतिशोधं परित्यज्य राष्ट्रभावे प्रवृत्तिमत् ।
प्रतिपक्षं निराकृत्य स्वैक्यभावे प्रतिष्ठितम् ॥
पक्षपातं तथा दम्भं कार्पण्यं पदलुब्धताम् ।
त्यक्त्वा गच्छल्लोकतन्त्रं प्रणमामि पुनः पुनः ॥

देशदशा

-प्रा.डा. दुर्गाप्रसादः अर्याल
(तदानीन्तनोऽतिथिप्राध्यापको बनारस-हिन्दु-विश्वविद्यालये वाराणस्याम्)

विदेशस्य विशेषस्य दूरस्य निकटस्य च ।
क्रीडास्थलं हि नेपालो विधर्मस्य विशेषतः ॥१॥
क्रीडास्थलेऽस्मिन् नेपाले वर्तमाने निरन्तरम् ।
विचित्राणि च कार्याणि प्रचलन्ति प्रतिक्षणम् ॥२॥

अत्र क्रान्तिर्विवादायाऽभिमानाय प्रधानतः ।
अत्र शान्तिस्तु वाग्जालं केवलं राजनेतृषु ॥३॥
तेषां व्रतं वञ्चनञ्च चातुर्यं स्वार्थसाधनम् ।
धर्मो हि तेषामधिकः पीडनं बहुधा मुदा ॥४॥

मन्त्रद्वयं लोकतन्त्रं गणतन्त्रं तथैव च ।
वञ्चयन्ति पठित्वैव स्वदेशं जनतामपि ॥५॥
विकाराय निवेशाय विधर्माय दुःखाय च ।
नायका हि स्वदेशस्य भवन्ति दूरदर्शिनः ॥६॥

अत्यजन्तुच्छस्वार्थस्य स्वसत्तायाः सुरक्षणे ।
इतिहासो हि तेषाञ्च परिहासः सुसंस्कृतेः ॥७॥
अभियानं प्रधानञ्च जनानां मानमर्दने ।
अहो विचित्रमस्माकं नायकाः कष्टदायकाः ॥८॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विध्वंसनाय देशस्य कुशलास्तीव्रसाधकाः ।
नेतारश्चैव हन्तारो गुणं जहति दैशिकम् ॥९॥
पालयन्ति विदेशस्य चोपदेशं दुराशयम् ।
द्वाविमौ प्रथितौ यत्र प्रबलौ चाऽजरामरौ ॥१०॥

भ्रष्टाचारशोषणाख्यौ नेपालपरिचायकौ ।
तावुभौ बहुमान्यौ स्तः व्याप्तौ राज्येषु सर्वदा ॥११॥

अस्मिन् यथार्थे च कथं सुखं स्यात्
कथं भवेत् शान्तिरहो ! विकासः ।
सुयोजनायाः परिकल्पना का
देशाभिमानश्च कथं भवेद् वा ॥१२॥

अरक्षिताः सन्ति जना बुभुक्षिताः
सुरक्षकाः सन्ति सदैव भक्षकाः ।
पुरोहितास्ते न च याजकाश्च
मठाधिपास्ते मठनाशकाश्च ॥१३॥

भवन्ति ते यत्र विधायकाः स्वयम्,
विघातुकाः नीतिमतां जनानाम् ।
कथं भवेद् देशहितं प्रजानां
समुन्नतिर्वाऽथ सुखं कथं स्यात् ? ॥१४॥

तथापि नेता बहुभाषणेन
क्षणे क्षणे त्रासबलक्रयेण ।
तनोति जालं छलतो जनेषु
नवं नु नेपालमिमं करोमि ॥१५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

क) सम्प्रति

- तोयराजनेपालः
भोजपुरजनपदीयः

प्रजातन्त्रेऽवश्यं सकलजनताः सौख्यमतुलं
लभेरन्नित्येषा भणितिरिह मिथ्यात्वमगमत् ।
प्रजानां तु प्रायः पुनरपि च दुःखान्तरमभूत्
परं ते नेतारः परमसुखभाजः समभवन् ॥१॥

पदार्थानां मूल्यं कियदिति न नेत्रा सुविदितम्
न वा प्राप्तिस्तेषां भवति सुलभा कापि विपणौ ।
प्रहर्तॄणां **वाईसीयल** इति नाम्नां बलवताम्
प्रभावोऽस्ति प्रायः सकलनगरे वा जनपदे ॥२॥

स्वहस्ते राष्ट्रस्य स्थितिविधिविधानादिसकलम्,
गृहीत्वा यत्किञ्चिद् विदधति यथेष्टं न तु कृतम् ।
जना निन्देयुर्वा विलपनपराः स्युः पुनरहो !
त्यजेयुर्वा वयं न हि कथमपि भ्रष्टमतयः ॥३॥

पणा देयाः सर्वैरिति कथनशीला गतदयाः
अदातृभ्यः सद्यो ददति च दमं भौतिकमपि ।
गुरुर्वा व्यापारी भवतु ननु कर्माधिकृतकः
वियुज्येत प्राणैरपि धनसुतानां किमु कथा ॥४॥

य आस्ते सत्तायां स हि खलु निरुन्धे च सदनम्
ध्वजं हस्ते धृत्वा प्रचलति विरोधाय सरणिम् ॥
भयं लज्जां हित्वा प्रवदति वृथा जल्पनकथाम्
कथं विश्वस्ता स्यात् सरलजनता शान्तिसुखयोः ॥५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ख) नेपालस्य वर्त्तमाना स्थितिः

देशोऽयमासीदतिधार्मिकः पुरा
सशान्तिकः शस्यसमृद्धिसंयुतः ।
आस्तेऽधुना सोऽपि सुदारुणः किल
अशान्त आतङ्कितव्यग्रताकुलः ॥१॥

यस्मात्पुरान्नानि वहूनि नित्यशः
क्रीत्वा नयन्ति स्म विदेशजा जनाः ।
क्रेतुं कुतो लभ्यत ईदृशीं धियं
कुर्वन्निदानीमभिधावते धराम् ॥२॥

अत्र प्रशास्तार इमेऽपि सन्ति ये
पदे निविष्टास्तु समेऽपि वञ्चकाः ।
ये राजनीतिं किल कुर्वते जना-
स्ते चापि सर्वे खलु भ्रष्टताङ्गताः ॥३॥

ये केऽपि भ्रष्टाः खलु सन्ति सर्वशः
दण्ड्या भवेयुः स्वक्रियानुसारतः ।
ततो भवेदस्य पुनः समृद्धता
इतोऽपि भ्रश्येत न चेदयं ध्रुवम् ॥४॥

ग) न देशो नूतनायते ?

अस्माकं नेतृवर्गोऽयं न देशोन्नतिचिन्तकः ।
तस्य वास्तविकं रूपं किञ्चित्प्रस्तूयतेऽधुना ॥

नेपालं रचयामि नूतनमिति प्राप्ताः सभासत्पदम्
नेतारो जनवञ्चकत्वमगमन् हित्वा प्रतिज्ञां स्वकाम् ।
अस्तित्वं सकलं स्वराष्ट्रियमिदं विक्रीय नैपालकम्,
व्यक्तोत्कोचनवीनतेति किमयं देशो न नूत्नायते ?

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

येन केनाप्युपायेन धनार्जनपरायणाः,
नेपालं धूलिसात्कृत्वा नूत्नतां प्रापयन्ति ते ।
पाषाणमृत्तिकादीनि वनानि वनजानि च,
जलजान् स्थलजाँश्चैव जीवजन्तूँश्च सर्वशः ।
रक्तं च पारपत्रं च नदीक्षेत्रमहीधरान् ।
तान् संस्थानविशेषांश्च तान् वालवालिकागणान् ।
यान्कानपि च देशस्य गौरवस्थापकान् जडान्
चेतनाश्च समस्ता वै विक्रीणन्ति निरन्तरम् ॥

अपूर्वा मातृशुश्रूषा सभासद्भिर्नवा कृता ?
मातुः परीक्षा पुत्र्या तु कुताऽन्यत्र प्रलिख्यते ?
अष्टकेन सहस्राणां दलीयं सैन्यमास्थितम् ।
ऊनविंशतिसाहस्रैर्न जाता ? किं तदुन्नतिः ?
पदार्थानां च सर्वेषां महार्घत्वं प्रसाधितम् ।
मूल्यवृद्धेः शिरः प्राप्तो न देशो नूतनायते ?

गृहाणि च विचित्राणि सून्नतानि महान्ति च ।
निर्मीयन्ते तदुत्कोचैर्न देशो नूतनायते ॥
दीनत्वे प्रथमं स्थानं लब्धं राष्ट्रेण चेत्तदा ।
नवीनराष्ट्रनिर्माणं नेतृवर्गैर्न तत्कृतम् ?
उत्कोचोन्नतिसंलग्नान् मनसा कर्मणा गिरा ।
निपुणान् नेतृवर्गांस्तान् धन्यान् मन्यामहे वयम् ॥
सदा विवदमानाश्च सत्तार्थं सांसदा समे ।
संविधानं तथा शान्तिं न निष्कर्षे नयन्ति ते ।

इत्यपूर्वगुणैर्नूत्नैर्भ्राजमानैश्च सांसदैः ।
स्वेच्छाचारैर्विभक्तः किं न देशो नूतनायते ?

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वैष्णवो देश एषः

-सोमराजः कट्टेल 'अभय'
सङ्खुवासभाजनपदीयः

दामोदरात् प्रवहतीह तु कृष्णगङ्गा
यस्यास्तटोद्भवशिला प्रतिमैव विष्णोः ।
सम्पूज्यतेऽखिलसनातनधर्मविद्भि-
श्चन्द्राङ्किता भवति सूक्ष्मतरातिपूज्या ॥

शालग्रामो गण्डकीगर्भजात-
स्तस्मादुक्तो वैष्णवो देश एषः ।
तस्मिन् देशे प्राणिनो ये भवेयु-
स्ते स्युः सर्वे वैष्णवा जन्मसिद्धाः ॥

यस्याः गर्भे विष्णुरूपाः शिलाः स्यु-
र्यस्यास्तोयं पापसंहारकारि ।
तादृग्देशे मानवा ये भवेयु-
स्ते स्युः सर्वे वैष्णवा जन्मसिद्धाः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

क) सा संस्कृतिः संस्कृतिः

-सहप्रा. नवराजः कट्टेल
गोरखाजनपदीयः

१.यस्यां देवगणोऽर्च्यते प्रतिदिनं सत्यं सदा मान्यते
मान्यन्ते सुधियः गुरूश्च पितरौ संसेव्यते भद्रता ।
सौजन्यं ध्रियते जनेषु सततं नारी सदा पूज्यते
स्निह्यन्ते शिशवः सुमिष्टवचनैः सा संस्कृतिः संस्कृतिः ॥

२.अध्यात्मं भुवि सेव्यते प्रतिदिनं ध्यानं यया तन्यते
यस्यां राष्ट्रियभावना च विपुला संवर्धते नित्यशः ।
पूज्या या खलु मानिनी मनुकुले प्राचीनता-संस्कृतिः
सत्यं ह्येव धनं विभाति परितः सा संस्कृतिः संस्कृतिः ॥

३.वृद्धा वै जननी सुतात इतरे कौलाश्च वै संगताः
पूज्यन्तेऽतिथयः सदा सुवचनै र्मिष्टान्नपानैर्गृहे ।
जाया वै प्रतिसेव्यते ह्यहरहः प्रीतिश्च सन्तन्यते
भर्ता देवसमः सती प्रियतमा सा संस्कृतिः संस्कृतिः ।

४.गोसेवा, दधिमन्थनं प्रतिदिनं क्रीडा शिशोर्दर्शनम्
वृक्षाणां प्रतिसिञ्चनं तनुभृतां प्राणोच्चतारक्षणम् ।
नित्यं याचकभोजनं, मधुमयैर्हव्यैश्च कव्यैस्तथा
सेव्यन्ते पितरः सुसान्ध्यसमये सा संस्कृतिः संस्कृतिः ॥

५.यस्मिन् देहघटे महातनुतरौ यत्रास्ति देवालयः
षट्चक्रं च प्रकाशते सुपरितो ह्यात्मस्थितिं द्योतते ।
सूक्ष्मं सूक्ष्मतरं सुतत्त्वसहितं स्वाध्यात्मशान्तिं मुदा
सेव्यन्ते मनुभिःसदा परिजनैःसा संस्कृतिः संस्कृतिः ॥

(०६७ वैक्रमाब्दे ज्येष्ठमासस्य ३० तिथौ संस्कृतकविगोष्ठ्यां प्रस्तुता)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ख) अयि भुवि मानवता कुत्र गता ?

१. अयि भुवि मानवता कुत्र गता ?
अयि भुवि मानवता कुत्र गता ?
उत वा वृषभायिता ?
अयि भुवि मानवता रुधिरायिता
कुत्रचित् अश्रुधाराप्रपाता,
कुत्रचिच्च रक्तसरित् प्रवाहिता
अयि भुवि मानवता कुत्र गता
अयि भुवि मानवता दृषत्कृता ?

२. कुत्रचित् बालानां रोदनम्,
कुत्रचित् वृद्धानामश्रुमोचनम्,
कुत्रचित् तरुणानामश्रूत्सर्जनम्,
कुत्रचित् सुन्दरीणां सिन्दूरप्रक्षालनम्,
कुत्रचित् नरमुण्डच्छेदनम्,
कुत्रचित् जनभवनभेदनम्,
अयि भुवि मानवता कुत्र गता
अयि भुवि मानवता दृषत्कृता ।

३. अयि भुवि मानवता कुत्र गता
अयि भुवि दानवता शिखरायिता ।
मानवता तिरस्कृता
धूलिधूसरे तिरोहिता मानवता
खलु मानवसंवेदना मृता
अयि भुवि मानवता यन्त्रमानवै र्निगूहिता
उत वा मानवैरेव मानवता यन्त्रीकृता
अयि भुवि मानवता कुत्र गता
अयि भुवि दानवता शिखरायिता ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

४. अयि भुवि मानवता कुत्र गता
अयि भुवि दानवता शिखरायिता ।
कुत्रचित् वृद्धानां मारणं,
कुत्रचित् बालानामपहरणं,
कुत्रचित् नारीणां चीत्कारः,
कुत्रचित् गोलिकाप्रहारः
कुत्रचित् क्षितिविदारणं
कुत्रचित् मानवदेहभञ्जनं
कुत्रचित् देशशोषणं
कुत्रचित् देहपोषणं
अयि भुवि मानवता कुत्र गता
अयि भुवि दानवता शिखरायिता ?

५. अयि भुवि मानवता कुत्र गता
अयि भुवि दानवता शिखरायिता ?
कुत्रचित् नारीदेहक्रयणं
कुत्रचित् जायाविक्रयणं
कुत्रचित् पुत्रीविक्रयणं
कुत्रचित् मातृहननं
कुत्रचित् पितृहननं
बहुत्र बम्वकवर्षणं
कुत्रचित् चन्द्रहासघर्षणं
कुत्रचित् निरन्तरमश्रुपातनं
कुत्रचित् ग्रामे ग्रामे मानवघातनम्
अयि भुवि मानवता कुत्र गता
अयि भुवि दानवता शिखरायिता ?

(२०६३ वैक्रमाब्दे ज्येष्ठमासे संस्कृतकविसम्मेलने पठिता)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ग) चन्द्रः

१. चन्द्रस्सदा चुम्बति स्निग्धबालाम्,
चन्द्रस्सदा चुम्बति दिव्यहारम् ।
चन्द्रस्सदा वै वितनोति कान्तिम्,
चन्द्रस्सदा वै वितनोति शान्तिम् ॥

२ इन्दुः सदा नृत्यति निर्झरिण्याम्,
इन्दुः सदा नृत्यति हैमभूमौ ।
विधुः सदा स्नाति च हैमनद्याम्
विधुः सदा भाति च ह्यन्तरिक्षे ॥

३. चन्द्रः सदा चाटति गौरग्रामे
चन्द्रः सदा चाटति पुष्पवृक्षे ।
चन्द्रः सदा चाटति तुङ्गगोत्रे
चन्द्रः सदा चाटति मे धरायाम् ।

४. शान्तेश्च कान्तेर्ननु मूलमेतत्
रसस्य पीयूषततेश्च मूलम् ।
भावस्य मर्त्यस्य निबध्य मूलम्,
संसारस्रष्टुर्भुवनस्य मूलम् ॥

५. चन्द्रस्य सृष्टेः परिपालनाय
मर्त्यस्य चाम्वोः परिवर्धनाय ।
सौन्दर्यमूलं ननु ह्येष चन्द्रः
आह्लादमूलं ननु ह्येष चन्द्रः ॥

(२०६५ ज्येष्ठ २९ मासे संस्कृतकविगोष्ठ्यां पठिता)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

घ) मन्दं हास्यं हृदि विलसतात् सुन्दरं सुन्दरीणाम्

नारीयं वै पुरुषहृदयं सन्निकृष्यैव नित्यं
मर्त्यान् सर्वान् विषयलसितान् कामपुष्पं तनोति ।
यस्याः सृष्टिर्जगति वितता कौतुकेभ्यो विचित्रा
मन्दं हास्यं हृदि विलसतात् सुन्दरं सुन्दरीणाम् ॥१॥

यस्या दन्ताः कमलसुमवत् हैमगौरं धरन्ति
श्वेतं रक्तं ह्यपि विघटितं भावुकेभ्यो विचित्रम् ।
दन्ताहारो नभसि मुदितश्चन्द्रवत् शोभितोऽस्त
मन्दं हास्यं हृदि विलसतात् सुन्दरं सुन्दरीणाम् ॥२॥

ओष्ठं रक्तं युवकहृदयाहारिसौन्दर्यपूर्णं
यस्या हास्ये विलसति मनो मोदपूर्णं समन्तात् ।
शोभां धत्ते मनसि तनुते भावदीपं सुदीप्तं
मन्दं हास्यं हृदि विलसतात् सुन्दरं सुन्दरीणाम् ॥३॥

हास्यन्धत्ते ललितनयनं सप्तरङ्गैः सुरङ्गं
स्मारं स्मारं गदति नयनैर्मुह्यमानान् मनुष्यान् ।
किं किं ते मे मनसि लसितां भावधारां व्यनक्ति
मन्दं हास्यं हृदि विलसतात् सुन्दरं सुन्दरीणाम् ॥४॥

मत्स्यापाङ्गी सुगजगमना पद्मनेत्री सुनेत्री
रामा कान्ता सुमृगनयना शीतलाङ्गी कृशाङ्गी ।
जायाऽजेया हृदयनिवहा मानिनी मानवानां
मन्दं हास्यं हृदि विलसतात् सुन्दरं सुन्दरीणाम् ॥५॥

(२०६८ तम् वर्षे आषाढमासस्य १७ तिथौ पठिता)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ङ) वर्षा

१. अहं वर्षा अस्मि
अहं वृष्टिरस्मि
अहं मेघानां श्रेणीं समारुह्य
सूर्यपथात् गगनमण्डलं व्याप्नोमि ।
अपि च
धूलिधूसरितं व्योमपथं प्रक्षाल्य
पवित्रीकृत्य च
वसुन्धराया ऊर्वरकुक्षौ प्रसरामि

२. अहं पर्वतश्रेणीषु दृषद्कुट्टेषु च
विस्तार्य, शनैः शनैः
महीतलस्य शिखरिषु शिखरेषु च प्रसरामि
धरणीतलस्य कोणेषु, प्रकोणेषु रसं प्रसार्य
क्षितिजस्य क्षेत्रेषु क्षेत्रेषु रसमवगाह्य
धरणीतलस्य प्रत्यणु परिव्याप्तोऽस्मि
अङ्कुरेषु, वृक्षेषु वनराजिषु च
शक्तिम् आदधामि, ऊर्वरतामादधामि ।
शक्तिं बिभर्मि ऊर्वरता बिभर्मि
शिशिरहेमन्तयोर्हिमरसनया समालिह्य
निर्वृक्षेषु नग्नायितेषु गिरिशिखरेषु
अहं पुनः पुनरपि मनोहारिणीं सृष्टिमादधामि
अहं पुनः पुनरपि सुवर्णमयीं सृष्टिमानयामि ॥

३. सूर्यकमलस्य शतपत्रस्य कुड्मलेषु कुड्मलगुच्छेषु
अहं शनैः शनैः सुवर्णमयं रक्तवर्णमादधामि ।
पाटलपुष्पस्य छिन्नरुहपुष्पतरुषु पुष्पेषु
शनैः शनैर्रागं बिभर्मि
शनैः शनैः सौन्दर्यं बिभर्मि

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पारिजातस्य कमल-केशराणां सुगन्धितपरागास्तु
मम एव अस्मितताया ध्वनयः सन्ति,
प्रकृते र्मधुशालायाः हरितानि दृश्यानि तु
मम एव चिरनूतनस्य स्मयजातस्य अभिव्यक्तयः सन्ति
अहं सृष्टौ कोमलतां बिभर्मि
अहं दृष्टौ सौन्दर्यं बिभर्मि
अपि चाहं
प्रकृते रिक्ततायां पूर्णतां बिभर्मि ।
अहं वर्षा अस्मि ।

४. अहं क्षितिजस्य नीलेषु विवरेषु
सूर्यरश्मीः समाहृत्य
इन्द्रधनुः संरचयामि
रक्तानि, श्वेतानि, नीलानि च रागजातानि समावृत्य
पीतानि, हरितानि, वैजयन्तीमयानि रागरूपाणि आलिप्य
इन्द्रधनुषः सुन्दरं पुष्पं संफुल्लयामि
इन्द्रेणी इति इन्द्रधनुषश्च
मम एव वर्षोत्सवस्य रमणीयं रूपायनं
इन्द्रेणी इति इन्द्रधनुस्तु
मम एव वर्षोत्सवस्य मधुरम् उद्‌गायनम्
इन्द्रेणी इति इन्द्रधनुस्तु
मम एव परमाणोः, अलौकिकं दिव्यम् अभिव्यञ्जनम् ॥

५. अहं दिव्यसर्जनस्यः अणौ अणौ प्रसृत्य
सृष्टिं, सृष्टेर्यात्रां च परिवर्तयामि ।
अहम् अनन्तेषु वृक्षेषु वनस्पतिषु, किसलयेषु पुष्पेषु च संमिल्य
अनन्तां सुस्वादुताम् अतुलनीयां तृप्तिं सन्दधामि
अहं भूयो भूयः प्रतिपत्रं मिलितां दृषद्‌कुट्टिं विदार्य
अनूर्वरां समतलभूमिं मरुभूमिञ्च संसिच्य
अनन्तताम् ऊर्वरताम् सन्दधामि ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अपरिमितायाः सृष्टेः
अक्षय्य-सर्जने वीजाधानं करोमि
अहं वर्षा अस्मि
अहं सृष्टेर्यात्रां परिवर्तयामि
अहं सृष्टौ गर्भाधानं करोमि ॥

च) सीतां वन्दे

सीतां वन्दे नयनललितां जानकीं वै शुभाङ्गीं
मायारूपं भजसि मधुरं सृष्टिमार्गे विचित्रम् ।
आद्या शक्तिः सुरचनविधौ वीजरूपं विभर्सि
मुक्तेर्वीजं कमलनयने ब्रह्मरूपं नमामि ॥१॥

नेपालो यः प्रकृतिरचितः शोभितो हेमखण्डैः
क्रौञ्चै हंसैर्वनमुपवनं गुञ्जितः पक्षिभिश्च ।
ऋक्षैर्व्याघ्रैर्मृगगजरवैः सेवितो भव्य एष
अस्यां भूमौ जनकतनया दिव्यशोभाञ्चकार ॥२॥

नीला गङ्गा प्रवहति सदा दक्षिणे भारताख्ये
भैमी कोशी प्रवहति सदा पूर्वभागे प्रदेशे
वाङ्मत्या वै जलमपि सदा पश्चिमे दृश्यते च
हैमी शोभा सुनयनपथे ह्युत्तरस्यां विभाति ॥३॥

मन्त्रा दृष्टा ऋषिवरगणैः शास्त्रसारं ह्यगादीत्
विश्वामित्रो दशरथसुतं शस्त्रविद्यामपाठीत्
ब्राह्मीं विद्यां निगमलिखितां याज्ञवल्क्यो ददर्श
वन्दे सीतां जनकवसुधामार्षभूमिं विशालाम् ॥४॥

विश्वात्मासि प्रकृतिजननी चिन्मयञ्चेतनेषु
सर्वानर्थान् भजति मनुजो यस्य छायातलेषु ।
विद्याज्योतिः परमसुखदं मानवेभ्यो ददासि

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दैवीं भूतिं वितरसि रमे ? नौमि नेपालभूषाम् ॥५॥
धावन्तीं त्वां प्रियसखिजनैरुत्प्लवन्तीं तदानीं
क्रीडन्तीं वा जनककुसुमां मैथिलेषु समेषु ।
ग्रामात् ग्रामं वनमुपवनं वीथिषु शाद्वलेषु
गच्छन्तीं तां मुनिजननुतां चन्द्रज्योत्स्नां नमामि ॥६॥

(२०६९ मार्गमासस्य ३० तिथौ महोत्तरीजनपदे जयतु संस्कृतम् इति संस्थायाः शाखासमित्या आयोजितायां गोष्ठ्यां पठिता कविता)

छ) वनमुपवनम्

रम्यं पुष्पं वनमुपवनं भ्राजते दीव्यमेतत्
श्वेतं रक्तं धवलसुमनं शोभते वाटिकासु ।
रम्या पङ्क्तिः कुसुमविपिने चित्रवत् दृश्यते च
चित्ताकर्षं प्रकृतिरचना मानवानां विचित्रम् ॥१॥
मन्दं मन्दं चलति पवनो ह्यस्मदीये शरीरे
मन्दं मन्दं लसति पवनः पुष्पगन्धं विचुम्ब्य ।
मन्दं मन्दं स्फुटति पवनो नृत्यशोभां दधानो
मन्दं मन्दं भ्रमति पवनः पुष्परागं वितत्य ॥२॥
नृत्यं रम्यं रचयति तरुर्वाटिकासु विचित्रं
मन्दं स्वानं कलयति तरुर्हन्यमानः समीरैः ।
गीतं नृत्यं ललितवचनं शोभते वाटिकासु
पुष्पं, वृक्षः कलकलयुतो ह्यम्बुवेगो विभाति ॥३॥
ध्वनिं माधुर्यं वै कलयति सदा कोकिलगणः
सदा धत्ते स्वानं कुहुकुहुवचश्शोभितवनम् ।
कपोता क्रौञ्चा वै हरितविपिने भान्ति सहसा
बकानां पङ्क्तिर्वा सुगगनतले गच्छति शनैः ॥४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शुकाः सारंगा वा चटककरटा भान्ति विपिने
कदा चोड्डीयन्ते कुसुमनिचये वृक्षशिरसि ।
सुहंसा केका वा भ्रमरसुदलं शान्तविपिने
मया दृष्टा रम्या सुनयनपथं गच्छति शनैः ॥५॥

(२०६९ चैत्रमासे १७ मितौ धराननगरे जयतु संस्कृतम् संस्थायाः सुनसरी शाखायामायोजितायां संस्कृतकविगोष्ठ्यां प्रस्तुता)

बहुधर्मावलम्बिनी धरा

-सहप्रा. आनन्दप्रसादः घिमिरे

विचित्रचित्रताङ्गता हिमाल-भाल-मालिका ।
समोष्णताऽतिशीतताऽतिधर्मभिःसमायुता ॥१॥

समप्रदेशभूविशेषपर्वभूस्वरायुता ।
श्रियै चिराय जायतामनेकधर्मधारिका ॥२॥
विशन्तु लिम्वुखम्बुनः किरातिनः सनातनाः ।
सुमध्यदेशिनः सदा सुमगरातिनः सदा ॥३॥

सुब्रह्मक्षत्रविद्युताङ्घ्रिजाः विराजमानिनः ।
कुरानवौद्धखिष्टवैदिकाः स्वराष्ट्रमानिनः ॥४॥
सनातनी च पद्धतिः सुपैतृकी सुसंस्कृतिः ।
स्थिरा भवेत् सुपादचालने रणोद्यमे पथि ॥५॥

न सन्तु मार्ग-द्वेषिणः कुमार्गगामिनो न वा ।
समुन्नता धरा भवेत् पुरातनी समन्विता ॥६॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

चिद्विलासः

-सहप्रा. भीमप्रसादः कण्डेल
बाग्लुङ्जनपदीयः

यदा रिरंसा हि चितौ प्ररोहति
तदा स्वभित्तौ च जगत् प्रसर्पति ।
व्यक्त्यै कलाया निजशक्तिवैभवाद्
रन्तुं स्वतन्त्रा चितिरेव कल्पते ॥ १ ॥

स्वयञ्च भोक्त्री स्वयमेव भोग्या
भुक्तिः स्वयं सा प्रथते न भेदः ।
भुक्तौ न कुण्ठा चितिशक्तिपातात्
क्षणे क्षणे नव्यसुखानुभूतिः ॥ २ ॥

सर्वं चिदेतच्चितिरेव सर्वं
भासे न वृद्धिः पिहिते न हानिः ॥
प्रज्ञा यदेयं विततोपचीयते
भोगेऽपि चैतन्यरसो वितन्यते ॥ ३ ॥

विभान्ति सर्वे निजभासभासिता
अनेकतायाञ्च निजैकता स्थिता ॥
सर्वत्र सानन्दमयो निजोदयो
व्यक्तं स्वकीयं रमणीयरूपम् ॥ ४ ॥

नाट्ये यथा नायिकया सुनायको
यां यां कथावस्तु कलामपेक्षते ।
तां तां कलां व्यज्य रसस्य वर्धन-
स्तथैव नु स्वैरचरोऽपि चेतनः ॥ ५ ॥

इत्थञ्च विश्वात्मतया प्रवर्त्तनं
नोत्कर्षबन्धौ न च वापकर्षणम् ।
न वै भयं द्वेषविभेदवञ्चनाः
सर्वत्र चैकत्वमयी सुभावना ॥ ६ ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वेद्यं समस्तं चितिसंप्रसारणं
स्वर्णं हि तत् स्वर्णविवर्तभूषणम् ।
अखण्डतृप्तिः परिपूर्णदृष्टितः
क्रीडा पुनश्चिन्मयराज्यसृष्टितः ॥ ७ ॥

यदा स्वरूपं न समीक्ष्यते चिता
स्वतस्तदा वेद्यचितिर्भिदां गता ।
ततो निजानन्दखनेः पराङ्मुखा
चितिस्त्वतृप्ता विषयेषु संवृता ॥ ८ ॥

स्वयं प्रपूर्णाऽपि नपूर्णमानिनी
स्वतः सुतृप्ताऽपि नतृप्तभोगिनी ।
स्वयं समर्थाप्यसमर्थशालिनी
वोधस्वरूपापि तदल्पमानिनी ॥ ९ ॥

अबोधतः संकुचिता चितिर्यदि
ह्यपूर्णभावाद् विषयान् प्रधावति ।
अतृप्तितो मत्सरभावदूषिता
परान् विजेतुं यतते भिदाधिया ॥ १० ॥

चिति ह्र्यतुष्टा निजभोगमात्रतः
पराधिकारं हि हठाच्छिनत्ति सा ।
स्वस्यैव साम्राज्यमयाय वर्धते
सर्वत्र वै कामयते प्रभुत्वम् ॥ ११ ॥

एतेन वर्गस्य विभेद उप्यते
स्पर्धाप्यधिस्वं स्वयमेव सृज्यते ।
काचिच्चितिश्शासकवर्गसंस्थिता
काचिच्चितिश्शासितवर्गकुण्ठिता ॥ १२ ॥

सापेक्षसंपद्विपदोश्च तोलनात्
स्वोत्कर्षसिद्धिर्हि परापकर्षणात् ।
सुखित्वदुःखित्वविषादभावना
पदं प्रतिष्ठा पुरुषार्थसाधना ॥ १३ ॥

उच्चैस्थिता क्षेमपदाभिलाषिणी
नीचैस्थिता योगपदाभिलाषिणी ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

चित्तारतम्यं स्वयमेव निर्मितं
संघर्षमूलं कलिदं प्ररोपितम् ॥ १४ ॥

नोत्कर्षसीमा न च शाश्वती स्थिति
र्न वै समाजे सुखदा व्यवस्थितिः ॥
स्वविस्मृतिर्भौतिकवादकारणं
द्वन्द्वात्मकं द्वेषमयं प्रवर्तितम् ॥ १५ ॥

भेदेन भोगे वहुभोगवासना
जञ्जन्यते हेतुफलात्मशृङ्खला ।
स्वभेदवुद्ध्या विहिता ह्यनेकता
न तत्र सिद्धिः सुखदुःखशून्यता ॥ १६ ॥

प्रथा विभेदस्य धिया निवार्यते
सर्वात्मभावश्च सदा विराजते ।
चितेरनुज्ञा समभाववर्धनं
चितौ प्रतिष्ठा व्यवहारकौशलम् ॥ १७ ॥

अध्यात्मदृष्ट्या सकलाः कलाश्चिता
राष्ट्रे समाजे च निजे सुचालिताः ॥
सर्वाणि भद्राणि समाश्च शान्तयो
भरन्ति नित्यं सकलोदयां चितिम् ॥ १८ ॥

चिदिच्छया यज्जगतः समुद्भव-
श्चितो विलासेन भवश्च चिन्मयः ।
अहं परश्चेति मतेर्मले गते
रन्तुं चितश्चिन्मयमेव भुञ्जते ॥ १९ ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

समस्यापूर्तिः

क) दृष्टियुद्धं बभूव

-मेदिनीनाथः सुवेदी
सिम्पानी-९, लमजुङजनपदीयः

स्नाता लावण्यवाप्यां स्मितमुखकमला सन्नताङ्गी स्तनाभ्यां-
प्राप्योद्यानं सखीभिः समरमणपरा काऽपि वाला दिनान्ते ।
एकं दृष्ट्वा भ्रमन्तं स्मरसदृशतनुं मुग्धनेत्रं युवानं
कञ्चित्कालं तदानीं युवतियुवकयो 'र्दृष्टियुद्धं बभूव' ॥

स्रग्धरा बालिकेयम्
यौनं मोहं दधाना परिणयभवने कोमलाङ्गी किशोरी
लीला-हासै-र्विलोक्य प्रमुषितहृदयान् कामतुल्यान् कुमारान् ॥
एकं रम्यं कुमारं प्रणयपरवशा कान्तमात्मानुकूलं
सम्प्राप्ता मञ्चभूमिं प्रमुदितमनसा "स्रग्धरा बालिकेयम्" ॥

ख) एकाक्षरी समस्यापूर्ति र्विभिन्नविषयेषु

सुरूपधारीनयपालदेशं
दृष्ट्वैव मूर्च्छन्ति विभिन्नदेशाः
स्वाधीनकर्तुं मनसि स्थितोऽपि
कुर्वन्ति वाह्या **डडडंडडंडः** ॥

प्र.मं पदे मा.कु.ने.लिप्तभोगः
तस्मिन् प्रचण्डोऽपि च लुब्धतृष्णः
इत्थं प्रकारेण रुषा सुशान्तिः
करोति शब्दं **डडडंडडंडः** ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अहो जनादेशसुशान्तिराज्यं
सुसंविधानं सकलं विहाय ।
दलानि सत्तां प्रति शक्तियुक्तं
कुर्वन्ति नित्यं **डडडंडडंडः** ॥

नेपालमातुः सुमनः कदापि
न दृश्यते कान्तिमुखप्रसन्नम् ।
अनेन रुष्टं प्रकरोति चित्तं
डंडंडडंडं डडडं डडंडः ॥

वृत्या विहीनेन क्षुधानलेन
सन्तापितं वै प्रखरं मनो मे ।
इत्थं प्रकारेण कथं सुशान्तिः ?
भविष्यतीदं **डडडंडडंडः** ॥

पाषाणवद्भारतचीनमध्ये
स्थितोऽस्ति नित्यं नयपालदेशः
आकुम्चितोऽहं कथमत्र मुञ्चे
करोति शब्दं **डडडं डडंडः** ॥

सदा मनो मे सुहृदि प्रकुर्वत्
ददाति पीडां डडडंकुशब्दः ।
कथं सहिष्ये दिवि रात्रिकालके
न याति दूर **डडडं डडंडः** ॥

यदा यदा गच्छति भूमिकम्प-
स्तदा तदा कम्पयति स्म देहम् ।
भयस्य शब्दो **ड** इति प्रसिद्धो
डंडंडडंडं डडडंडडंडः ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शान्ते एह्येहि

-सहप्रा. चन्द्रमणिनेपालः
झापाजनपदीयः

छिन्दन्तस्ताडयन्तोऽपहरणनिरता भ्रातरं भ्रातरो येऽ-
नाथा बालाश्च केचिद् विजनन-विधवामातरो मातरो याः ।
रोधाघाताभिघातैः प्रतिदिनमनिशं नर्तनं दुर्भयस्य
शान्ते ! एह्येहि कान्ते ! त्वरितमिह वयं त्वत्प्रतीक्षारताः स्मः ॥

भाव्यं मित्रेण तावद् भवति तदरिवत् शत्रुणा मित्रवद्यत्
यत्कार्यं तन्न कार्यं यदकरणविधिः सो विधेयो विधेयः ।
बुद्धीनां वैपरीत्याद् दलतुरगजुषां त्वं हि दूरेऽसि किम्भो
शान्ते ! एह्येहि कान्ते ! त्वरितमिह वयं त्वत्प्रतीक्षारताः स्मः ॥

एकस्मै वा पदाय प्रविचलति महाभारतं नायकानाम्
नो वा योग्याः क्रियायै स्वयमभिसरणं वा परस्मै वियोक्तुम् ।
भाषन्ते ते प्रभिन्नं पदमदचलिते वा पदासीनकाले
शान्ते ! एह्येहि कान्ते ! त्वरितमिह वयं त्वत्प्रतीक्षारताः स्मः ॥

सुप्राप्ये सर्ववर्गैः शुभसरलतया राजमार्गेण लक्ष्ये
गन्तव्यं यैर्दलेशैर्भवति कथमहो धूर्त्तमार्गैः सगर्वम्,
कीटाशी चेष्टते वै भुजगमुखगतो भेकराजो न ते स्युः
शान्ते ! एह्येहि कान्ते ! त्वरितमिह वयं त्वत्प्रतीक्षारताः स्मः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

क) विना

-प्रा. डा. विष्णुराज आत्रेयः
गुल्मीजनपदीयः

अधरं विना सुरतिः कथं
विरतिः कथं सुरतं विना ।
सुभगः कथं सुभगां विना
सुभगा कथं सुभगं विना ॥

गृहिणी कथं सुगृहं विना
सुगृहं कथं गृहिणीं विना ।
शयनं कथं क्षणदां विना
क्षणदा कथं शयनं विना ॥

जलदं विना सलिलं कथं
कमलं कथं सलिलं विना
सरितां विना क्व सरित्पतिः
क्व निशापतिश्च निशां विना ।

मृदुलं कुतो महिलां विना
महिला कुतो मृदुलं विना
पुरुपः कुतः परुपं विना
परुपः कुतः पुरुषं विना ।

नयनं विना कथमीक्षणं
श्रवणं कथं स्वननं विना
रदनं विना वदनं कथं
स्वदनं कथं वदनं विना ।

मरणं विना जननं कथं
मरणं कथं जननं विना
गिरिशं विना शरणं क्व मे
तरणञ्च तच्चरणं विना ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ख) सुप्रभातम्

दिशः प्रसन्ना विदिशः प्रसन्नाः
विभावरी चाऽस्तमिता विषण्णा ।
व्रतत्यथो श्लिष्यति वातजातम्
जातं जगत्यामथ सुप्रभातम् ॥१॥

रागैः परागैर्विविधैर्मनोज्ञै
स्तैः पुष्पशब्दैस्तरवः प्रफुल्लैः ।
आमोदरूपैर्ध्वनिभिस्तदानीम्
उदीरयन्तः किल सुप्रभातम् ॥२॥

ववुः शनैः शीतलदाश्च वाता
बभुः शुभाः स्वच्छजलप्रपाताः ॥
जगुर्विहङ्गा ललितं तदानीम्
प्रस्तूयमाना नव सुप्रभातम् ॥३॥

वामाङ्गिनी वामत एव सुप्ता
वराननं कान्तियुतं च दृष्ट्वा
स्मेराननाऽऽरक्तमुखी सकामा
त्यक्तुं न शक्ता स्मर–धाम रामा ॥४॥

पति-प्रवासा चपलाऽधुनैव
प्रियान्तरेण क्षणदां क्षपित्वा ।
आलोहिताऽऽस्याऽवनता ह्रियैवम्
उषोमुखी सा स्वगृहं प्रयाति ॥५॥

स्वां वारुणीं तां विधुनोपभुक्ताम्
विहाय पूर्वां वरुणोऽनुयाति ।
पीत्वा प्रमत्तः किल वारुणीं सः,
तस्याऽरुणाऽऽभं वदनं विभाति ॥६॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

किं वा प्रतीची वरुणस्य पत्नी
हिमांशुनाऽश्लिष्य रतिं करोति ।
क्रुद्धेत्यवद्यं प्रविलोक्य प्राची
लौहित्यमास्ये भृशमादधाति ॥७॥

प्राच्या तु सार्धं वरुणं निभाल्य
क्रुद्धस्तदानीमरुणो बभूव ।
स रोषरक्तं वदनं विधाय
गृह्णन् कशां योद्धुमुत प्रवृत्तः ॥८

किञ्चाऽन्धकारेण विवृद्धवैरो
युयोध चन्द्रः प्रहरत्रयं हि
श्रान्तञ्च दृष्ट्वा मलिनं तमेवं
युद्धाय सज्जोऽरुण एष किन्नु ॥९॥

स्नानाऽभिलाषाः बटवः समेत्य
जलाशये चाऽप्यवगाह्य पूर्वाम्
कुर्वन्ति सान्ध्यं प्रणियम्य वायुम्
कामप्यपूर्वां स्थितिमाश्रयन्ते ॥१०॥

स्नानं समाप्याऽऽश्रमसम्मुखीना
द्विजाश्च मन्त्राँस्तु यथा पठन्ति ।
श्रुत्वा तरुस्था द्विजशावकाश्च
तानेव मन्त्रान् पुनरभ्यसन्ति ॥११॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

बालसन्ताष्टकम्

- खेमरञ्जनः भट्टराई 'लामिडाँडे'
सुनसरीस्थः

निम्बार्कमार्गे सततं चरन्तं
तं वैष्णवश्रेष्ठमहानुभावम् ।
वसिष्ठगोत्रोद्भववंशदीपं
श्रीबालसन्तं शरणं प्रपद्ये ॥१॥

सद्भिः सदा शोभितदिव्यमूर्तिं
प्राज्ञैः सदा मानितयोग्यपात्रम् ।
शिष्यैः सदा सेवितपुण्यगात्रं
तं वालसन्तं शरणं प्रपद्ये ॥२॥

धन्यास्ति पृथ्वी पितरौ च धन्यौ
यं प्राप्य पुत्रं खलु कृष्णभक्तम् ।
संसारभारं सकलं हरन्तं
तं वालसन्तं शरणं प्रपद्ये ॥३॥

भक्त्योपदेशेन हि यादवेन
स्वकीयसच्छिष्यगणान् मुमुक्षून् ।
भवार्णवात् तारयितुं समर्थं
तं वालसन्तं शरणं प्रपद्ये ॥४॥

सर्वेश्वरे श्याममहेशदेवे
सराधिकाकृष्णपदारविन्दे ।
येनैव भक्त्या सुसमर्पितं हृत्
तं वालसन्तं शरणं प्रपद्ये ॥५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कोशीतटे श्रीचतरासुधाम्नि
पवित्रभूमौ वलरामतीर्थे ।
संस्थापितं येन महेशलिङ्गं
तं वालसन्तं शरणं प्रपद्ये ॥६॥

विलोक्य शास्त्राणि वहूनि चात्र
पुरातनं तद् हरिद्वारक्षेत्रम् ।
प्रमाणसार्धं पुनरुद्धृतं तत्
तं बालसन्तं शरणं प्रपद्ये ॥७॥

अत्रैव राधाहरिमन्दिरस्य
निर्माणकार्यं विहितं पवित्रम् ।
प्रवर्तिता येन च कुम्भमेला
तं वालसन्तं शरणं प्रपद्ये ॥८॥

बालसन्ताष्टकं स्तोत्रं पाठमात्रेण नित्यशः ।
निर्मलं हृदयं तस्य कृष्णे भक्तिः प्रजायते ॥९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

क) विकस्वरा शठ-नीतिः

-हेमराजः पौडेल
संखुवासभाजनपदीयः

न नीतिः शिक्षायाः कृषिवनजलादेश्च सफला
न खाद्ये सौविध्यं, क्वचिदपि सुरक्षा न सुलभा ।
सदा न्यूना विद्युज्जलमपि न पानार्हमधिकं
समीचीनं नान्यत् किमपि शठतन्त्रं विकसितम् ॥

विकासार्थालापैः श्रवणमधुरैर्वञ्चनपरः
करोत्यस्मान् मुग्धान् सुहृदिव सदाऽभिन्नहृदयः ।
परार्थं सेवायां निरत इति विज्ञप्तिनिपुणः
प्रतार्यास्मान् को वा भवति जननेता गुरुतमः ॥

न साधूनां सौम्यं विगतमलमध्यात्मवचनं
न विज्ञानां श्रेयस्करमिह परामर्शवचनम् ।
परं सत्तासीनैरनवरतमालिङ्गितमहो
शठानां चातुर्यं धृतविविधरूपं विजयते ॥

वचस्यास्ते मुग्धा विकचकुसुमानां मधुरता
मनस्यन्तः पूर्णा विपमविषतुल्या कुटिलता ।
न दृष्टो नेता यस्त्यजति सहयात्रा-प्रलपनं
परं केन न्यस्तं सहमतिपथे स्वं वद पदम् ?

न राजाख्या नीतिः प्रचलति, न वा कापि विदुषां
विकासार्था नीतिः, परमिह मदोन्मत्तमनसाम् ।
दलेष्वावद्धानां विपुलधनसंसाधनवतां
शठानां देशेऽस्मिन् विकटशठनीतिर्विजयते ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ख) विलुप्ताया मातुरन्वेषणम्

नवीनयुगसन्ध्यायां प्रबुद्धोऽहं वुभुक्षया ।
पीडितोऽन्वेषयन्नस्मि लुप्तां नेपालमातरम् ॥
नवीनरागरक्तायां कान्तिपुर्यां परिभ्रमन् ।
भवनानि च लौहाश्मवहुलानि निभालयन् ॥

न तस्या मौलिकं रूपं साक्षात्कर्तुमहं क्षमः ।
तस्याः प्रतिकृतिं, किन्तु पश्यामि वहुरूपिणीम् ॥
नाऽधुना भानुभक्तस्य कविता सहजा स्वयम् ।
क्षमा प्रतीयते तस्या लज्जामावृत्य रक्षितुम् ॥

तरुणीपरिधानेषु भृशं सङ्कुचिता क्वचित् ।
विशृङ्खला क्वचिन्नृत्यशालासु मदविह्वला ॥
क्वचिद् विकिरसम्पाते निमग्नेव कृशाकृतिः ।
दृश्यते सा स्वयं रुग्णा कुत्रचिद् विरुजालये ॥

मन्ये न जनकः, सीता, वुद्धो वा भृकुटी पुनः ।
उत्पत्स्यन्ते नवीभूय तामुत्थापयितुं क्षमाः ॥
अधुना मधुशालासु तां नर्तयितुमुद्यताः ।
सभ्यम्मन्याश्चिकीर्षन्ति तस्या वस्त्रापकर्षणम् ॥

बलात्कृतेव सम्भूय घातकैः राजनेतृभिः ।
क्वचिन्म्लानानना क्षीणा विरक्ता सा विलोक्यते ॥
या पुराऽऽसीन्मया दृष्टा स्वान्तःसुखविलासिनी ।
सुसंस्कारवती, सौम्या, सरला स्वाभिमानिनी ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जाताऽधुना सुमालेव ग्रीष्मे निपतिता भुवि ।
तामुन्नेतुमशक्तोऽयं करौ मे वेपतेतराम् ॥
मन्ये तथा व्यवसितं दृष्ट्वा कुण्ठितमानसः ।
पार्श्ववर्ती शठः कोऽपि गर्ते मां पातयिष्यति ॥

तथापि ममताबद्धः साश्रुलोलविलोचनः ।
अन्वेषयन्नस्मि पूर्वप्रकृतिस्थां तु मातरम् ॥
प्रफुल्लसुमनोल्लासिवाटिकासु विकस्वरा ।
उषोऽरुणेषु शैलानां शिखरेषु विभासिता ॥

नदीनां सलिले पूते निर्मले प्रतिविम्विता ।
स्याद् वा श्यामलसस्येषु सा क्षेत्रेषु तरङ्गिता ॥
कूपवापीतडागेषु क्रीडन्ती वाऽपि वीथिषु ।
यत्र कुत्रापि भूयात् सा मम जीवनदायिनी ॥

कृपया ब्रूहि दृष्टा चेत्सखे माता मम त्वया ।
तां प्रसन्नाननां द्रष्टुं भृशमुत्कण्ठते मनः ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

क) मुक्तकम्

-सहप्रा. ध्रुवप्रसादः भट्टराई
खोटाङ्जनपदीयः

कोकानामेकवर्गः शमनगतियुतो दर्शने साधुरूपः
भूमावस्यां मिलित्वा कपटपटुतया गर्भगेहे प्रविष्टः ।
वर्गोऽसौ साम्प्रतं तां रसबलरहितां सौरभेयीं प्रकल्प्य
भोक्तुं हन्तीति दृष्ट्वा न गलति हृदयं जीवितं हन्त ! दुःखम् !

ख) कथं जयतु संस्कृतम् ?

ये जल्पन्ति मुहुर्मुहुर्वहुविधं सम्भाषणे भीषणे
हिन्दूनां धरणीतले च सततमावश्यकं संस्कृतम् ।
सर्वे विज्ञवरास्त एव हि पुनः कुर्वन्ति मौनं व्रत
मस्मिन् वाङ्मय आहते व्यपगते भीष्मो यथा भारते ॥

केचित् संस्कृतद्वेषिणोऽथ कतिचित् सर्वाधिकाराधिपा
भाषन्तेऽमरवाङ्मयं मृतमिति किं पठ्यते भोऽधुना ।
तेषामेव मतं विचार्य सुरवाक् विद्यालयाद् गर्हिता ।
भाषा-संस्कृति - सभ्यता विलुलिता जीवेत् कथं संस्कृतम् ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

संस्कृतभाषा वैदिकं ज्ञानञ्च

-प्रा.डा. दुर्गादत्तशर्मा
वागलुङ्जनपदीयः

ब्राह्मणस्यैव भाषेयं नेतरेषामिति ब्रुवन् ।
पुरावृत्तानभिज्ञश्चेत्कश्चिज्जल्पति जल्पतु ॥१॥
किन्तु संस्कृतभाषेयं पुरा सर्वजनैर्मुदा ।
पठ्यते स्मेति सन्दर्भः स्मर्यते चैतिहासिकः ॥२॥
अजेर्व्यघञपोः सूत्रे भूदेवरथकारयोः ।
उदाजहार संवादं महाभाष्ये पतञ्जलिः ॥३॥
संस्कृते व्याहरन्ति स्म रथकारादयोऽपि च ।
पठन्ति संस्कृतं सम्यगित्येतेनावधार्यते ॥४॥
भोजप्रबन्धेऽपि तथा साहसाङ्कस्य भूपतेः ।
पटकारस्य चोदन्तः काव्यस्य विषये स्थितः ॥५॥
वेदभाष्यस्य कर्तारो दृश्यन्ते क्षत्रियादयः
योगी नरहरिर्नाथः प्रपन्नाद्याश्च सम्प्रति ॥६॥
पुरोपनिषदां भाष्यं कृतं **शाहजहाँ**दिभिः ।
यवनैरूर्दुभाषायामिति च श्रूयते पुनः ॥७॥
शर्मण्यदेशवास्तव्यः स विद्वान् मैक्समूलरः ।
ऋग्वेदभाष्यमलिखत् विश्वेऽस्मिन्नस्ति विश्रुतः ॥८॥
अत एव वुभुत्सूनां नृणां वेदे कदाचन ।
क्वचिच्च प्रतिबन्धोऽयं जातौ वर्णे न दृश्यते ॥९॥
क्वचित्मृतावुल्लिखितेऽप्येवमङ्गीकृतं न तत् ।
मानवैरिति वंहिष्ठव्यवहारेण दृश्यते ॥१०॥
सर्वलोकहितार्थाय मुनिभिस्तत्त्वदर्शिभिः
स्फुटीकृतमिदं ज्ञानं पठ्यते सर्वमानवैः ॥११॥
वुभुत्साहीनमतयः ये केचिच्च पृथग्जनाः ।
न दत्तं वैदिकं ज्ञानमस्मभ्यं ब्राह्मणैरिति ॥१२॥
अधिक्षिपन्तो भूदेवान् स्थूलहस्तावलेपिनः ।
किमर्थं कलहायन्ते न जानीमो वयं पुनः ॥१३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अनुभूतिः

-पूर्वसचिवः शरत्कुमारः भट्टराई
खोटाङ्जनपदीयः

सदेव भासते सर्वं नेह नानास्ति किञ्चन ।
इत्यादि श्रुतिवाक्यं च शंसन्ति वेदवादिनः ॥१॥
अध्यासाद् दृश्यते लोकस्तत्त्वतस्तु न दृश्यते ।
ज्ञानेन तन्निवर्त्येत यथा रजतशुक्तिकम् ॥२॥
अतद्वस्तुनि तद्वुद्धिः सैव वन्धनकारणम् ।
अतद्वस्तु परित्यज्य तद्वस्तु परिचिन्तयेत् ॥३॥
संभुज्य कर्म प्रारव्धमन्यकर्मान्तराणि च ।
ज्ञानेन भस्मसात् कृत्वा स्वेन रूपेण राजते ॥४॥

अध्यासवशगो लोको ह्यध्यासोऽयं जगत्स्वयम् ।
अध्यासं सर्वमेनं वै ज्ञात्वा व्रह्मैव चिन्तयेत् ॥५॥
कार्यकारणसंयुक्तो लोकोऽयं कार्यमेव हि ।
सम्पूर्णकार्यमुत्सृज्य कारणे प्रविलापयेत् ॥६॥
तत्त्वमस्यादिवाक्यानि संयोज्य श्रवणादिभिः ।
प्राप्यते वास्तवं रूपं वदन्ति श्रुतयो यथा ॥७॥
आशयेनाऽऽवृता बुद्धिर्यावद् भवति देहिनाम् ।
तावद् भ्रमति जीवोऽयं सोऽयं संसार इष्यते ॥८॥

तदाशयं हि संशोध्य त्यक्त्वा मोहादिदुर्गुणान् ।
ज्ञात्वैकं परमं तत्त्वं ब्रह्मरूपेण तिष्ठतु ॥९॥
दृश्यं स्वप्न समानञ्च द्रष्टा सर्वत्र विद्यते ।
वस्तुतो दृश्यमानो हि संसारोऽयं न तत्त्वतः ॥१०॥
विज्ञातारमरे केन जानीयादिति सम्भ्रमः ।
विद्यते वेदवाक्येषु चिन्तनीयं सदा हि तत् ॥११॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शान्तिः

-सहप्रा. श्रीरामः अधिकारी
काभ्रेपलाञ्चोकजनपदीयः

गृहशान्तिः कथं दूरे विकटे वात्र प्रापिता ।
कोलाहलं वैमनस्यं दौर्भाग्यमिह संस्थितम् ॥१॥
वधवन्धतर्जनादिदुष्कार्यैर्बन्धुहिंसया
मृता मानवता किं भो शान्तिः प्रीतिर्भृशं हता ॥२॥

परोपकारः पुण्याय पापं दुःखाय कथ्यते ।
व्यासस्य वचनं यस्मात्स्वयं देशोऽथ दुःखितः ॥४॥
अहो! हैमवती धारा स्वच्छसुन्दरनिर्मला
वहति नित्यमत्रैव क्व सा शान्तिः पलायिता ॥५॥

किं वा बलादपहृता निगीर्णा व्यभिचारिभिः ।
किं वा बलात्कृता शान्तिवधूः कामान्धचारिभिः ॥
यदि लङ्कावने सास्ति राक्षसैः परिवेष्टिता ।
शोषिताः पीडिता दुष्टै राष्ट्रोन्नतिपराङ्मुखैः ॥७॥

रामदूतः कपीशश्च गच्छेदुल्लङ्घ्य भूधरान् ।
ज्ञायेत दुर्गमार्गाणां यतोऽशान्तिर्विनिर्गता ॥८॥
दुर्गमभेद्यं संजित्य दानवान् राष्ट्रसेवकाः ।
नेपालेऽस्मिन् शान्तिसीतामालपन्तु प्रतिष्ठिताम् ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विजयतां संस्कृतम्

-जनार्दनः घिमिरे
दोलखाजनपदीयः

पूर्वं या सहभावना 'जयतु' भो आसीत् परस्मैपदे
सर्वेषां दृढबद्धहस्तयुगलं पौरस्त्यसंरक्षणे ।
आसन् संस्कृतवाचि सम्मतधियो हार्दी रतिं तन्वते
तस्या जागरणं भवेदिदिति जना एकीभवन्ति स्म ते ॥

अन्ये ये विलसन्ति, संस्कृतपदं तैरुच्यते वा नवा,
अन्यस्वैः परवर्तिभिः सुरसरित् पेपीयते वा न वा ।
भो चिन्ता न विधीयतां विजयतामुच्चार्यमाणं सदा
आत्मा रम्यत आत्मनेपदयुजे कोऽर्थः परेषां भवेत् ?

ते नायान्ति कदापि संस्कृतहिते आशां न कुर्युर्जना
तेषामाश्रयणं महाभयकरं त्याज्यं परस्मैपदम् ।
त्यक्तव्यो विषयो वृथा शिरसि भो मा स्थाप्यतां त्यज्यताम्
अन्येषां परवर्तिनां वशगता भो भावना हीयताम् ॥

स्वात्मानं विनिवेद्य झङ्कृतयुता भूत्वा वयं जागृता
आत्मज्ञान-प्रकाशमानहृदयाः संसारसम्पोषकाः ।
आत्मार्थे पृथिवीं त्यजेदिति कथां हार्दीं च संकल्पयन्
त्याज्मेयं मणिति र्जयत्विति पदं स्वत्वं समर्थाप्यताम् ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विभाति नेपालधरा स्वकान्त्या

सौभाग्यधन्या जननीह सीता
बुद्धोऽपि जातोऽवनिशान्तिदूतः ।
अत्युन्नता पर्वतराजमाला
विभाति नेपालधरा स्वकान्त्या ॥

शोभायमाना वहुशश्च नद्यः
सन्त्यत्र नानाविधपक्षिवर्गाः ।
जल्पन्ति गुञ्जन्ति च केकिवर्गा
विभाति नेपालधरा स्वकान्त्या ॥

बहूनि भान्ति प्रियमन्दिराणि
घनानि रम्याणि च काननानि ।
सौन्दर्ययुक्ता च पवित्रगङ्गा
विभाति नेपालधरा स्वकान्त्या ॥

जीर्णानि देवस्थलमन्दिराणि
शुष्काणि गङ्गानिकटे तटानि ।
नष्टानि सम्पद्मयकाननानि
विभाति नेपालधरा स्वकान्त्या ॥

आसीत् पुरा वैदिकहिन्दुराज्यं
तदा हि धर्म्यं खलु लोकराज्यम् ।
धर्मक्षयात् दुर्जनदर्पभीता ।
विभाति नेपालधरा स्वकान्त्या ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विस्मृता देववाणी

-विष्णुहरिः पौडेल

नित्यं ध्यायन् मुहुरनुसरन् सर्वथा गौरभाषाम्,
त्यक्त्वा स्मार्तं विधिनियमनं कोविदं कालिदासम् ।
सोऽहं विद्वज्जनपरिषदि काकवद् हंसमध्ये
लज्जाबोधो भवति बहुधा विस्मृता देववाणी ॥

बाल्येऽधीता पुलकितधिया कौमुदी पाणिनीया
पश्चाद् ज्ञाता सरसकविता मेघदूतादिरम्या ।
छन्दो ज्ञातं प्रयतमनसा ध्यायता दर्शनानि ।
धिग्वार्धक्याद् विगलितधिया विस्मृता देववाणी ॥

कार्यं करोमि

-प्रा. अच्युतरमणोऽधिकारी
खोटाङ्जनपदीयः

रूपं न वा नाम न यस्य विद्यते
तथापि संस्थं नयनाभिरामम् ।
सृष्टि-स्थिति-त्राणद-कर्मपद्धतौ
सदा रतं तं प्रणमामि सन्तम् ।

येनैव रूपेण समग्रकर्मणा,
सृष्टि-स्थिति-साधुसुपोषणे रताः ।
ते देवदेवेशविशेषपालकाः
नमामि विश्वेश्वरकर्मचालकम् ।

अज्ञानमार्गेण विमार्गगामिना
मयापि दृष्टं तव दिव्यरूपम् ।
दृष्टं च सृष्टं शमनीयवर्त्मनि
करोमि कार्यं विधिनोपपादितम् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वर्तमानकाल:

-माधवप्रसादः लामिछाने
बर्दियाजनपदीयः

आचारहीनः सहकार्यहीनः
स जन्तुतुल्यो निजकार्यलीनः
विचारहीनः पदवीविहीनो
न शोभते पामरभाक् समानः ।

मृगेन्द्रदन्तैर्विपिनेषु तिष्ठन्
ग्रामेषु ग्रामेषु नराँश्च त्रासयन् ।
निर्दोषमर्त्यान् सरलान् निहत्य
रक्तं पिवन् भ्राम्यति वर्तमानः ।

ग्रामाद् गतो भीषणरूपकार्यः
सर्वत्र सन्दर्शितभीमरुपः
आक्रम्य पौरान् निखिलान् कठोर
इतस्ततो धावति वर्तमानः ।

निकृष्टस्वार्थं च पुरो निधाय
महारजोधूमविकीर्णघोरः ।
रोगस्वरूपेण विवर्तमानः
स घातुको धावति वर्तमान्ः

लोकव्यवस्थाञ्च निराकरिष्णु-
र्विभिन्नदम्भिदलपादपद्मः ।
परस्परं द्वन्द्वकरो निरीहो
नीचैस्सदा गच्छति वर्तमानः ॥

प्रश्नैश्च प्रश्नैश्च विशेषदीनः
सयुक्तितर्कोत्तरवाक्यहीनः
देशे विदेशे भुवने जने च
निःशेषदोषाकरवर्तमानः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

क) गणेशचत्वारिंशी

- डा. लक्ष्मीकान्तः पन्थी
गुल्मीजनपदीयः

श्रीगणेशो विजयते सिद्धिबुद्धिपतिश्च यः ।
गौरीगिरीशयोः पुत्रः शुभलाभकरः सदा ॥
गणेश ! त्वं दुःखहर्ता विघ्नहर्ता शुभप्रदः ।
शिवयोर्नन्दनोऽसि त्वं कुरुषे लोकनन्दनम् ॥१॥

त्वं देवगणनेतासि जनानां सुखदायकः ।
विनायकोऽसि विश्वस्य सिद्धिबुद्धिविधायकः ॥
गजवक्त्रोऽप्येकदन्तः शुण्डनासाविराजितः ।
वक्रतुण्डोऽपि सुमुखो विघ्नहा वरदः शिवः ॥२॥

जगत्सुखकरं शीलं पितरौ पार्वतीश्वरौ ।
षडाननोऽनुजो यस्य धन्यो गणपतिः स्वयम् ॥
त्रिपुण्ड्रं शोभते भाले त्रिशूलेन सुचिह्नितम् ।
श्रोतारौ जगतां दुःखं शूर्पकर्णौ सुशोभनौ ॥३॥

अमूल्यरत्नखचितं मुक्तामणिविराजितम्
शिरस्त्रं मुकुटं यस्य भक्तचिन्ताहरं शुभम् ॥
कुठारपाशौ करयोर्दुष्टान् दमयितुं धृतौ ।
सतः पालयितुं मुद्रामोदके परयोर्धृते ॥४॥

धृतयज्ञोपवीतस्य पीताम्बरधरस्य ते ।
भोजनार्थं मोदकानि फलात् प्रियतराणि किम् ॥
ऋद्धिसिद्धी तवोपान्ते सदा जागरिते स्थिते ।
ताभ्यां सुसेवितोऽसि त्वं वाहनार्थोऽस्ति मूषकः ॥५॥

अद्भुता ते जन्मकथा विग्रहोऽनुपमस्तव ।
जगत्परिक्रमेऽप्यग्रः कोऽसौ मूषकवाहनः ॥
महिमानं वर्णयितुं शक्नुवन्ति जना न ते ।
क्षमः सर्वं वर्णयितुं यदि कश्चित् कविर्भवेत् ॥६॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यतो हि ते जन्मवृत्तं दृष्टं काव्यात्मकं मया ।
अतः कवयितुं कोऽपि सामान्यः शक्नुयात् कथम् ॥
आयातः कोऽपि दनुजः शिवरूपधरः पुरा ।
गौरीगृहे छद्मवेषी तस्याश्छलनमानसः ॥७॥

एवंविधं समायान्तं जालिकं छद्मवेशकम् ।
ज्ञात्वा स्नानगृहे याता स्नानार्थं तत्र पार्वती ॥॥
स्नानकार्ये सुसंलग्ना शरीरमलमर्दिनी ।
सा तत्र हस्त आयातं मलपिण्डं स्वजीवयत् ॥८॥

पुत्ररूपधरं वालं सृजन्तीं पार्वतीं प्रति ।
सोऽपि वार्तांञ्चकारेत्थं–कोऽहम्, पुत्रोऽसि मे प्रियः ॥
मातः किं करवाणीह त्वदर्थं नियुनक्तु माम् ।
प्रतीहारे तिष्ठ पुत्र ! रक्षकः प्रहरी भव ॥९॥

एवं रक्षन् प्रतीहारे दनुजं छलमानसम्
गौरीगृहे प्रविशन्तं भवानेवावरोधयत् ॥
क्वचिद् विघ्ने समायाते प्रतीहारस्थितो यदि,
न किञ्चिद् भयमायाति विघ्नहर्ता यतो भवान् ॥१०॥

वहिर्गतः समागच्छन् भवन्तं दृष्टवान् शिवः ।
प्रतीहारे सुतिष्ठन्तं कोऽसि त्वमिति पृष्टवान् ॥
गौरीपुत्रोऽस्म्यहं द्वारपालः पादौ न चालय ।
पृष्ट्वा स्वमातरं पूर्वमागच्छामि स्थिरो भव ॥११॥

इत्युक्तवति तद्वाक्यं समुपेक्ष्य शिवः स्वयम्
गृहं प्रवेष्टुमारेभे युद्धायाग्रेसरो भवान् ॥॥
जाते युद्धे त्रिशूलेन शिवस्ते शिर आच्छिनत् ।
अविचार्य द्रुतं व्योम्नि शिरः पुष्पमिवोद्गतम् ॥१२॥

अन्तःपुरं समागत्य शिवोऽपृच्छत् शिवां निजाम् ।
शिवे ! प्रियतमे ! पुत्रं त्वं कदालभथाः सति ! ॥
वार्तायामुभयोर्जन्मकथां तेऽश्रावयत् शिवा ।
शिवाद् युद्धे वधं ज्ञात्वा साऽत्यन्तं दुःखिताऽभवत् ॥१३॥

अहो ! अनर्थो भवताऽविचारेण कृतो बहुः ।
अन्विष्य शिर आनीय पुत्रं मे जीवितं कुरु ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

संशोधनीयः स्वकृतो यद्यनर्थो मया कृतः ।
शिवोऽपीत्थं विचार्यैव शिरोऽन्वेष्टुं बहिर्गतः ॥१४॥

गवेषणेऽपि यत्नेन तच्छिरो नैव लब्धवान् ।
एकं हस्तिशिरः प्राप्य तदादाय निवृत्तवान् ॥
स्वहस्ताभ्यां शिरो धृत्वा रुण्डोपरि निधाय तत् ।
प्राणप्रतिष्ठां कृतवानमृतञ्चाप्यपाययत् ॥१५॥

विद्यां सुविपुलां बुद्धिं दत्तवान् स्वसुताय सः ।
अतो भवान् विघ्नहर्ता बुद्धिदः सुखदोऽभवत् ॥
भवान् चन्द्रमसे शापं दत्वा तमकलङ्कयत् ।
अतो भाद्रचतुर्थ्यां हि न कार्यं चन्द्रदर्शनम् ॥१६॥

परीक्षां कर्तुकामस्ते महादेवः सुतावुभौ ।
परिक्रमयितुं पृथ्वीमादेशमकरोदहो ! ॥
षडाननो वाहनं स्वं मयूरमधिरूढवान् ।
भवितुं प्रथमः शीघ्रं सह तेन समुद्गतः ॥१७॥

उपायान्तरमन्विष्य मौनं धृत्वाऽतिबुद्धिमान् ।
भूमौ विलिख्य 'रामे'ति परिक्रमितवान् भवान् ॥
ततः स्वौ पितरौ भूमेराकाशादतिशायितौ ।
प्रणम्य गौरीगिरिशौ परिक्रमितवान् भवान् ॥१८॥

विलोक्य विमलां बुद्धिं भवतः पार्वतीश्वरः ।
परिक्रमफलं भूमेः प्रथमं त्वामघोषयत् ॥
ततोऽमराणां 'प्रथमपूज्यत्वं' दत्तवान् वरम् ।
गणानां नायकत्वं च **गणेश** इति नाम च ॥१९॥

यस्मिन् कस्मिन् कृते कार्ये तव नाम गृणन्ति ये ।
कुर्वन्ति स्मरणं तेषां निर्विघ्नं कर्म सिद्ध्यति ॥
भवान् सुमङ्गलतनुर्गजवक्त्रोऽतिसुन्दरः ।
ये भवन्तं संस्मरन्ति तेषां बुद्धिर्विवर्द्धते ॥२०॥

वैक्रमेऽब्दे फाल्गुनिके त्रिषड्व्योमाक्षिसम्मिते ।
लक्ष्मीकान्तो गणेशस्य चत्वारिंशीमिहालिखत् ॥
गणेशभक्ता सततं चत्वारिंशीं पठन्ति ये ।
धनधान्ये बुद्धिविद्ये गेहानन्दं भजन्ति ते ॥२१॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ख) श्रीकृष्णार्पणमस्तु

श्रीकृष्णार्पणमस्तु वाल्यसमये चापल्यमस्मत्कृतम्,
मातुः क्रोडगतेऽपि बाहुचरणैर्माता समापीडिता ।
निष्क्रान्ते वहिरागतेऽपि च तदा मात्रा समालिङ्गिता,
दुःखं केवलमर्पितं तदधिकं दातुं न शक्तोऽभवम् ॥१॥

श्रीकृष्णार्पणमस्तु शैशवगते दुग्धेन वा निद्रया,
पीडायां विगतो व्यथां निगदितुं नैवाभवं सक्षमः ।
किं दुग्धं पिबतीत्यसौ किमु न वा शेते च दोलोपरि,
सोऽहं शैशवकालदुःखभरितो मात्रा भृशं चिन्तितः ॥२॥

श्रीकृष्णार्पणमस्तु पूर्ववयसि द्रागेव पित्रानुगः
सोऽहं साक्षरतां गतस्तदनु किं साङ्कः सुलेखैर्युतः ।
पुत्रो 'राक्षस' इत्युपाधिविलसन्मा स्यादसौ चिन्तय-
न्नित्थ वालककाल उत्पथगतः पित्रा सदा रक्षितः ॥३॥

श्रीकृष्णार्पणमस्तु दुःखभरितः पौगण्डकालो मम,
यस्मिँस्त्यक्तगृहः प्रवासमगमं वर्षाधिका यापिताः ।
शय्यार्थं न मयाऽत्र खाद्यविषये चिन्ता न काचित् कृता
विद्यां लब्धुमभीप्सितेन सततं सा भारती संश्रिता ॥४॥

श्रीकृष्णार्पणमस्तु प्रोषितवतः कालो न व्यर्थीकृतः
प्रातर्वा निशि वा दिनेऽप्यधिगते विद्या समासादिता ।
तौ मातापितरौ सदा गृहभवौ किञ्चिन्न संसेवितौ
यौ स्तो मे जनिरादिकारणमयौ स्वर्भूमिमात्राधिकौ ॥५॥

श्रीकृष्णार्पणमस्तु कालकलिते कैशोरभावे मया
नान्येषामुपकारकारणगतो नैवोपदेशः कृतः ।
किं किं स्यादिति चिन्तनेन मनसा या राष्ट्रसेवा कृता,
चात्मार्थं स्वसमाश्रितार्थमपि यद् धान्यं धनं नार्जितम् ॥६॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्रीकृष्णार्पणमस्तु यौवनगते काले मयोद्वाहिता,
जाया संसृतिकारणं निगदिता शास्त्रैः पुराणैरपि ।
भक्तिर्भावनयाऽऽश्रिताऽस्तु विपुला तत्साधना चेतना,
संयुक्ता मनसि स्फुरन्त्विह जनौ याभिर्हरिः प्रीयताम् ॥७॥

श्रीकृष्णार्पणमस्तु वाक्यमुदितं यद्यन्मया स्वाननात्,
सत्यं तद्रहितं हिताहितकरं यद्वा प्रियं वाप्रियम् ।
तस्यार्थान्तरमस्तु कृष्णनमनं तत्प्रार्थनापूजने
नो जाने मम जीवने कतिविधं वाक्यं समुच्चारितम् ॥८॥

श्रीकृष्णार्पणमस्तु यत्प्रपठिताः पाठा गुरोः सन्निधौ,
ज्ञातार्था न तथाऽथवा गुरुजनैः संशोध्य संबाधिताः ।
काव्ये व्याकरणेऽथवाऽमरकृतौ वोध्यस्तदर्थो मयि
कृष्णे भक्तिकरो भवेत् स हि यतः शास्त्रैकगम्यो महान् ॥९॥

श्रीकृष्णार्पणमस्तु नेत्रविषयीभूता यथेष्टं मम
आ शृङ्गादधिसागरान्तरगता भूमेः प्रदेशाः कति ।
ग्राम्या नागरिका भवन्तु वनजाः कृष्णस्य यात्रोत्सवै
रम्यै र्देवसुविग्रहैर्विजयिना कृष्णेन व्याप्तं जगत् ॥१०॥

श्रीकृष्णार्पणमस्तु वाहुचरणैर्यत्राक्रमो मेऽभवत्
सर्वः कृष्णमहोत्सवे भवतु तत् सार्थः समर्थोऽपि च ।
कृष्णार्थं मम वक्त्रदृग्भुजपदैर्यद्यत्कृतं कारितम्
तत्सर्वं मनसा निवेदितमहो ! कृष्णोऽस्ति सर्वं मम ॥११॥

श्रीकृष्णार्पणमस्तु प्रौढसमये यद्यन्मयाऽऽसादितम्
विद्यां वित्तमथापि गेहमथवा वस्त्रं च धर्मार्जितम् ।
मानुष्यं पुनरत्र विप्रजननं ज्ञानं कवित्वं च मे
श्रीकृष्णार्पणमस्तु वस्तु सकलं कृष्णः शरण्यो मम ॥१२॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

क) हा गण्डकि ! त्वं कथमत्र लोहिता

-हिमालय : भट्टराई

यदुच्यते तन्न कदापि पाल्यते
यत् पाल्यते तन्न कदापि कथ्यते !
यद् गोप्यते तन्न कदापि दर्श्यते
यद् भ्रामकं तत्तु सदा प्रदर्श्यते !!!१॥

किं श्रूयते ध्वस्तगृहङ्गता कथा
क्व कल्प्यते वन्धुविनाशनव्यथा !
विधीयते किं रुधिराऽभिषेचनं
क्व दृश्यते दग्धमनोऽभिषिञ्चनम् !!!२॥

वर्षाक्षये कुत्र मयूरनर्तनं
वंशक्षये कुत्र च हर्षवर्धनम् !
शान्तिक्षये कुत्र न शोकवर्षणं ?
हर्षक्षये नो मरणं न जीवनम् !!!३॥

'हाहाकृतं' कुत्र च नास्त्यहर्निशं ?
व्याप्तं न कुत्रास्ति रणाग्निना विषम् !
विलोकितं केन सुशीतलं जलं ?
क्व विद्यते शान्तिसुधायुतं स्थलम् !!!४॥

स्वान्त:स्थिता शीतगता स्वतन्त्रता
मद्यालयद्वारगता मनोरथा: !
सुशान्तिता क्रन्दननादगुञ्जिता
भूम्यर्चना रोदनरक्तरञ्जिता !!!५॥

सुपुत्र ! हे वुद्ध ! सुशान्तिमन्त्र !
दयानिधे ! मानवधर्ममित्र !
विलोकय त्वं किमिदं विचित्रं
जलं वहत्यत्र विरक्तिलिप्तम् !!!६॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विधीयते केन च विश्वबन्धुता ?
जना न के सन्ति विरक्तिरञ्जिताः ?
शस्त्रास्त्रमध्ये क्व गता सुवन्धुता ?
हा गण्डकि ! त्वं कथमत्र लोहिता !!!७॥

ख) नमत रे मनुजाः ! सकलं खलम् !!!

सकल–विश्व–विनाशन–सक्षमं
निखिल–मानव–मारण–तत्परम् !
असुरलोक–चरित्र–धुरन्धरं
नमत रे मनुजाः ! सकलं खलम् !!!१॥

जगति विस्तृत–लोहित–लोचनं
वितत–खड्ग–बलेन रणे रतम् !
भुजग–भोगसमं हि भयङ्करं
नमत रे मनुजाः ! सकलं खलम् !!!२॥

रुधिर–शोषण–मानव–मारकं
मशकवन्मृदुल–ध्वनि–कारकम् !
सुखहरं भुवने विहितच्छलं
नमत रे मनुजाः ! सकलं खलम् !!!३॥

मनसि कण्टक–मात्र–सुधारकं
कुटिलगामितया जन–वञ्चकम् !
दनुज–राहुसमं ग्रहणे समम्
नमत रे मनुजाः ! सकलं खलम् !!!४॥

कलह–कारण–लोक–विनाशकं
प्रलय–मेघसमं भवभञ्जकम् !
विपुल–दानव–तन्त्र–विचक्षणं
नमत रे मनुजाः ! सकलं खलम् !!!६॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ग) कुरु राजनीतिम् !!!

प्रचण्डं गिरिजां शेरं माकुनें यः स्मरिष्यति !
नेपालभूतले तस्य सर्वोन्नतिर्भविष्यति ‼
श्रीसिंहवाहिनीं ध्यात्वा भवेत् कस्य कदोन्नतिः ?
शेरबाहादुरं ध्यात्वा भवेच्छीघ्रं पदोन्नतिः ‼

पार्वतीं गिरिजां ध्यात्वा भवेन्मुक्तिर्यदा कदा ?
कोइरालां गिरिजां ध्यात्वा मन्त्री भवति सर्वदा ‼
श्रीकृष्णं माधवं ध्यात्वा वृन्दावनं गमिष्यथ !
नेपालं माधवं ध्यात्वा सत्तास्वादं ग्रहीष्यथ ‼

चण्डं मुण्डं यदि ध्यायेत् दैत्यतन्त्रं वरिष्यति ‼
प्रचण्डं सबलं ध्यात्वा गणतन्त्रं भविष्यति ‼
रामं सीतापतिं ध्यात्वा राजवादी भविष्यति !
वावुरामं सदा ध्यात्वा माओवादी भविष्यति ‼

प्रचण्ड-शेरौ गिरिजाप्रसादः
श्रीमाकुने भान्ति दलेश्वरेषु !
सत्तेश्वराः सन्ति धनेश्वराः किं
महेश्वरा वा परमेश्वरा वा ‼

वुभुक्षितैर्भाषणमत्र भुज्यते
पिपासितैर्भापणमेव पीयते
किं लोकतन्त्रस्य फलं सुसेव्यते ?
क्व संविधानस्य सभाऽत्र दृश्यते !!!

क्व संविधानस्य सभा पुरस्कृता !!!
क्व संविधानस्य सभा निमन्त्रिता !!!
न दन्तकालीं न च भद्रकालीं ।
न मुक्तिनाथं न तु शम्भुनाथम् !!!

नेपालदेशे यदि मुक्तिवाञ्छा
विराजते चेद् भज वाई.सी.एलम् ।
न बुद्धदेवं न च शुद्धदेवं
न चन्द्रदेवं न च सूर्यदेवम् !

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नेपालदेशे जनमुक्तिवाञ्छा
विराजते चेद् भज मुक्तिमोर्चाम् !!!

न शास्त्रनीतिं न च ज्ञाननीतिं
नोद्योगनीतिं न विकासनीतिम् !
नेपालदेशस्य सुनामवाञ्छा
विराजते चेत् कुरु राजनीतिम् !!

न साधुनीतिं न च दण्डनीतिं
चाणक्यनीतिं न च कूटनीतिम् !
नेपालदेशे यदि कीर्तिवाञ्छा
विराजते चेत् कुरु राजनीतिम् !!

प्रचण्डनीतिं गिरिजासुनीतिं
विद्यार्थिसङ्घस्य विचित्रनीतिम् !
विलोक्य सर्वाष्टदलीयनीतिं
शीघ्रातिशीघ्रं कुरु राजनीतिम् !!

घ) लोकतन्त्रम्- १

स्वागतं स्वागतं लोकतन्त्रं नवं
स्वागतं स्वागतं लोकतन्त्रं नवं

सूचना सन्दृश्यतां भाषणं विश्रूयतां
कविता विरच्यतां वाचनं विधीयताम् ।
इच्छास्ति चेत् पाठ्यतां नास्ति चेन्न पाठ्यतां
प्राध्यापकसङ्घे तु गोष्ठी सुसञ्चाल्यताम् ।

अध्ययनं क्रियतां वा कक्षैव त्यज्यतां
विद्यार्थि-निर्वाचने तु बहुमतं लभ्यताम् ।
विज्ञप्तिः प्रस्तूयताम् आक्षेपो विधीयताम्
अध्ययनाध्यापनं सर्वदा विरम्यताम् ।

विध्वंसो विधीयतां कर्तव्यं विस्मर्यतां
विश्वविद्यालयस्यैव चिता विनिर्मीयताम् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

लोकतन्त्रम्-२

किमर्थं जनाः स्वर्गलोकं भजन्ति
समस्तप्रदं कल्पवृक्षं वदन्ति
न जानन्ति किं शान्तिसौभाग्यमन्त्रम् ?
अहो स्वागतं स्वागतं लोकतन्त्रम् ॥

कदाऽऽतङ्कवादस्य जालान्विमुक्ति-
र्यदा नीतिशास्त्रे भवेच्चित्तवृत्तिः ।
समूलं समाप्तं कुसाम्राज्यतन्त्रम्
अहो स्वागतं स्वागतं लोकतन्त्रम् ॥

न किं बुद्धिवृष्टिर्नराणां विभाति ?
कदा दूरदृष्टिः कुमार्गं प्रयाति ??
विनिर्मीयतां केवलं राज्ययन्त्रम्
अहो स्वागतं स्वागतं लोकतन्त्रम् ॥

कदा हिट्लरीयं चरित्रं पवित्रं
भवेत् पूजनीयं कथं दुःखनित्रम् ।
न वाञ्छन्ति के मुक्तिदं मूलमन्त्रम् ?
अहो स्वागतं स्वागतं लोकतन्त्रम् ॥

न षड्यन्त्रतन्त्रं न पाखण्डतन्त्रं
न संस्तूयतां केवलं व्यक्तियन्त्रम् ।
न चाराध्यतां दुःखदं दुश्चरित्रम्
अहो ! स्वागतं स्वागतं लोकतन्त्रम् ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ङ) कन्दुकमहिमा

कन्दुकस्य महास्पर्धा विराजते मनोहरा
सम्प्रति ह्यफ्रिकादेशे सुशोभते वसुन्धरा ।
फ्रान्सदेशस्य का वार्ता ? यो विश्वविजयी कथम् ?
गोलद्वयं मेक्सिकोतः प्राप्तवाँश्च सकौतुकम् ॥
जर्मन्यर्जेन्टिनादेशद्वयस्य पदकन्दुकम्
दर्शं दर्शं प्रहृष्यन्ति नृत्यं कुर्वन्ति दर्शकाः
अर्जेन्टिना-शर्मण्ययोः कन्दूकरणकौशलम्
विलोकयन् मुहुर्मुहुर्नृत्यं कुर्वन्ति दर्शकाः ॥
नामेरिकायां न च कोरियायां
नाष्ट्रेलियायां न च सर्भियायाम् ।
अहर्निशं कन्दुकखेलवृष्टि-
र्विराजते केवलमफ्रिकायाम् ॥।

च) कस्य त्यागं करिष्यति

माधव एष नेपालः कस्य त्यागं करिष्यति ?
मरिष्यति परन्त्वस्य मन्त्रित्वं न मरिष्यति ॥
को जानाति प्रचण्डोऽयं कस्य त्यागं करिष्यति ?
मरिष्यति परन्त्वस्य चण्डत्वं न मरिष्यति ॥
शेरवहादुर एष कस्य त्यागं करिष्यति ?
मरिष्यति परन्त्वस्य शेरत्वं न मरिष्यति ॥
नेपालदेश एवात्र कस्य त्यागं करिष्यति ?
नेतृत्वमस्तु वा नास्तु नेपालत्वं भविष्यति ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अहं किंकर्तव्यविमूढो जातः

-घनश्यामः खतिवडा

अहं तं प्रश्नमकरवम्,
तव नाम किम् ?
उत्तरप्राप्तिरभवत् -
क्षेत्रम्,
मया क्षेत्रे धान्यं प्रक्षिप्तम् ।
मया पुनः प्रश्नः कृतः -
तव नाम किम् ?
उत्तरमागतम् -
अन्नक्षेत्रमिति
मया मर्कटान्नाद्यन्नमुप्तम्
तस्मिन् क्षेत्रे
मया पुनः पुनः प्रश्नः कृतः -
तव नाम किम् ?
तव नाम किम् ?
मृत्तिका मृत्तिका इत्युत्तरं निरन्तरम् आगतम् ।
अन्ततः
मया साऽऽलिङ्गिता
तस्या वक्षःस्थलं मातृसदृशं स्नेहयुक्तमासीत्
दुग्धधारा निरन्तरं प्रवहन्ती आसीत्
मया सा चुम्बिता
मम ओष्ठाभ्याम् अधरपानं कृतम्
उभयोरपि विनिमयो जातः
तत्र मया प्रेयसी अनुभूता
आवां चरमानन्दे निमग्नौ
अन्ततः
सा एव प्रश्नम् अकरोत् -

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अथ त्वमेव वद
तव नाम किम् ?
अहं वाणीहीनो जातः
एक एव अनेकेषु विभक्तोऽभवम्
आत्मनः स्वार्थयुक्तमावरणं दृष्टम्
आत्मना एव आत्मनः परिचयशून्यताऽनुभूता
अनुभूतिशून्यत्वं दृष्टम्, आत्मन्येव
स्वयं लज्जितोऽभवम्
मृत्तिका ऽहमासम्
अहं मृत्तिकायां विलीन आसम्
मया एव मृत्तिकायाः अस्तित्वं विनाशितम्
छिन्नं भिन्नञ्च कृतम्
कर्मविनिमये
मृत्तिकायां ममता, सहिष्णुता, सद्भावना च प्राप्ताः
मयि वलात्कारः, स्वार्थपरायणता नीचता च सम्प्राप्ताः
अहं किंकर्तव्यविमूढो जातः ।

कलौ मुद्रा

-मुकेशमिश्रः

अज्ञत्वं विभजन्ति हन्त ! सुधियो दुष्टा महान्तस्तथा
चातुर्यं विभजन्ति कोकिलसभां सम्प्राप्तकाकाः स्वयम् ।
प्राप्नोति कुलटा सतीपदमिदं वीरोऽथवा षण्डतां,
यस्या चास्ति प्रभावस्तादृशकलौ मुद्रास्ति सा ज्ञानिनः ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

योग एव मनुष्यस्य जीवनम्

- विद्याकुमारी वज्राचार्य
काष्ठमण्डपस्था

अहं रुग्णोऽस्मि, इति न वद
तव स्वास्थ्यं समीचीनं भवति,
ब्राह्ममुहूर्त उत्थायाल्पं जलं पिव
तव स्वास्थ्यं प्रबलं भवति ॥

सुप्रभाते भ्रमणकार्यं सुष्ठुतरं
व्योमतले शीतलं पवनम्
मनो निर्मलं शान्तञ्च, स्वस्थं जीवनं भवति,
परमात्मनि दृढविश्वासं कृत्वा मनः स्थिरीभवति,
तव जीवनमेव हितकारि अवश्यं भवति ॥

मनुष्यजीवने योग एव महत्वपूर्णो व्यायामः
प्रतिदिनं कुरु स्वास्थ्यं वरदानं भविष्यति,
स्वल्पाहारः कर्तव्यतैलघृतप्रयोगश्च निपिद्धः
सत्वरं कार्यं न कुरु नवजीवनं सफलं भविष्यति ॥

चिन्तां परित्यज्य सर्वदा चित्ते हर्षं विधेहि
एतानि सर्वाण्यपि महौपधान्यानन्ददायकानि सन्ति
हसनं मनुष्यजीवने आह्लादकं रोगस्य प्रतिरोधकञ्चेति
तदनुष्ठाय तव स्वास्थ्यं शोभनं भविष्यति ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सुविचारं विभो देहि

-डा.बद्री पोखरेल
काष्ठमण्डपजनपदीयः

आसीन्मनोरमा भूमिर्नदीपर्वतशोभिता ।
नदीभिर्वेष्टिता भूमिर्लसिता वनपङ्क्तिभिः ॥१॥
जलं वहति मूलानि सिञ्चति धरणी-तलम् ।
फलन्ति बहुरत्नानि कृषकाः सन्ति कर्मणि ॥२॥

तत्रैव दृश्यते योगो ज्ञान-विज्ञानमार्गयोः ।
परमार्थप्रयोगे हि ज्ञान-मार्गो विशिष्यते ॥३॥
अधुनातनकार्ये तु विज्ञानमवलम्ब्यते ।
परं नेपालदेशोऽयं विद्याज्ञानैर्विशिष्यते ॥४॥

किन्त्वत्र वहुभिर्वर्षैर्देशोऽस्ति रोग-जर्जरः ।
हिंसातङ्क-विवादेषु दृश्यन्ते प्रेरिता जनाः ॥५॥
न जाने का गतिर्जाता निघ्नन्ति स्वजनान् जनाः ।
यादवैर्यत्कृतं पूर्वं तद्धि कुर्वन्ति तेऽधुना ॥६॥

देशोऽयमन्नरहितो ग्रामाः शून्या जनैर्धनैः ।
देशान्तरं गताः कोचित् केचिन् नगरगामिनः ॥७॥
अस्माकं वान्धवाः केचित् निरुद्योगत्वमाश्रिताः ।
नैतद् हर्षस्य विषयो नवेदं गौरवास्पदम् ॥८॥

अतोऽहं मनसा ध्याये हीश्वरं भक्तिपूर्वकम् ।
सुविचारं विभो देहि देशवासिजनाय त्वम् ॥९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

क) न खलु कान्तिपुरी रुचिरायिता

-जनार्दन उपाध्यायः
नुवाकोटजनपदीयः

प्रकृतिरुग्णतया क्षयतां गता
क्वचन यन्त्रगृहेण च दूषिता
स्वसनकर्मणि वातविपाक्तता
क्व ननु कान्तिपुरी रुचिरायिता ?॥१॥

नगरसुन्दरताऽविनाशिता
विविधमूत्रमलादिविनिःसृता।
विकृततुच्छनदीमलघूर्णिता
क्व ननु कान्तिपुरी रुचिरायिता ?॥२॥

प्रतिपथं मलपर्वतशृङ्खला
क्वचन शोणितमांसकुगन्धिता ।
नगरभूर्मदिराऽनिलपूरिता
क्व ननु कान्तिपुरी रुचिरायिता ?॥३॥

दिशि-दिशि स्थितदुर्मलकुत्सनं
व्यसनिभिर्व्यसनै र्ह्यवकुण्ठिता ।
न खलु देवगृहेषु पवित्रता
क्व ननु कान्तिपुरी रुचिरायिता ?॥४॥

कटिकुचादिषु केवलवल्कला
पथि निमग्नकलेवरनग्नता ।
युवतिभिश्च तिरस्कृतलज्जता
क्व ननु कान्तिपुरी रुचिरायिता ?॥५॥

युवकजातिषु कर्म विरक्तता
कटुसुरा-मदिरा-गणिकारता ।
पुनरुपद्रवकर्मणि तत्परा
क्व ननु कान्तिपुरी रुचिरायिता ?॥६॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मदवलान्धवणिग्धनलोलुपा
अनृतवाक्ययुता जनवञ्चका ।
अहह ! हाटकगा च महार्घता
क्व ननु कान्तिपुरी रुचिरायिता ! ॥७॥
न नगरे खलु तोयविशुद्धता
निखिलवस्तु-विकार-विमिश्रिता ।
प्रतिदिनं जनजीवनजीर्णता
क्व ननु कान्तिपुरी रुचिरायिता ?॥८॥

ख) कथं नैकत्वम् ?

कालेऽस्मिन् लोकतन्त्रीये सर्वे नेपालवासिनः ।
संलग्नाः स्वानुकूलानां विषयाणां समुन्नतौ ॥
क्षेत्रस्य संस्कृतेश्चैव धर्माधारस्य वा पुनः।
लिङ्गानुकूलमाश्रित्य वर्णभेदस्य एव च ॥

स्वजातिञ्च समादाय सङ्घस्तत्र समाहितः
वाञ्छन्ति स्वानुकूलानि सर्वे नेपालवासिनः ।
इत्थं व्यवसिते लोके वयं तु आर्यवंशजाः ।
विशेषतः संस्कृतज्ञाः शास्त्रमर्मसु कौशलाः ॥

परस्परं कथं नैव आर्यवंशोद्भवा वम् ।
वैमनस्योदरे गर्ते निपातो हि विडम्बना ॥
वेदस्य विश्वबन्धुत्वं सिद्धान्तो दर्शनस्य च ।
चातुर्यमर्थशास्त्रस्य नीतिर्नैयायिकस्य च ॥

पुराणानाञ्च विज्ञानं योगशास्त्रस्य साधना ।
साहित्यस्य च माधुर्यं तथा वाणीषु नम्रता ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सर्वेषां विषयाणां वै समावेशोऽस्ति संस्कृते ।
परमेकात्मता नास्ति विदुषां सा विडम्बना ॥

जयतु संस्कृतमिति मुखे नोच्चार्यते जनैः ।
मनसा कर्मणाऽपीत्थमेकात्मत्वमिति सदा ॥
विदुषां संस्कृतज्ञानां भविष्यत्युन्नतिस्तदा ।
वैरभावं समुत्सृज्य चैकत्वमाप्नुयुर्यदा ॥

मुक्तकयुगलम्

-ध्रुवप्रसादः भट्टराई
खोटाङ्गजनपदीयः

काको गच्छति मन्दिरं प्रतिदिनं स्नातुं च गङ्गातट-
मुक्तं ब्राह्मव्रतं महाव्रतमिदं पुत्रैरजायाः पुनः ।
घृष्टिश्चन्दनलेपने पटुतमो व्यासासने रासभः
शाकाहारपुराणकं विरचयेत् कौलेयकः कोविदः ॥

नीतिः पुस्तकव्यापिनी समभवद् बुद्धिश्च वैदेशिकी
सत्यं मद्यपजल्पने वहुश्रुतं धर्मो गुहायां गतः ।
शौचं शूकरतां गतं जनचये चौर्यं तु शौर्यं मतम्
मातङ्गस्य वशं गता प्रतिहता विद्या च विद्यालये ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वयं स्मरामः

-श्रीधरपन्तः
कञ्चनपुरस्थः

रुष्टे सुते जननि ! सान्त्वयसि त्वमेव
नष्टे सुते जननि ! ताम्यसि वै त्वमेव ।
सौख्यं महच्च सकलं स्वसुताय तेऽस्ति
त्वां मातरं कथय किन्न वयं स्मरामः ॥१॥

जीवेच्चिरं मम सुपुत्र इतीव काम्यं
देवार्चनं ननु करोपि सदैव कामम् ।
सौम्यं त्वदीयचरणाम्वुरुहप्रसादं
स्वे निर्मले मनसि देवि सदा स्मरामः ॥२॥

वृद्धादयः सकलजीवहिताः सदैव
धीरा जयन्ति जगदम्व जगद्धिताय ।
वाला वयं तवसरोरुहपादयुग्म -
मुल्लासयुक्तमनसा सततं स्मरामः ॥३॥

सर्वे विमूढमतयस्तव हेलया ते
सन्तानसौरपदवीमपहर्तुकामः ।
मातस्त्वदीयपरिरक्षणसक्षमाय
कष्टातिरेकमपि जातु न वै स्मरामः ॥४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रजातन्त्रे नेतारः

-माधवप्रसादः पाण्डेयः
पाल्पाजनपदीयः

राजनीतौ नैतिकता दृश्यते नैव चाधुना ।
स्वेच्छाचारोऽसत्यता च विश्वासो निहतः सदा ॥१॥
ग्रहा राज्यं प्रयच्छन्ति यथा राज्यं हरन्ति च ।
नेतारोऽपि तथा राज्यं वर्धयन्ति हरन्ति च ॥२॥

त एव वञ्चका भ्रष्टाः साधुसंसर्गदूषिताः ।
सर्वे नैतिकताशून्याः स्वार्थमात्रपरायणाः॥३॥
क्षुद्राः पाषाणहृदयाः कृतघ्ना दुष्टचेतसः ।
नेतारो लुब्धकामाश्च द्वेषयन्तश्च निन्दिताः ॥४॥

राजनीतिकदुर्गन्धाः कुख्याता जनवञ्चकाः ।
नेपलभारभूतास्ते नग्ननृत्यप्रदर्शकाः ॥५॥
एतादृशास्ते नेतारः प्रजातन्त्रमिदं कथम्
रक्षेयू राजतन्त्रं वा प्रमत्ताः शुनका इव ॥६॥

मलमूत्रप्रवाहिण्या टुकुचाया जले महत् ।
प्रजातन्त्रमिदं क्षेप्तुमुद्यताः सन्ति दुर्जनाः ॥७॥
एते ध्वाङ्क्षा विडाला वा भारभूता अनार्यकाः
यत्र वासं प्रकुर्वन्ति तस्य देशस्य का दशा ? ॥८॥

तस्मान्निरसनीयास्ते सर्वैरुत्थाय संप्रति ।
अन्यथा जनतन्त्रस्य इतोऽपि स्यात्तु दुर्दशा ॥९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शान्त-नेपाल-देशः

-रञ्जनः सिग्देल
कपिलवस्तुजनपदीयः

यस्यां भूमौ जगति सकलो दर्शितः शान्तिमार्गो
वुद्धः साक्षादजनि भगवानग्रणीः शान्तिमूर्तिः ।
तस्मिन् देशे किमभवदहोऽनर्थ आयात आस्ते
सान्द्रं क्लान्तो मम प्रियतमः शान्त-नेपालदेशः ॥

सीता- देवी- जनकप्रभृतिब्रह्मविद्भिः सुपूज्यः
साक्षाद्देवोऽ शिवहरहराधिष्ठितः पुण्यदेशः ।
स्वर्गङ्गाया अवतरणभूरासयश्चित्तहारी
रोदित्येषः प्रकटितभयः शान्तनेपालदेशः ॥

हिंसा-हत्या-कलह-प्रचुरैर्ग्रस्यमानोऽस्ति नित्यं
ता हन्यन्ते सरलजनता नैव तासां सुरक्षा ।
विस्फोटास्त्रैर्गिलितप्रकृतिः फल्गुसिद्धान्तप्राप्त्यै
सर्वे स्तव्धा वद ! वुध कथं शान्तनेपालदेशः ॥

अत्याचारः प्रतिदिनमहो वर्धमानोऽस्ति यत्र
दौर्भाग्याभ्रं भ्रमति गगने त्रस्तमर्त्याश्च यत्र ।
धूमव्याप्तं गगनमभवद् रक्तिमाभा दिशश्च
तत् स्याद् राष्ट्रं वद वुध कथं शान्त-नेपालदेशः ॥

नो तच्छैत्यं न खलु सुरभिर्मालतीगन्धवाहे
शुष्कः कोष्ठः प्रकृतिमधुरो व्यक्त-शस्त्रास्त्रतापात् ।
नो माधुर्यं दरिषु कलिकाजञ्च चेतोहरं यत्
किं वा ब्रूमो वयमपि कथं शान्त-नेपाल देशः ॥

न श्रूयन्ते कलकलरवा निम्नगानामिदानीम्
एताः सर्वाः कलकलरवैः संरुदन्तीव सत्यम् ।
चूँ चूँ शव्दैर्विलपति खगः कोकिलो नैव रौति
हाहाकारोऽभवदुभयतः क्लान्त-नेपाल-देशः ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

एकं शब्दचित्रम्

-श्रीहरिः रुपाखेती
काष्ठमण्डपजनपदीयः

स्वप्नस्य दानानि समं भवन्ति
तार्जन्यमुद्राप्रतिबद्धताभिः ।
अर्थस्य तन्त्रं निहितं गुहाया-
मस्मत्प्रजातन्त्रगतिः प्रशस्ता ॥१॥

सर्वत्र भ्रष्टाचरणेन पुष्टा
मुखात् प्रजातन्त्रमुदीरयन्तः ।
कार्ये जनानां रुधिरं पिबन्तो
विधायकाः सन्ति भृशम् सुयोग्याः ? ॥२॥

जानाति नेताऽखिलज्ञानजातं
स्वराष्ट्रप्रेम्णो ह्यतिरिच्यते यत् ।
अभ्रष्टतायाश्च पवित्रताया
जानाति मन्त्रं न तु कर्मतन्त्रम् ॥३॥

क्षिप्रं हि शीघ्रं हि भविष्यतीति
ह्याश्वासनानां तु शतं ब्रुवन्ति्
मलिम्लुचानां शतविग्रहाना-
मस्यां स्थितौ प्राप्तवती धरेयम् ॥४॥

दत्तं सुखं मन्त्रिमहोदयेन
श्रुता प्रशस्तिर्जनतन्त्रशक्तेः ।
नैपालकाः संप्रभुतां प्रयाताः
सन्ताड्य रिक्तोदरमासमन्तात् ! ॥५॥

विस्तार्य यन्त्रेण ध्वनिं समन्तात्
प्रजाजनानां परिषत्सु गत्वा ।
न्यायस्य दानं विधितत्त्वविद्भि-
र्यद्दीयतेऽन्यत्र कुतोऽस्ति ब्रूहि ॥६॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विकासभाषां श्रृणु देशवासिन्
त्वं रेडियोयन्त्रमुखात् सदैव ।
यद्वा टि.भी. यन्त्रगतं नु सर्वं
निरीक्ष्य यानानि सुखं लभेथाः ॥७॥

कस्य हानिर्वा

-विश्वनाथः रूपाखेती
काष्ठमण्डपस्थः

ओमिति धातुः कण्ठा
दोंकारात् संस्कृता वाणी ॥
संस्कृतवाण्यां जात -
श्चेदमस्माकं वाङ्मयसर्वस्वम् ॥
धरास्थिता या भाषाः
तासां जननी त्वमसि वदन्ति ॥
त्वामेवानादृत्य
कथं स्वस्वभाषामाद्रियन्ते ॥
सुरमुनिगणैः सभाजिताऽपि
ह्यधुना ये न वदन्ति त्वाम् ॥
यदि न खादत्यौषधं रोगी
वदास्मिन् मातः कस्य हानिर्वा ॥
भणति संस्कृतमयुक्तं
कलयत्यज्ञो विना ज्ञानं
यद्यस्य द्राक्षाऽम्ला
वदास्मिन् मातः कस्य दोषोऽयम् ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

लोकतन्त्रे युवशक्तिः

-वरदानथपलिया
छात्रः वाल्मीकिविद्यापीठस्य

जनता जनतां शास्ति कथ्यते लोकतन्त्रके ।
तथापि भेदभावानां विकासो ह्यत्र दृश्यते ॥
लोकतान्त्रिक उद्याने पुष्पाणि विकसन्ति किम् ?
उताहो नागसर्पाणां पदमस्ति भयानकम् ॥

मानवैर्दानवैर्भूत्वा याप्यते किमु जीवनम् ?
पशुमारं मारयित्वा सार्थकं स्यान्नृ जीवनम् ॥
विश्वभ्रातृत्वरक्षार्थं विधिपूर्णञ्च शासनम् ।
कुर्वन्तु भो महाभागा राष्ट्रं यातु समानताम् ॥

राष्ट्रं हि मन्दिरं पूतं युवानो सन्ति पूजकाः
पूज्यपूजकयोर्मध्ये तादात्म्यं यातु सर्वदा ॥
क्रान्तिसागरकल्लोलाः परिवर्तनकारकाः
अग्रगमनशान्त्योश्च युवानो मार्गदर्शकाः ॥

आन्दोलनानि क्षेमार्थं राष्ट्रस्य विविधानि च
यूनां प्रवलसामर्थ्ये जातानि को न ज्ञास्यति ?
यूनां लोहितधाराभिः क्षालितं लोकतन्त्रकम्
सुरक्षास्य सदा कार्या यूनां स्यान्मुख्यतन्त्रकम् ॥

नास्माभिर्दलदासैश्च भाव्यं नेपालप्राङ्गणे ।
नास्माकं क्रान्तिदासानां नर्तनं स्यात् गृहाङ्गणे ॥
इष्टिकोपलकाष्ठानां प्रहारः परित्यज्यताम्
रथाङ्गेन्धनदाहानां संस्कारो हि निपिध्यताम् ॥

गतानां परराष्ट्रेषु श्रुत्वा राष्ट्रियभाषणम्
मनो नः खिन्नतामेति विरोधाभासदर्शकम् ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जयतु संस्कृतम्

-शिवशंकरन्यौपाने,
वाल्मीकिविद्यापीठस्थः

जयतु संस्कृतं, जयतु संस्कृतं
जयतु संस्कृतं, जयतु संस्कृतम् ।
वदतु संस्कृतं लिखतु संस्कृतं
पठतु संस्कृतं स्मरतु संस्कृतम् ।
क्रीडतु संस्कृतं धरतु संस्कृतं
जयतु संस्कृतं जयतु संस्कृतम् ॥
पचतु संस्कृतं जानातु संस्कृतं
पश्यतु संस्कृतं श्रृणोतु संस्कृतम् ।
पिबतु संस्कृतं गच्छतु संस्कृतं
जयतु संस्कृतं जयतु संस्कृतम् ॥
खादतु संस्कृतम् मिलतु संस्कृतं
गच्छतु संस्कृतम् करोतु संस्कृतम् ।
स्पृशतु संस्कृतम् जयतु संस्कृतं
जयतु संस्कृतम् जयतु संस्कृतम् ॥
करोतु संस्कृतं लपतु संस्कृतं
चलतु संस्कृतं चरतु संस्कृतम् ।
हसतु संस्कृतं जयतु संस्कृतं
जयतु संस्कृतं जयतु संस्कृतम् ॥
भवतु संस्कृतं विश्वजीवनं
जयतु संस्कृतं विश्वमोहनम् ।
गायतु संस्कृतं पतितपावनं
जयतु संस्कृतं जयतु संस्कृतम् ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रभो ! शूलपाणे ! त्वमेकः शरण्यः

-माधवः घिमिरे (छात्रः)

अहं सार्वभौमो जगत्पालकश्च,
नियन्ता प्रवक्ता तथा हारकश्च ।
मदीयं प्रभुत्वं वनं वा धनं वा,
जलञ्चास्मदीयं न किञ्चित् त्वदीयम् ।

यदा राष्ट्रमेतत् सखण्डं किलाऽसीत्
तदा पूर्वजेन सुसृष्टं श्रमेण ।
अतस्स्वत्वमत्र प्रकर्षेण मे हि,
यदिष्टं करोषि त्वदीयं गतं किम् ?

मया मारितास्ते जना ये हसन्ति
मया पालितास्ते जना ये नमन्ति ।
अहं चोरयामि यथेच्छं पुनश्च,
न वर्तेऽपराधे जघन्ये जगत्याम् ॥

यथा विष्णुरस्ति परं सूक्ष्मतत्त्वम्
तथाहं जगत्यां त्रिदोषात् परश्च ।
नृपोऽहं सुरोऽहं तथा चासुरोऽहम्,
सुप्राप्तव्यमर्थं कथं धिक्करोषि ?

जना हि कृतघ्ना मदन्नेन सन्ति,
वदन्ति प्रवादेनं "गच्छ वनं त्वम्" ।
इदं राजसिंहासनं चात्र लब्धम् ।
कथं वा कुतो वा त्यजाम्येवमेव ॥

गमिष्यामि सद्यः सुदुःखान्वितोऽहं
रुदन् वा हसन् वा कथञ्चित् सकष्टम् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

परं ह्येकवारं भ्रमित्वा भ्रमित्वा,
अहं चात्र ह्यागत्य सर्वान् युनज्मि ॥

इमां मे कथां कः श्रृणोति स्वराष्ट्रे
इयं मे व्यथा केन न्यूना क्रियेत ?
इमां चाश्रुधारां पिबेत् कः सुहृद् वै,
प्रभो ! शूलपाणे ! त्वमेकः शरण्यः ॥

मम ग्रामो रमणीयः

-यज्ञराजः रेग्मी (छात्रः)

ग्राम एष मम भो रमणीयः
उच्चनिम्नगमनं रमणीयम्
स्वच्छशीतलजलं रमणीयं
वन्यभोजनमहो रमणीयम् ॥

छात्रजीवनमहो रमणीयं
शान्तिरक्षणविधी रमणीयः
भैरवस्थितिकला रमणीया
संस्कृतस्य कविता रमणीया ॥

रामघाटनदिका रमणीया
तत्र स्नानकरणं रमणीयम् ।
ग्रामवासभवनं रमणीयं
उच्चनिम्नगमनं रमणीयम् ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मातृभूमिं प्रति जिज्ञासा

-ठाकुरप्रसादशर्मा (छात्र):

नहि वैरेण वैराणि शाम्यन्तीह कदाचन,
इत्यादिन्यो महावाण्यः सर्वजीवेषु प्रेषयन् ॥
सर्वदेशप्रदेशेषु ज्ञानज्योतिःप्रकाशकः
तव कृतौ हि सञ्जातः बुद्धौ वुद्धश्च निर्मलः ॥

सुशीला गुणसम्पन्ना ज्ञानराशिसुनिर्मला ।
दृढव्रता महावीरा पापाचारविवर्जिता ॥
रामप्रीतिकरी सुभ्रूः स्वधर्माचरणे रता ।
तव कुक्षौ हि सञ्जाता रामायणसुनायिका ॥

अधुना राक्षसः कुक्षौ कुतश्चास्मिन् समागतः ।
हिंस्रकः शस्त्रधारी च दुराचारप्रचारकः ॥
अग्रजाः स्वानुजाञ्चात्र प्रत्यहं मारयन्ति हि ।
अनुजाः स्वाग्रजाञ्चैव वलेन ताडयान्ति हि ।

नास्त्यत्र सज्जनस्थानं तृणमात्रमपि क्वचित् ।
चाकचक्येन तिष्ठन्ति दुःशासनरताः सदा ॥
कलाध्यक्षा नृत्यशीला मेनकेव प्रतिष्ठिताः ।
मयूरा नात्र नृत्यन्ति कीदृशीयं विडम्वना ॥

स्वकण्ठरवमाधुर्ये गन्धर्वा इव विश्रुताः ।
मुनीनां मानसं स्पृष्ट्वा नात्र गायन्ति कोकिलाः ॥
कुसुमान्यपि कष्टेन फुल्लन्तीह कथञ्चन ।
स्वसौरभं परित्यज्य तच्च तिष्ठति कृत्रिमम् ॥

प्राचीनसमये शान्तिक्षेत्रसंज्ञागुणीकृता ।
साम्प्रतं त्वं कथं प्राप्ता दुराचारस्य पोषिका ॥
अग्निचूर्णं करे यस्य मान्यो भवति सोऽत्र किम् ।
एताञ्च मम जिज्ञासां जननि त्वं निराकुरु ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अतिक्रन्दति नेपालः

-भानुभक्त आचार्य
छात्रः वाल्मीकिविद्यापीठस्य

दयितोऽतिदयालुरहो नृहरे
नयपालमिममतिदुष्टकरे
न ददातु भवान् श्रृणु वाक्यमिदं
तदनु कार्यमिदं नियतं कुरु ॥१॥

पथभ्रष्टजनान् मदिरादिरतान्
गणिकाजनसेवनतत्परान् ।
जनतामतमुपेक्ष्य युद्धरतान्
निजदेशं निपात्य परदेशगतान् ॥२॥

निजसंस्कृतिघातककुठारसमान्
अग्रजानुजयोः रणमृत्युकरान् ।
सुपवित्रनदीनदोषकरान्
कृपणान् शिव मारय दुष्टगणान् ॥३॥

अतिक्राम्यति ने. धरणी सततं
कतमो वहुधा स्यति दुःखचयान्
यदि नश्यति दुःखभरो धरणे-
स्तनया नु भवाम तदा सफलाः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वीरभोग्या वसुन्धरा

-रूपकालङ्कारः (छात्रः)
वाल्मीकिविद्यापीठीय :

आयोगाः नियमा अत्र निर्मीयन्ते पुनःपुनः ।
क्रियन्ते धूलीसात् सर्वे वीरभोग्या वसुन्धरा ।
शक्तिहीना हि संसारे भवन्ति दुःखभागिनः ।
शक्तिमन्तस्तु सन्तुष्टाः भवन्ति हि धरातले ।
सर्वे कुर्वन्ति सत्तार्थं द्वन्द्वं हिंसाञ्च सत्वरम् ।
तेऽपि सदैव जानन्ति वीरभोग्या वसुन्धरा ।
घातकोऽपि मनुष्याणां दृश्यते शान्तिसेवकः ।
शक्तिस्थानां भवेद्भक्ति र्वीरभोग्या वसुन्धरा ।
मत्स्यं भुक्त्वा मत्स्यराजः मृगं भुक्त्वा मृगाधिपः ।
जले स्थले यथावस्था वीरभोग्या वसुन्धरा ।

जीवनम्

- कोषराजः न्यौपाने
भोजपुरजनपदीयः

नानाजन्मतया मनुष्यजननं यद् गौरवं गौरवं
मानुष्यञ्च विवेचनं सहृदयं तत् सुन्दरं सुन्दरम् ।
नास्ति ज्ञानधनं यदि प्रियतमं धिग् जीवनं जीवन-
मास्ते ज्ञानधनं यदि प्रियकरं तज्जीवनं जीवनम् ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नेपालवन्दना

-कृष्णप्रसादन्यौपाने, (छात्रः)
वाल्मीकिविद्यापीठीय :

नमो नेपालराष्ट्राय हेम्ना संशोभिताय च ।
नमः श्रीहिन्दुराष्ट्राय शान्तिराष्ट्राय वै नमः ॥
जलश्रोतस्सुसम्पन्नां वनराजीविराजिताम्
शान्तिदूतेन संयुक्तां जन्मदात्रीं नमाम्यहम् ॥

नानाधर्मसमायुक्तां नानावर्णसुसंगताम्
नानाजातिसुसम्पन्नां नमामि हिमशोभिताम् ॥
तपोभूम्यै नमस्तेऽस्तु नमामि गिरिरूपिणीम्
नमामि शुद्धस्फटिकां नमामि जलदायिनीम् ॥

नमामि बुद्धजननीं शालग्रामप्रदायिनीम्
ऋषीणां च तपोभूम्यै मातृभूम्यै नमो नमः ॥
वेदभूमिं सदा नौमि कौशिकीगण्डकीयुतां
सीताभूमिं सदा नौमि मम जीवनदायिनीम् ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वयं भाग्यवतां श्रेष्ठाः

-बालकृष्णः त्रिपाठी
वाल्मीकिविद्यापीठस्य छात्रः ।

संविधानसभास्माकं नेतृवर्गोऽपि देशजः ।
संविधानस्य स्रष्टारो वैदेशिका हि केवलाः ॥
अस्मदीयो हि नेतृणां समुदायोऽत्र राजते ।
एके हि केवला वाह्या राज्यशासनकारकाः ॥

भूमिदानात्परो धर्मो नैवास्ति शास्त्रसम्मतः ।
तस्माद्देशकस्य दानेन वयं धर्मस्य रक्षकाः ॥
देशोऽस्माकं तु नाट्यस्य शालेव नेतृनर्तकः ।
क्रान्तिः सुक्रान्तिरस्माकं दृश्यतेऽनुजघातिनी ।

विदेशे देशरक्षार्थं पुरुपा मृत्युग्राहिणः ।
वयं तु देशरक्षार्थमादौ स्वार्थस्य रक्षकाः ॥
अन्ये दरिद्रमूर्खास्तु देशोन्नतेर्हि लोलुपाः ।
वयं तु स्वोन्नतिं कृत्वा स्वभावाद्देशवर्धकाः ॥

क्रीडासु वाह्यदेशाश्च विजयन्तेऽन्यहिंस्रकाः ।
आत्मनः प्रतिकूलानि नाचरामो वयं सदा ॥
अन्यत्र कर्मकर्तारो जिज्ञासको हि ते जनाः ।
वयं तु ज्ञानसम्पन्नाः कारकाः शिक्षकाः सदा ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

आह्वानम्

-गणेशः तिमल्सिना

सर्वथा सुन्दरं शान्तं मानसं पारितोषिकम्
मम राष्ट्रं विना विश्वं व्यञ्जनं लवणं विना ॥
मुनीनामाश्रमा यत्र यत्र सन्ति हिमालयाः ।
अन्नागारं दक्षिणे तु मध्ये तु पर्वतस्थितिः ॥

सूर्यस्य चोदयः पूर्वे जनानां प्रीतिकारिका ।
तडागनिर्झरादीनां शोभा किं न हरेन्मनः ॥
मनोरमाऽसीत् साऽवस्था कारणादग्रजन्मनाम् ।
निर्विशेषे विशेषः स्यादैक्यं श्रुत्वा महात्मनाम् ॥

पुरावृत्तं समाकर्ण्य तस्यैव परिकल्पना ।
अस्माभिः क्रियते ह्यत्र वाञ्छद्भिः सुखदां स्थितिम् ॥
हुतात्मन् जीवनं कुत्र तव दानं निरर्थकम् ?
तव स्थितिः पतङ्गानां दीपस्य निकटे यथा ।

सदाचारे दुराचारे क्व भेदो दृश्यतेऽधुना ।
पर्यायो नार्थकानां तु भ्रष्टाचारः समीक्ष्यते ॥
विचित्रं दृश्यते चित्रे हत्याहिंसासमाहिते ।
कलहो बान्धवानां हि रक्तवर्णयुते पटे ॥

वृद्धस्य कीदृशी शान्तिः साधूनां कुत्र जीवनम् ।
सीतायाः क्व परित्यागः सद्गुणाः क्व पलायिताः ॥
याज्ञवल्क्यो गतः कुत्र वीराणां कुत्र वीरता ।
सर्वं श्रुत्वा वसुमती कल्पनैव प्रतीयते ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रुदन्तीं भृकुटीं दृष्ट्वा नेतृणां हृन्न रोदति ।
बान्धवं पतितं दृष्ट्वा हस्तौ तत्र न गच्छतः ॥
पूर्वजैर्विहितं यत्नं विस्मरन्तः स्वदेशजाः ।
कर्णौ प्रगृह्यागच्छन्तु पूर्वाणां स्वप्नसिद्धये ॥

ग्रामाद्वा नगराद्वापि पूर्वतः परतोऽपि वा ।
समागच्छन्तु परितः केवलं राष्ट्रसेवने ॥
न सन्तु ब्राह्मणाः शूद्रा अर्थानर्थविभेदकाः ।
त्यागिनामैक्यमन्त्रं हि स्मृत्वाऽऽगच्छन्तु सर्वतः ॥

प्रियास्मरणम्

-पीताम्वरः निरौला (छात्रः)

त्वमागच्छ प्रिये, त्वमागच्छ
मां त्यक्त्वा त्वं कुत्र गच्छसि ।
तव स्मरणेनाहं तीव्रसंवेदनाप्लुतोऽस्मि
वनस्यास्य जन्तवो रुदन्तः सन्ति
त्वां न दृष्ट्वा
त्यजन्ति वृक्षाः पुष्पनयनेभ्योऽश्रूणि
अधुना वने लताः क्रन्दन्त्यः सन्ति
कोकिलोऽपि करुणस्वरेणोच्चैरोदिति
त्वं कुत्रासि प्रिये शीघ्रमागच्छ
प्रिये गृहं शीघ्रमागच्छ, शीघ्रमागच्छ ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

०६९ चैत्रमासस्य १७ तिथौ धराननगरे जयतु संस्कृतम् इत्यस्य केन्द्रस्य सहाय्ये शाखासमित्या आयोजितायां कविगोष्ठ्यां सम्पठिताः कविताः क्रमेण प्रस्तूयन्ते-

कोषवन्तः

-पूर्णशङ्करगौतमः
पिण्डेश्वरविद्यापीठीयः

विदेशं व्रजन्ति स्वदेशं त्यजन्ति,
सुचारुं वदन्ति सुखार्थं रटन्ति ।
सदा द्रव्यवन्तो हि ते कोषवन्तः,
सदा ज्ञानवन्तो हि ते कोषवन्तः ॥

उदारा भवन्ति सुदारान् भजन्ति,
इतश्चानयन्ति ततश्चानयन्ति ।
सदा पूरयन्ति सदा पार्श्वपात्रं,
न रात्रौ स्वपन्ति न दिवा भ्रमन्ति ॥

कदाटन्ति काशीं कदा देहलीं वै,
कदा चाङ्ग्लदेशं कदा चीनदेशम् ।
कदा प्राच्यभूमिं कदा पश्चिमां वै,
कदा शैलमध्यं कदा सागरञ्च ॥

मधूनां यथा संग्रहो जायते हि,
तथैवानुकुर्वन् विषादीन् मलञ्च ।
शनैः स्वादु ज्ञानं तथा शुद्धद्रव्यं,
सदा सारतत्त्वं गृह्णन्तश्चलन्ति ॥

सदा निर्भयाः शास्त्रकाराश्चरन्ति,
सदा हेमकाराः सभीता व्रजन्ति ।
सदा द्रव्ययुक्ताः सदीना भवन्ति,
परं शास्त्रयुक्ता विमुक्ता रमन्ते ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

धनं चञ्चलं सदायाति याति,
सदा कार्यकाले सुखञ्चातनोति ।
तथा तस्य वासो विलासेऽनुयाति,
न चेतांसि सत्यं रमन्ते कदाऽपि ॥

विशालं तु ज्ञानं समुद्रोपमञ्च,
विनाशं न याति स्थिरं तिष्ठति च ।
परस्यापि सर्वं स्वकीयं करोति,
समं दिव्यलोके तथा मानुषे च ॥

जयतु संस्कृतम्

-हेमन्तराजोऽर्यालः
धरानस्थः

अनेकशास्त्रभण्डारः संस्कृतेऽस्ति न संशयः ।
आलोकयति सन्मार्गमतो जयतु संस्कृतम् ॥

वेदवेदान्तेतिहासपुराणानि ह्यनेकशः ।
राजन्ते संस्कृते ह्येव तस्माज्जयतु संस्कृतम् ॥

पौरोहित्यादिकं कर्म कुर्वद्भिः कर्मकाण्डिभिः ।
अवश्यमेव ज्ञातव्यं संस्कृतं नात्र संशयः ॥

पीयूषं पातुमिच्छन्तः सन्त्यत्र यदि केचन ।
निःशङ्कमेव तुष्यन्तु पीत्वा संस्कृतवाङ्मयम् ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हे धूम निर्गच्छ रे !

-डा. चन्द्रमणिर्नेपालः
धरानस्थः ।

त्वं तुच्छोऽसि जडोऽसि मृत्युरसि भो मस्तिष्कशून्योऽसि रे
मृत्पाषाणसमोऽसि दुर्विषमसि त्रासोऽविवेकोऽसि रे ।
भासस्छादयिता, सुसत्यसरणे रोद्धा त्वमन्धोऽसि रे
ग्रामान्ते कटुधूम ! संभ्रमसि किं निर्गच्छ निर्गच्छ रे ॥

उद्यानं शयनं महानसतलं देवालयं काननम्
सर्वं वस्तु विदूषयन् जनपदं सन्तर्जयन् त्रासयन् ।
आहारञ्च विहारकं समभितः संव्याप्य संव्याप्य रे
दुर्गन्धान् कटुधूम सम्भ्रमसि किं निर्गच्छ निर्गच्छ रे ॥

कालोऽसि त्वमनिष्टदोऽसि हृदयं नास्त्येव नास्त्येव ते
काणोऽसि त्वममानवोऽसि किमपि श्रोतुं न शक्नोषि रे ।
सन्मार्गे च कदापि पङ्गुरसि भो गन्तुं न शक्नोषि रे
चित्कारं न श्रृणोषि धूर्त ! वधिर ! दोषात् पलायस्व रे ॥

शाला-सत्पथ-घोष-तीर्थ-निगमाः कालाः करालाः कृताः
शिष्या भारवहाः कुदालि-हलिनश्चान्तर्भवन्त्यग्रतः ।
नो वा दीप्तियुताः प्रभाकरगणा नेन्द्रायुधामोदता
नो नो सुन्दर-दर्शनीय-रमिताः सर्वत्र भो दुर्दशाः ॥

पर्जन्यैर्बहुशस्यतां हरिततां मेघो ददाति स्वयम्,
धूम त्वं परमं महोग्रकटुता-दुर्गन्धहेतुः खलः ।
आकारे समता गुणे विषमता हाकाशपातालवत्
त्वत्तो दुश्चरितेन केन सुषुवे वह्नेः कुलाङ्गारकः ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

निश्शङ्कं शयितव्यमस्ति शिशुभिः सद्वृद्धकै रोगिभि-
स्तन्यं पाययितव्यमस्ति च शिशून् स्नेहालुसन्मातृभिः ।
मत्पूर्वापरजैः सुकार्यमखिलं संसाधनीयं स्वयम्,
कर्तव्यं तनुजाग्रजाभिरनिशं यद्दारुघासादिकम् ॥

आश्वस्याथ सुशीतलञ्च पवनं पीत्वा जलं निर्मलम्,
गन्तव्यं तरितव्यमस्ति शिखरं नद्यादिकं सत्वरम् ।
सद्वातावरणं पवित्रवसते व्यर्थञ्च दोदूष्यते
दुर्गन्धिन् परिदूषक ! द्रुततरं हे धूम ! निर्गच्छ रे ॥

जयतु संस्कृतम्

-डा. नारायणभण्डारी
धरानस्थः

शरदि यः ऋतौ काशते विधु-
र्वियति निर्मले पूर्णिमातिथौ ।
जयतु संस्कृतं नित्यवर्धनंः
प्रगतिमुच्चतां सर्वथा क्रियाः ॥

नयतु मानसं सत्यमध्वनि-
रपरजातकं नैव लभ्यते ।
जयतु संस्कृतं लोकसंस्कृतिः
सुरुचिमानवा नित्यमेव हि ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पिण्डेश्वरं प्रार्थये

-सहप्रा. रोहिणीविलासः लुइटेल
झापाजनपदीयः

भूस्वर्गो गिरिराज-छत्रनिवशश्चारण्यकानां स्थलं
नेपालः शुभनामदीक्षितवलः श्रीशम्भुना पालितः ।
देशेऽस्मिन् वहुजाति-संस्कृति-कला-सद्भावना राजते
स्वाधीनो नितरामकण्टकपरो नैसर्ग आलोकितः ॥

क्षेत्रैतद् वहुभापिकं बहुगणं जातीयसंश्लेपितम्
सर्वेपां हृदयेपु सम्यगभितो मैत्री सदा लक्षिता ।
सृष्टेरादित उच्चवाङ्मयपदं निर्वाधमुच्चार्यते
तज्ज्ञेयं खलु संस्कृतं सुललितं माधुर्यमाकण्ठगम् ॥

वाण्यालङ्कृतसंस्कृतं भुवि पुरा प्राचार्यवर्यैरलं
तद् वैयाकरणैश्च काव्यरसिकैश्चाराधितं पूर्वजैः ।
सर्वोत्कृष्टविवेकदर्शनपरं मृक्सामवेदादिक-
मौदात्त्यं स्वनुदात्तकञ्च स्वरितं वैज्ञानिकं भाष्यते ॥

यद्राष्ट्रं सवलं चलेदविकलं स्वाभाविकं स्वैरवद्-
भापा यत्र सुसंस्कृता च विविधा या वैखरी व्याकृता ।
खण्डीकर्तुमहो ! कथं तदमलं प्रायोजितं दुर्जनैः
स्वान् दूरं त्वपसारयन्तु विवुधाः शीघ्रं स्वदेशात्मजाः ॥

विद्वद्भिः कविभिस्सचेतनगणै-र्गोष्ठीसभाचालकैः
कृत्वानेकसुकाव्यलेखरचनाः सञ्चार-पत्रादिकैः ।
राष्ट्रोत्थानपराः सुरक्षणकरा वाण्याः सुसम्पादिताः
सभ्यैर्नागरिकैर्निनादमसकृत् कृत्वाशु सम्वोधितम् ॥

कालः कल्मषगस्तथाप्यहरहो दुष्टो दरीदृश्यते
कारुण्यं न हि मानवीयचरिते वैभत्स्यमालक्ष्यते ।
नेतारो बहुधा भवन्ति बधिरास्तत् किं रहस्यं प्रभो !
इत्थं नैव भवेत् स्वराष्ट्रविषये पिण्डेश्वरं प्रार्थये ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

संस्कृत-गजलाः

प्रा.डा. भीमप्रसादः खतिवडा
प्राचार्यः पिण्डेश्वर विद्यापीठस्य ।

मानवता हि विकला जाता
राष्ट्रोद्धारे कोऽस्ति विधाता ?
नेतारश्च स्वार्थान्धाः, भो
दुःखविदीर्णा धरणी-माता

भ्रष्टाचारे निर्लिप्तास्ते
राष्ट्रघातके कार्ये व्यस्ताः
राष्ट्रियता हि जीर्णा शीर्णा
'नवनेपालस्तेषां गीता

श्रमजीविनां नेपालिजनानां
सुन्दर-स्वप्नः कुत्र विलुप्तः ?
मातुरुद्धारे चिन्तनशीलाः
संस्कृत-शुद्धास्ते किमु सुप्ताः ?

प्राचीनभाषा संस्कृतम्

-प्रा.नारायणप्रसादशर्मा कट्टेल
धरानस्थः

वदतु संस्कृतं पठतु संस्कृतम् ।
चलतु संस्कृतेऽहर्निशं भवान् ॥
तव जयोत्सवं संस्कृतेन हि ।
भवति निश्चयो विश्वमण्डले ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

संस्कृते किं किं न विद्यते ?

-दामोदरः दाहाल
सुनसरीजनपदीयः

संस्कृतमिति भाषाया नाम इत्यभिधीयते ।
एतां भाषां ब्राह्मणानां वदन्ति स्वल्पवेदिनः ॥

भाषेयं ज्ञानसम्पन्ना विज्ञानेन समन्चिता ।
प्रयुक्ता तत्र देवैश्च ऋषिभिर्ब्रह्मवेदिभिः ॥

वेदवेदान्तज्योतिःसु ग्रहरेखासु वै तथा ।
व्याकरणे दर्शने चैव संस्कारे मृत्युजन्मनोः ॥

क्षत्रियेषु च विप्रेषु चान्यजातिषु व्यापिका ।
आयुर्वेदो धनुर्वेदो लिखितः पूर्वसूरिभिः ॥

इयं भाषा तु सर्वत्र हिन्दुराष्ट्रे विशेषतः ।
इतिहासपुराणानि लिखितानि हि संस्कृते ॥

कर्तव्याकृत्ययोर्ज्ञानं भवत्येव न संशयः ।
महाकाव्ये खण्डकाव्ये प्रयुक्तं संस्कृतं पुरा ॥

नेपालिराष्ट्रभाषा च हिन्दीभाषा तथैव हि ।
संस्कृतस्य सहाय्येन सौन्दर्ये प्रथितास्तथा ॥

प्राप्यन्ते जर्मनीराष्ट्रे वेदवेदान्तवेदिनः ।
वदन्ति ज्ञानिनः सर्वे वेदमूलं हि संस्कृतम् ॥

विज्ञानेन समायुक्तं जयतु संस्कृतं सदा ।
पठन्तु ज्ञानिनः सर्वे भाषेयममरा सदा ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्रीपञ्चकन्यास्तोत्रम्

-प्रा.डा. भरतभट्टराई
सुनसरीजनपदीयः

गौतमी सुन्दरी पूज्या ब्रह्मणो जनिता पुरा ।
रामपादरजो जाता साहल्या प्रपुनातु नः ॥
पाञ्चालराजदुहिता पञ्चपुत्रवती च या ।
पञ्चपाण्डवपत्नी च द्रौपदी नः पुनातु सा ॥

वालीवानरसन्तुष्टा जननी ह्यङ्गदस्य च ।
सुग्रीवमर्कटोद्वाहा सा तारा नः पुनातु वै ॥
शूरसेनस्य दुहिता कुन्तिभोजस्य नन्दिनी ।
पाण्डोः प्रथमपत्नी या कुन्तीदेवी पुनातु माम् ॥

मयदानवपुत्री या भार्या लङ्केश्वरस्य च ।
माता चाक्षयमेघस्य मन्दोदरी पुनातु माम् ॥
इतीदं पञ्चकं स्तोत्रं यः पठेत् देविसन्निधौ ।
पञ्च कन्याः सुसन्तुष्टा ददत्तेऽखिलवाञ्छितम् ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जयतु संस्कृतम्

-योगेश्वरः वडाल
धरानस्थः

सकलभारती वाङ्मयस्थली
लिपिसुसज्जिता देवनागरी ।
उपनिषद्युतं ब्रह्मसूत्रकं
जयतु संस्कृतं विश्वमातरम् ।

बहुपुराणकं ब्रह्मसूत्रकं
सकलदर्शनै स्तर्कसज्जितम् ।
जनककल्पितं देवपूजितं
जयतु संस्कृतं विश्वमातरम् ।

मनुजचिन्तितं वागिवभूषणं
सतत-वाञ्छितं ज्ञानशालिना ।
सततसेविता स्वच्छचिन्तकैः
प्रतिवसन्ति ये शास्त्रपण्डिताः ।

भरतभारतं भट्टिभारवि-
सुकविभी रसास्वादनिर्मितम् ।
गणित-योग-वेदान्तदर्शनं
जयतु संस्कृतं विश्वमातरम् ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शिववन्दना

-लोकनाथः लुइटेल
सुनसरीजनपदीयः

परिवारधनादिविहीनतया ह्यतिखिन्नमनाः समुपागतवान् ।
जगदीश्वर ! शङ्कर ! हे भगवन् ! श्रृणु मे वचनं स्तुतिपद्यमयम् ॥

जयसिद्धिविधानकरं शिवदं मृगचर्मधरं धृतशूलकरम् ।
शरचापयुतं धृतनागगलं प्रणमामि शिवं परमाधिपतिम् ॥

उमया सहितं हिमशैलगृहं जनकष्टहरं भवमोक्षकरम् ।
अतिसुन्दरताण्डवनृत्यकरं प्रणमामि शिवं परमाधिपतिम् ॥

विषमज्ज्वरतापहरं परं ग्रहदोषविनाशकशान्तिकरम् ।
शरणागतरक्षणकर्मकरं प्रणमामि शिवं परमाधिपतिम् ॥

सुरनिम्नगया क्व च दिव्यतमं शशिना रुचिरं समगौरतनुम् ।
गरलेन सुनीलगलं सुखदं प्रणमामि शिवं परमाधिपतिम् ॥

शशिसूर्यधनञ्जयवन्नयनं नयनानलकामहनं वरदम् ।
वलवुद्धिधनायुरनन्तकरं प्रणमामि शिवं परमाधिपतिम् ॥

भवसर्जनपालननष्टकरं विषभक्षणसज्जनमोदभरम् ।
लघुतुष्टतया महनीयगुणं प्रणमामि शिवं परमाधिपतिम् ॥

भवतश्शरणं समावाप्य मया समधीतमिदं शुभशास्त्रवचः ।
अभवत् सुसुखं भवतः कृपया भगवन् ! अवलोकय मां सततम् ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कविता विलुप्ता

-महानन्दतिमिल्सिना
पिण्डेश्वरविद्यापीठीयः

भीता जनैरसुरकैरपकारचित्तै-
र्युद्धापराधविभवैः परशोकदानैः ।
खिन्ना विमूढमनसा गलितस्वरूपा
मन्येऽधुना सहचरी कविता विलुप्ता ॥

वाधाऽभवत् विचलितुं भुवि लोकमार्गे
स्वास्तित्वरक्षणविधावसमर्थभूते ।
हिंसासमर्थितजनैश्च तिरस्कृता सा
प्राप्ता सदा विफलता, कविता विलुप्ता ॥

ग्रामेऽपि दुष्टकपटाः निवसन्ति चौरा
द्रव्यादिलुण्ठनविधौ च भवन्ति शूराः ।
जानन्ति नैव कवितां कविपूजितां ताम्
दृष्टा किमत्र भवता कविता विलुप्ता ?

स्वार्थान्धकारितमिदं नगरं सुरम्यम्
दावाग्निना वनगतेन विनाशितं तम् ।
राहो-र्मुखे परिगता मृदुचन्द्रतुल्या
सा सुन्दरी नवरसा कविता विलुप्ता ॥

अस्याः सखी कमलिनी मलिनी च जाता
नद्यः स्वयमतिकृशाः, गृहवाटिका सा ।
दैन्या भ्रमन्भ्रमरकोकिलगानशून्या
तेनैव सा रुचिकरा कविता विलुप्ता ॥

देशे न शान्तिरथवा न च कान्तिरस्ति
संरक्षको न कुशलो न च धर्मवृत्तिः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नेतृब्रुवां मतिगताः विकलाः कृतघ्नाः
निर्वर्ण्य तान् विचलिता कविता विलुप्ता ॥

वैदेशिकैरधिगता चरमोन्नतिस्तैः
समृद्धिशान्तिसबलाः प्रखरस्वभावाः ।
स्वल्पा हिमाद्रिकुलजाश्च वयं वराकाः
निश्चित्य लज्जिततमा कविता विलुप्ता ॥

खाद्यान्नसङ्कटतया सततं बुभुक्षा-
वासो न वस्त्रमुचितं विविधाश्च पीडाः ।
एतादृशीं मतिमशान्ततमां समस्यां
दृष्ट्वाऽधुनातिमृदुला कविता विलुप्ता ॥

नैपालकान् परिजनानतिदीनभावान्
प्राप्तान् विवर्णवदनान् विकलस्वभावान् ।
संलक्ष्य सत्कविगतापि समाकुला सा
धिक्कारयन् खलजनान् कविता विलुप्ता ।

जयतु संस्कृतम्

-नारायणभण्डारी
धरानस्थः

जयतु संस्कृतं धर्मपालनं
धर्महेतवे सत्यभाषणम् ।
आर्षदुर्लभं दीर्घजीवनं
तर्हि शोभनं जयतु संस्कृतम् ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नयपालदेशः

-टेकनाथः घिमिरे
झापाजनपदीयः

भूमन्डलोन्नतशिरा रमणीयदेश
उद्यानवत् बहुलवेशगतः स्वतन्त्रः ।
आत्मीय-स्नेह-सजनेष्वनुराग एकः
सद्भाव-स्नेहभरितो नयपालदेशः ॥

हिन्दुत्वमेव बहुलं नयपालदेशे
संस्कारपद्धतिरथो नयपालदेशे ।
पूर्वीयचिन्तनमिदं नयपालदेशे
जातेरनेकसमता नयपालदेशे ॥

साक्षात्सदाशिवसुरक्षित एष देशः
सिद्धार्थगौतमपवित्रितसुप्रदेशः ।
सद्धर्मपालकशिरोध्वजशासितेयं
धन्या धरा जनकजाजनुषा पवित्रा ।

विश्वस्य रम्यप्रकृतिर्नयपालदेशे
देवालयाः प्रतिगृहं नयपालदेशे ।
नेतृप्रवञ्चनयुते नयपालदेशे
छिन्नं सुशासनमतो नयपालदेशे ॥

नेनामधेयमुनिना परिपालनेन
नेपालनाम ह्यभवत् कथयन्ति यस्य ।
विस्मृत्य धर्म-हितचिन्तन-कर्म सद्यः
सन्दृश्यते कथमहो ! विपरीतमद्य ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

परित्राणस्तवः

-दामोदरः पोखरेल शास्त्री
(भू.पू.शिक्षकः, अर्जुनधारावेदविद्यापीठस्य)

ॐकारेण समन्विता सुखकरी लोकत्रये संस्थिता
तद्रूपा हससा स्मृता सुमानसा तापत्रयोत्तारिणी ।
तस्येशस्य सदा समस्तसवितुर्ज्योतिर्मयी शाश्वती
सा देवी त्रिपदी स्मिता मनसि मे दिव्यं महो दीपयेत् ॥

तद्रूपिणी सकलतारणतत्परा च
कृष्णानने सततवासकरी प्रसिद्धा ।
सद्रूपिणी शशिसमा सकलैकरम्या
ब्रह्मेश्वरार्चितपदा सुरलोकवन्द्या ॥

विश्वेश्वरप्रणयकारणविश्वरूपा
विश्वार्तिहा विविधदेवसमाजमुख्या ।
तुर्यं सुखं तव कृपासुलभं प्रसिद्धं
संसाररागशमनी च सदा भव त्वम् ॥

वर्षासमा सकलशीतलदानशीला
वाञ्छाप्रदा भुवनपाशविमुक्तिहेतुः ।
रे अम्ब भक्तजनचित्तनिवासशीला
लोके द्विजातिरसनाकृतशान्तवासा ॥

ण्यन्तादिभिर्विविधशब्दसमुद्भवैश्च
शास्त्रादिज्ञानरहितान् विदुषः करोषि ।
भद्रं विचारयसि भद्रजनस्य नित्यम्,
दुर्भावदर्पदहनाय दयार्द्रचित्ता ॥

रेफेण रक्षसि रमे सकलान् द्विजान् वै
रोगादिदूरकरणाय कृपाकटाक्षा ।
गोविन्दपादयुगलस्य सुचिन्तनाय
गुर्वर्थदे गुरुजनांश्च गुरून् करोषि ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

देवाधिदेवकृतवन्दनपादपद्मे
दीनेषु दृष्टिमवतारय तारणेशि !
वश्याः समस्तजगतस्तव भूसुरा ये
विद्याविचारणविशुद्धधियश्च सन्ति ॥

स्यकाररूपललिता शरणागतानाम्,
शान्तिप्रदो मनसि मे वस सर्वदा त्वम् ।
धीरा धनेशि धम तं मम धूममार्गं
नारायणस्य पदयोः कुरु मानसं मे ॥

मन्दस्मिते न चल मे मनसः कदापि
त्वद्दृष्टियुक् जगति कः परिषीदतीति ।
हित्वा नयन्ति विवुधास्तवपादमूलम्,
तस्मात्तवाङ्घ्रियुगलं शरणं गतोऽस्मि ॥

धि ! त्वं स्थिता धवलरूपधरा धरण्याम्,
धीरैर्विशुद्धहृदये च धृता सुरम्या ।
योगासने सफलदा फलदा सुचिन्त्या
भद्रात्मिका भवतु मे हृदये शयाना ॥

योगान्वितान् स्थिरधियो विवुधांश्च देवि
संसारपारगमनान् प्रकरोषि नित्यम् ।
नम्रैः समर्चितपदे नयनाऽभिरामे
मातस्तवैव पदयोः प्रणतोऽस्मि मूर्ध्ना ॥

प्रज्ञाविवर्धनपुराणवरैः स्तुतासि
साक्षात् पुराणपुरुषस्य मुखे वसन्ती ।
चोरादिभीतिभरिते हृदये मदीये
मातः समानय मुकुन्दपदारविन्दम् ॥

दक्षासि माधवपदस्य प्रदानकार्ये
दानादिदक्षजनतारणकारिणी त्वम् ।
यात्युन्नतं तव जनः सकलैकरम्यं
स्थानं मुकुन्दशरणं हि विकारशून्यम् ॥

तस्माज्जनं धनकुले बलवैभवञ्च
मानं सुखं सवनियं नवयौवनञ्च ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सर्वं क्षणार्पितपदं भुवने विहाय
गायत्रि हे भयहरे शरणं गतोऽस्मि ॥

मातस्तवैव कृपया मनसि स्थिताया-
स्त्वामेव नम्रशिरसा शुभदा प्रणम्य ।
कामादिसौख्यसकलं भुवने विहाय
नारायणस्य चरणौ शरणं प्रपद्ये ॥

सूत्राक्षरी कविता

-पुरुषोत्तमः खतिवडा
सहप्राध्यापकः, धरानस्थः

संयोगे गुरु आतः टावृचि मधोः भूते च आमेत चौ,
गर्हायां च हलश्च यश्च यङ शे दाधाघ्वदाप् छे च टेः ।
लोपो व्योर्वलि वृद्धिरेचि यचि भं द्वन्द्वे च हीने सुपः
लृट् शेषे च स उत्तमस्य अत इञ् झेर्जुस् क्षियः श्लौ चङि ॥

पूर्वोऽभ्यासः प्रतेश्च द्रोश्च छे च लुङ् धातोः मनस्तद्धिताः
कालाः सामि द्विगुश्च नौ ण च सुपः द्वन्द्वाच्छ नद्यां मतुप् ।
भ्रातुर्व्यच्च स्वसुश्च फेश्च्छ च कलेर्ढक् योजनं गच्छति
पात्रात् ठन् उगितश्च प्रेद्रुस्तु श्रुवः वौ क्षु श्रुवः छन्दसि ॥

वर्गान्ताच्च पदात् गतिश्च पतः पुम् याडापः औत् घेर्ङिति
ओमाङोश्च अचश्च सौ च नमुने स्तन्भेः यमो गन्धने ।
हेमन्ताच्च अदेङ्गुणः डति च चौ वृद्धाच्छः यूनस्ति टेः
नाभ्यस्ताच्छतुः कुत्सिते प्रहरणं काम्यच्च क्षुभ्नादिषु ॥

पात्राठन् ख च द्रोश्च वाहः कृदतिङ् च्लेः सिच् उरच् आच हौ
आङ्माङोश्च अतो गुणे ल्यपि च शे गेहे कः रायो हलि ।
कोशाड्ढञ् धनुषश्च तोर्लि हनः सिच् स्तन्भेः सहेः साडः सः
स्थाघोरिच्च सहे च सामि जसः शी शश्छोऽटि ढश्छन्दसि ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सच्छिक्षा

रोहिणीप्रसादः खनाल
संखुवासभाजनपदीयः

कस्यचित् किमपि नो हरणीयं, मर्मवाक्यमपि नोच्चरणीयम् ।
श्रीहरेः पदयुगं स्मरणीयं, लीलया भवभयं तरणीयम् ॥
१

सत्यवाक्यमनिशं कथनीयं, सर्वदा जनहितं करणीयम् ।
स्वस्य धर्मोऽपि नो त्यजनीयः विश्वमीश्वरमयं स्मरणीयम् ॥
२

रामकृष्णौ सततं जपनीयौ, श्रीहरेः शुभपदौ भजनीयौ ।
आत्मतत्त्वविपयो मननीयः, चित्तशुद्धिकरणे यतनीयम् ॥
३

प्रत्यहं हरिकथाः श्रवणीयाः, वाल-वृद्ध-वनिता भरणीयाः ।
सभ्य-साधुजनता नमनीयाः, शास्त्रपारगगतिः करणीया ॥
४

स्नानदानविधिर्नो त्यजनीयः, धर्मकर्म-विहितं ग्रहणीयम् ।
विश्व-बान्धवकुलं स्मरणीयम्, रुक्षभापणकला त्यजनीया ॥
५

दुष्टगीः श्रुतिकटुः सहनीया, क्षुद्रधीर्यदि स्वयं शमनीयाः ।
गेहस्वर्गमयता जननीया गृहिणी यदि भवेत् रमणीया ॥
६

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

संस्कृत-कविताङ्ग्रहस्थानां कवितानां समीक्षणम्

सहप्राध्यापको नवराजः कट्टेल

१. विषयप्रवेशः

जयतु संस्कृतमिति संस्था प्रतिवर्षं संस्कृतकविसम्मेलनमायोजयति। वर्षाणां षोडशत इयं प्रक्रिया निरवच्छिन्नतया प्रचलितेति गौरवं मोदञ्च प्रकटयति। तेषु कविसम्मेलनेषु सवाचनं प्रस्तुताः कविताः सङ्कलय्य पूर्वमेव संस्कृतकवितासङ्ग्रहस्य प्रथमं पुष्पं संस्थया प्रकाशितम्। तस्मिन् कवितासङ्ग्रहे शताधिकानां जनानां शताधिकाः कविताः प्रकाशिता आसन्। प्रकृते कवितासङ्ग्रहेऽपि शताधिकानां जनानां कविताः प्रकाशिताः सन्ति।

२. काव्यं काव्यप्रकाराश्च

काव्यं द्विविधं, श्रव्यकाव्यं दृश्यकाव्यञ्च। अभिनेयं नाटकादिकं दृश्यकाव्यं द्विविधं रूपकोपरूपकभेदेन। श्रव्यकाव्यञ्च द्विविधं गद्यं पद्यञ्चेति। पद्यकाव्येषु महाकाव्यं, खण्डकाव्यं, कोषकाव्यं, व्रज्या, इति भेदा भवन्ति। तथैव छन्दोवद्धपद्यभेदेषु मुक्तकं, युग्मकं, सन्दानिकं, कलापकं, कुलकञ्चेति। गद्यकाव्येषु वृत्तगन्धि, उत्कलिकाप्रायम्, चूर्णकञ्चेति। चम्पूः, विरुदं, करम्भकञ्च काव्यानामन्ये भेदाः सन्ति। कवितापि काव्यस्यैव भेदः। आधुनिकास्तु काव्यस्य लघुतरलघु-मध्यमवृहद्वृहत्तरभेदेषु क्रमशः मुक्तकस्फुटकविता-खण्डकाव्य-महाकाव्यविकासशीलमहाकव्यानि प्रदर्शयन्ति पञ्चविधतयाऽऽकारदृष्ट्या।

तत्र साधारणकाव्यलक्षणन्तु **वाक्यं रसात्मकं काव्यम्** इति। तथैव **निर्दोषं गुणवत् काव्यमलङ्कारैरलङ्कृतम्** इत्यपि पूर्वाचार्यैः प्रतिपादितं काव्यलक्षणम्। काव्येषु रसालंकारध्वनिरीतिवक्रोक्त्यौचित्यवादानाञ्चोपयोगः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भवति। तेषु च रसालंकारध्वनीनामुपयोगः प्रायेण सर्वेषु काव्येषु, सर्वासु च कवितासु दरीदृश्यते। परन्तु अनया एव दृष्ट्या सङ्ग्रहे प्रकाश्यमानानां कवितानां विवेचनं क्रियते, न सर्वासाम् अपि कवितानां तयैव दृष्ट्या विवेचनं क्रियते। कतिपयाः कवितास्तु केवलं पद्यरचना एवं प्रतिभान्ति, कवित्वशक्तिस्तु तत्र दुर्वलैवानुभूयते। सारस्वतप्रतिभां विना कवित्वशक्तेरुदयं नैव भवति। अतः शास्त्रकारैरपि उक्तं **नरत्वं दुर्लभं लोके विद्या तत्र सुदुर्लभा। कवित्वं दुर्लभं लोके शक्तिस्तत्र सुदुर्लभा।** इति।

३. अत्रत्यानां कवितानां समीक्षणम्

अस्मिन् कवितासङ्ग्रहे विविधभावविचारशैलीयुतानां कवितानां प्रस्तुतिर्विद्यते। दार्शनिक-धार्मिक-सांस्कृतिक-शृङ्गारिक-भक्तिपरक-प्रकृतिचित्रणयुतानां कवितानां -राजनीतिक-व्यङ्ग्यप्रधानानां कवितानाञ्च प्रस्तुत्या सङ्ग्रहोऽयमतीव गौरवास्पदं जातमित्यहं मन्ये। कतिपयकविभिः हत्या-हिंसातः क्षतविक्षतस्य नेपालस्य वर्णनं विहितम्। तैः कविभिः स्वकीयासु कवितासु आतङ्कदावानलान्नेपालराष्ट्रं नेपालवासिनश्च समुद्धर्तुमाहूताः सन्ति जनाः। अस्या हिंसायाः शृङ्खला किमर्थम् ? कस्य हेतोः, कदापर्यन्तं प्रचलति हिंसारूपं दुष्कर्म ? इति कविभिः प्रश्ना उत्थापिताः। मनुष्याणां हिंसनं न कस्या अपि समस्यायाः समाधानमिति तैरुक्तम्। नेपालिनां मिथः संघर्षेण न संभवति नेपालस्य कल्याणम्, नेपालिनाञ्चाभ्युत्थानमिति तेषां कवीनां धारणा सुरभारत्यां सम्प्रवाहिता दरीदृश्यते। कतिपयैः कविभिः सुरगिरो महत्त्वं प्रतिपादितञ्चेत् कतिभिश्च कोविदैर्भूस्वर्गरुपाया नेपालधरायाः प्रकृतिगतसौन्दर्यं परिगीतम्। अन्यैश्च कतिपयैर्विद्वद्धौरेयैः स्वकीयासु रचनासु नेपालस्य राजनीतेर्दुरवस्था परिचर्चिता। अपरैश्च काव्यरचनाशिल्पिभिर्नेपालस्य आर्षसंस्कृतेः, सभ्यतायाः, धर्मस्य च योऽपकर्षो विद्यते तमुपरि चिन्तां प्रकटय्य आर्षेयसंस्कृतिसभ्यतामर्यादानां संरक्षणाय यतनीयमिति धारणा स्थापिता। कतिपये कवयः कोमलकान्तपदावलिभिर्युवतीनां सुन्दरीणां वाह्याभ्यन्तरं सौन्दर्यं वर्णयन्ति। शास्त्रीयच्छन्दस्सु विरचितानां कवितानामाधिक्यमत्र वरीवर्ति चेत् स्वतन्त्रगद्यलये विरचितानां कवितानाञ्चोपस्थितिः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

काव्यसौन्दर्यं बर्भर्ति। रसालङ्कारव्यञ्जनादिभिश्च कतिपयाः कविताः सौन्दर्यमावहन्ति। अयं कवितास्रग्ङ्हो नैपालकानां शेमुषीमतां सूरीणां कविवर्याणां कवितानां प्रतिनिधित्वञ्चर्कर्ति।

(क) सुरवाण्याः प्रशस्तिः

अस्मिन् कवितासङ्ग्रहे प्रकाशिताः कतिपयकविताः सुरवाणीं प्रशंसन्ति, आर्याणां देवभाषायाः संरक्षणाय, संवर्द्धनाय च सर्वैः संस्कृतानुरागिभिर्यतनीयमिति भावनां संवहन्ति। ते कवयः संस्कृतस्यापकर्षं प्रति दैन्यमनुभवन्ति। यथा- आचार्यस्य खेमराजकेशवशरणस्य गीतिकवितायां संस्कृतस्य महत्त्वं प्रतिपादितम्

विद्या सकला ज्ञानं निखिलं तव वाङ्मयनिहितम्।

गहनगभीरं दर्शनममलं भुवने तव विदितम् ॥जय॥

कविष्टीकारामोऽधिकारी सुरवाणीं प्रशंसन्नाभणति -

'रुचिकरी दिवि या रुचिराक्षरा, प्रकृतिगा पदपट्पदगुञ्जिता।

स्थिररसा शुभकल्पलतेव या भवतु सा सुरवाग् भुवि सुस्थिरा। इति।

कवी रामहरिरपि वाणीं वन्दमानः संस्कृतस्य महत्त्वं वर्णयति।

कविर्दुर्गाप्रसाददाहालः कथयति यत् *'प्रथमचेतनाविश्वसभ्यता-मनुजभावना- व्यापिचिन्तनम्, दिविजभूमिजैः सुष्ठु चर्चितं जयतु वाङ्मयं संस्कृतात्मकम्।* इति। रमेशखकुरेलः संस्कृतभाषायाः समुपेक्षां प्रति चिन्तितोऽस्ति -छात्रावासे विद्यालये वा, विद्यादानं नैव ते इच्छन्ति, मिष्टान्मिष्टां संस्कृतां देववाणीं, द्वेषं कृत्वा शिक्षकान्वाधयन्ति, इति रामचन्द्रगौतमः संस्कृतस्य महत्वं दर्शयति- वेदसंस्कृतरूपत्वात् तस्मान्निर्गतसंस्कृतेः। मूलं संस्कृतमित्याहुः संस्कृतिज्ञा मनीषिणः इति। विष्णुप्रसादशर्मा देवकोटा संस्कृतस्य महत्त्वं प्रतिपादयन् कथयति -

अधीतवान् सश्रममाङ्ग्लवाङ्मयमुपेयिवान् वास्तुकलाञ्च पश्चिमाम्।

नाधीतवान् स्वादु च संस्कृतं वचो, वृथा गतं तस्य नरस्य जीवनम् ॥

इति।

धादिङजनपदीयो हरिप्रसादगौतमः संस्कृतस्य महत्त्वं दर्शयति- *'ज्ञानविज्ञानयोर्मूलं सदा जयति संस्कृतम्'* इति। धादिङवास्तव्यः स्व.

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सिद्धिनाथगौतमश्च सरलया देववाण्या संस्कृतस्य महत्त्वं प्रतिपादयति। नारायणदत्तशास्त्री च संस्कृतभाषायाः महत्त्वं प्रख्यापयति यथा - *'याज्यं दूरमनाहतं प्रतिदिनं सेव्यं सदा संस्कृतम्'* इति। योगेश्वरवडालः संस्कृतस्य महत्त्वं प्रतिपादयति, के के विषयाः सन्ति तस्यां भाषायामिति च सूचयति-

वहुपुराणकं ब्रह्मसूत्रकं, सकलदर्शनैस्तर्कसज्जितम्।
जनककल्पितं देवपूजितं जयतु संस्कृतं विश्वमातरम्' इति।

अन्येषामपि कवीनां वह्वीषु कवितासु एतादृश्य एव भावनाः समायाताः सन्ति, ताश्च पठनीयाः सन्ति।

(ख) हत्याहिंसादीनां विरोधः

नेपालराष्ट्रे राजनीतिकदलानामान्दोलनस्य कारणाद् हत्याहिंसादीनां संपोषणं जातम्। संघर्षस्य क्रमे पञ्चदशसहस्रतोऽधिकानां जनानां जीवनं वृथैव नष्टम्। कतिपयानां वालानां, कतिपयानां वृद्धानां, कतिपयानां नारीणां, वहूनां यूनाञ्च जीवनं वृथा गतम्। अतः कवयो व्यथन्ते, रुदन्ति, क्रुध्यन्ति च। तेषां भावधाराणां निदर्शनं यथा -नेपालस्य अशान्तिं हत्याहिंसाञ्च दृष्ट्वा चेखिद्यते वेणीमाधवढकालस्य कवेर्हृदयम् सन्मैत्री स्खलिता, दया विगलिता, श्रद्धा च ह्रासं गता, सर्वत्रैव भयं विद्यते, मनुष्या जडा इव सन्ति, तेषामुपरि मृत्युर्नरीनर्ति द्यौःशान्तिमन्त्रोऽपि पाददलितोऽस्ति, अतः शान्तिरेव रोदितीति भावः सौन्दर्यपूर्णः प्रतिभाति।

सन्मैत्री स्खलिता दया विगलिता सन्दिग्धता सन्तता,
श्रद्धा ह्रासमिता गता मनुजता धर्मो विषण्णः स्थितः।
सर्वत्रैव भयं जडा इव वयं मृत्युर्नरीनृत्यति,
द्यौःशान्तिः शुभमन्त्रपादपतिता शान्तिश्चिरं रोदिति ॥ इति।

टीकारामोऽधिकारी कथयति यत् -कथमद्य विषाक्तधूमवद् गगनं भ्रान्तपतत्त्रिसङ्कुलम्? हिमशैलमनोहराऽटवी रुचिहीना ज्वलतीव हा! भुवि॥ कवी रामहरिदाहालोऽपि वर्णयति –

दुर्भावदुर्धरदवावलिमासमन्ताद् धाराजलैस्सुमतिभिः सकलं निशाम्य।
दत्त्वा जनाय नवजीवनदायिशक्तिं शान्तिप्रियो भवतु
नूतनवत्सरोऽयम् ॥ इति।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कविर्यदुपन्थी देशस्य कीदृशी स्थितिर्विद्यत इति चित्रयति स्वकीयैः पद्यबन्धैः-

स्तब्धा ग्रामा गलितप्रतिभाः शून्य-विद्यालयाश्च,
पूजाहीना वहुसमयतोऽनाथदेवालयाश्च ।
दृष्ट्वाऽस्माकं दुःखितहृदयं छिद्यते भिद्यते च,
भाग्यादस्मान्मनुजहतकैर्नाश्यतेऽयं स्वदेशः ।

नेपालीसाहित्ये चर्चितः कवी रमेशखकुरेलोऽपि धरा आक्रान्ता, चण्डमुण्डप्रचण्डानामातङ्को व्याप्तः, अत्र न कोऽपि त्राणकर्ता विद्यते, मुराररिेव त्रातुं शक्नोतीति भावं व्यनक्ति । तत् सौन्दर्यमावहति - 'भाराक्रान्ता भूरियं क्रन्दतीव विष्णो त्रायस्वेति चिन्तातुरेव, श्रुत्वा तस्याः क्रन्दनं विष्णुनैव सृष्टो मन्ये वाबुरामाख्य एषः । नूनं ध्येयस्त्राणदाता मुरारिः, दुष्कृत्यानां यो हि संहारकारी' इति च । नवराजकट्टेलस्य गद्यकवितयामातङ्कस्य चित्रणं सम्यक्तया विहितमस्ति यथा -'कुत्रचित् बम्ववर्षणं, कुत्रचित् चन्द्रहासघर्षणं, कुत्रचित् जने जने अश्रुपातनं, कुत्रचित् ग्रामे ग्रामे मानवघातनम्, अयि भुवि मानवता कुत्र गता, अयि भुवि दानवता शिखरायिता ?' इत्यनेन प्रकारेणातङ्कस्य मानवहिंसायाश्च चित्रणमेतेन कविना सुष्ठु विहितम् । श्रीरामोऽधिकारी स्वस्य कवितायां गृहे, राष्ट्रे च विद्यमानाम् अशान्तिं प्रति खिन्नतां प्रकटयति । यथा - गृहस्य राष्ट्रस्य वा शान्ति दूरे गता, कोलाहलं, वैमनस्यं, दौर्भाग्यमिहोपस्थितमिति कवते मधुरया वाण्या ।

माधवलामिछाने इत्यस्य 'रक्तं पिवन् भ्राम्यति वर्तमानः' इति कवितायां वर्तमानकालो नैपालकानां वेश्मनि, प्राङ्गणे, शाद्वले, वने, शैले च विद्रोहं विध्वसञ्च वितत्य, रुधिरनदीं संवाह्य, मर्त्यान् तर्जयन् भ्राम्यतीति कल्पना मनोहारिणी दृश्यते -

मृगेन्द्रदन्तैर्विपिनेषु तिष्ठन्, ग्रामेपु ग्रामेपु नरान् प्रतर्जयन्,
निर्दोषमर्त्यान् सरलान् निहत्य, रक्तं पिवन् भ्राम्यति वर्तमानः । इति ।

हिमालयभट्टराईमहोदयोऽपि हत्याहिंसादिभिर्नेपालिनां हर्म्यं ध्वस्तं, वन्धूनां विहिंसनं, रुधिराभिषिक्तं, दग्धं मनश्च जातमिति सुललितदेववाण्यां प्रस्तौति-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

'किं श्रूयते ध्वस्तगृहङ्गता कथा क्व कल्प्यते वन्धुविनाशनव्यथा !
विधीयते किं रुधिराऽभिषेचनं क्व दृश्यते दग्धमनोऽभिषिञ्चनम् ! इति ।

रञ्जनसिग्देलोपि तादृशीमेव भावनां व्यनक्ति -

हिंसा-हत्या-मनुजकलहैर्ग्रस्यमानोऽस्ति नित्यं
ताड्यन्ते वै सरलजनता नैव तासां सुरक्षा ।
विस्फोटाग्निग्रसितप्रकृतिः फल्गुसिद्धान्तप्राप्त्यै,
सर्वे स्तब्धा वद बुध !कथं शान्त-नेपाल-देशः' इति ।

(ग) राजनीतिकव्यङ्ग्यम्

नेपालस्य राजनीतिः कुपथं गता, जनानां भावना तिरस्कृता, भ्रष्टाचारस्य साम्राज्यं प्रसृतम्, सत्पुरुषा न्यक्कृताः कुपुरुषाणां दिग्विजयो जातः, राष्ट्रियभावनायाः पतनं, धूम इव आतङ्कवादी परिभ्रमति, रजानीतौ सत्तासंघषः, शक्तिसंघर्पश्च विद्यते, राष्ट्रनिर्माणाय न कोपि चिन्तयति, यतते च, दलनेतारः दलस्य हितमेव वाञ्छन्ति, न राष्ट्रस्य हितम्, अतो नेपालिजातेः राष्ट्रस्य च रक्षणाय सर्वैर्यतनीयमिति भावना कवीनां विद्यते । सा भावना देववाण्यां सुललितैः पद्यैः प्रवाहिता । यथा भीमप्रसादखतिवडा कथयति -

'भ्रष्टाचारे निर्लिप्तास्ते, राष्ट्रघातके कार्ये व्यस्ताः ।
राष्ट्रियता हि जीर्णा-शीर्णा, 'नवनेपालस्तेषां गीता ॥ इति ।

कविर्वद्रीपोखेलोऽपि राष्ट्रस्य व्यथां विपत्तिं च प्रकटयति -

अन्नेन रहितो देशोग्रामाः शून्या जनैर्धनैः ।
केचित् प्रविष्टा विपिने केचिन् नगरगामिनः ॥
अस्माकं वान्धवाः केचित् निरुद्योगत्वमाश्रिताः ।
नैतत् हर्पस्य विपयो न चेदं गौरवास्पदम् ॥

मुकुन्दप्रसादलामिछानेऽधुना राष्ट्रियता कुत्रास्तीति प्रश्नमुद्भावयति -

विद्यालये वा स्वजनालयेऽथवा मन्त्रालये वा वसनालयेऽथवा ।
नाट्यालये वा भुवनालये शुभा क्व विद्यते राष्ट्रियता समुज्ज्वला ॥

हिमालयभट्टराईमहोदयस्य सर्वाश्च कविता राजनीतिक व्यङ्ग्यं प्रदर्शयति ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

माधव एष नेपालः कस्य त्यागं करिष्यति ?,
मरिष्यति परन्त्वस्य मन्त्रित्वं न मरिष्यति ।
को जानाति प्रचण्डोऽयं कस्य त्यागं करिष्यति ?
मरिष्यति परन्त्वस्य चण्डत्वं न मरिष्यति ।

प्रचण्ड-शेरौ गिरिजाप्रसादः श्रीमाकुने भान्ति दलेश्वरेषु !
सत्तेश्वराः सन्तिं धनेश्वराः किं महेश्वरा वा परमेश्वरा वा !!।' इति हेमराजपौडेलोऽपि व्यङ्ग्यं करोति-

'न राजाख्या नीतिः प्रचलति, न वा कापि विदुषां,
विकासार्था नीतिः, परमिह मदोन्मत्तमनसाम् ।
शठानां देशेऽस्मिन् विकटशठनीतिर्विजयते' इति ।

चन्द्रमणिर्नेपालः स्वकीयां भावनामेवंप्रकारेण व्यनक्ति -

भाव्यं मित्रेण तावद् भवति तदरिवत् शत्रुणा मित्रवद्यत्
यत्कार्यं तन्न कार्यं यदकरणविधिः सो विधेयो विधेयः ।
बुद्धीनां वैपरीत्याद् दलतुरगजुषां त्वं हि दूरेऽसि किम्भो
शान्ते ! एह्येहि कान्ते ! त्वरितमिह वयं त्वत्प्रतीक्षारताः स्मः ॥ इति ।

वैयाकरणः स्व.टीकारामपन्थी -स्वकवितया दलानां कार्येषु असन्तुष्टिं प्रकटयति। यथा पोखरानगरे नेपालराष्ट्रस्य निर्मातुः पृथ्वीनारायणशाहस्य प्रतिमा धूलिसात्कृता, शिक्षणसंस्थायाः नाम एव ते परिवर्तयितुं वाञ्छन्ति, तेषु व्यङ्ग्यं करोति कविः पन्थी । तोयराजनेपालोऽपि देशस्य दुर्दशां दृष्ट्वा खिद्यते । अन्ये च वहवः कवयो नेपालस्य दुरवस्थां वर्णयन्ति, सुधारस्यापेक्षाञ्च कुर्वन्ति ।

(घ) शृङ्गारभावधारा

कतिपयैः कविभिः स्वरचितायां कवितायां शृङ्गारभावधारा प्रवाहिता, युवतीनां सौन्दर्यं परिगीतं, तासां सुन्दरीणां स्थूलसौन्दर्यं सूक्ष्मसौन्दर्यञ्च वर्णितम् । यथा- विष्णुराज आत्रेयः -

अधरं विना सुरतिः कथं विरतिः कथं सुरतं विना ।
सुभगः कथं सुभगां विना सुभगा कथं सुभगं विना ॥
वामाङ्गिनी वामत एव सुप्ता वराननं कान्तियुतं च दृष्ट्वा

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्मेराननाऽऽरक्तमुखी सकामा त्यक्तुं न शक्ता स्मर–धाम रामा ॥

-लमजुङवास्तव्यो मेदिनीनाथसुवेदी युवतीनां सौन्दर्यं वर्णयति-

एकं दृष्ट्वा भ्रमन्तं स्मरसदृशतनुं मुग्धनेत्रं युवानं,
कञ्चित्कालं तदानीं युवतियुवकयो "दृष्टियुद्धं वभूव" इति ।

शृङ्गारप्रियो नवराजकट्टेल: नारीसौन्दर्यं वर्णयति-

हास्यन्धत्ते ललितनयनं सप्तरङ्गैः सुरङ्गं,
स्मारं स्मारं नयनयुगलैरुह्यमानान् मनुष्यान् ।
किं किं ते मे मनसि लसितां भावधारां व्यनक्ति,
मन्दं हास्यं हृदि विलसतात् सुन्दरं सुन्दरीणाम्'। इति ।

अन्येषाञ्च कवीनां कवितायाम् अभिधारूपेण व्यङ्ग्यरूपेण च नारीसौन्दर्यस्य उपस्थितिर्दरीदृश्यते ।

(ङ) धर्मदर्शनभावयुता कविता

अद्यतने नेपाले धर्मस्य हानिर्नेपालस्य संस्कृति-सभ्यताया ध्वंसनं, वन्धुत्वभावनाया न्यक्करणं, सत्यस्य, न्यायस्य च अपाकरणञ्च दृश्यन्ते । केचित् कवयो धर्मं स्मरन्ति, ईश्वरं नमन्ति । ईश्वरस्य धर्मस्य संस्कृतेश्च महत्त्वं गायन्ति, केचित् देवीं, केचित् श्रीकृष्णं, केचित् पशुपतिं सश्रद्धं नमन्ति, भजन्ते च । केचित्तु वेदान्तदर्शनं प्रकाशयन्ति ।

कविष्टीकारामोऽधिकारी जगज्जननीं भगवतीमम्वां प्रणम्य स्तौति स्वीयैः पद्यैर्यथा-

'प्रणमति मातस्त्वदनुचरोऽयं सविनति कुर्वन् तव वरिवस्याम् ।
त्वमसि गतिर्मे नुद निजधर्मे हर विपदं मे जय जगदम्वे' इति ।

कवी रामहरिदाहाल: कीरशास्त्रस्य महत्वं प्रतिपादयन् कीदृक् ब्रह्म, कीदृक् जगत्, कीदृक् पञ्चतत्त्वम्, इन्द्रियाणां मनसश्च स्वरूपं किमिति बोद्धुं खलु पठनीयं कीरशास्त्रमिति प्रतिपादयति -

किं ब्रह्म किं जगदिदं किमु पञ्चतत्त्वं कानीन्द्रियाणि किमिदं मनसः स्वरूपम् ।
इत्थं विविच्य कथयेद् नररूपजातं कल्याणमिच्छसि सखे पठ कीरशास्त्रम्' इति ।

वाराणसीवास्तव्योः भूटानीयः हरिप्रसादोऽधिकारी नेपालराष्ट्रदेवं पशुपतिं नौति, स्तौति च-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

'पशुपतिं भवतापनिवारकं, निखिललोकसमर्चितविग्रहम् ।
सुवरदं प्रणतार्तिहरं परं शुभकरं जनदुःखहरं नुमः' इति ।

सनातनधर्मावलम्बी कविर्दुर्गाप्रसादः सत्यसाईदेवस्य वैशिष्ट्यं प्रतिपादयति,
दार्शनिकीं व्यख्यां करोति, सश्रद्धं स्तवसुमं प्रकीरति च -
सत्यं तं भगवन्तमाद्यपुरुषं साईं नमामीश्वरम् ॥ इति ।

धादिङजनपदीयः प्राध्यपको घनश्यामकँडेलः मनोनिरीक्षणकवितायां दार्शनिकभावनामेव गुम्फति ।

गोरखाजनपदीयो वैयाकरणो विष्णुप्रसादशर्मा देवकोटा कथयति- नेपालः सनातनहिन्दुराष्ट्रमेव । नेपालिनां कृते धर्मनिरपेक्षता नैव आवश्यकी । जनताभिर्धर्मनिरपेक्षता नैवानुमोदिता । नेतृवर्गैः वलात्कृतेति स्वकीयां धारणां व्यनक्ति -

'धर्मस्य निरपेक्षायां धर्मान्तरप्रचारकैः,
प्रचारो हि स्वधर्माणां कृतः स्यादनपेक्षितः ।
निर्धनेऽशिक्षिते देशे धर्मान्तरणदावतः,
मर्यादां लङ्घयिष्यन्ति दग्धाः सन्तो जना वत ॥ इति ।

कविः सोमराजकट्टेलो नेपालीभाषायां महाकविरेव । संस्कृतस्य छात्रत्वात् यदा कदा संस्कृते च लिखति यथा -

शालग्रामो गण्डकीगर्भजात स्तस्मादुक्तो वैष्णवो देश एषः ।
तस्मिन् देशे प्राणिनो ये भवेयु स्ते स्युः सर्वे वैष्णवा जन्मसिद्धाः ॥ इति

नवराजकट्टेल नेपालीविषयस्याध्यपकः संस्कृतस्य सम्मानभावेन प्रेमवशाच्च लिखति यदाकदा संस्कृतभापायां कवितां कीदृशी भवति संस्कृतिः? तत्प्रतिपादयति -

अध्यात्मं भुवि सेव्यते प्रतिदिनं ध्यानं यया तन्यते
यस्यां राष्ट्रियभावना च विपुला संवर्धते नित्यशः ।
पूज्या या खलु मानिनी मनुकुले प्राचीनता-संस्कृतिः
सत्यं ह्येव धनं विभाति परितः सा संस्कृतिः संस्कृतिः ॥

तथैव जनकभूमिं जानकीं च संस्तुत्य कतिपयपद्यैरार्षभूमेः सौन्दर्यं वैशिष्ट्यञ्च वर्णयति, चन्द्रज्योत्स्नां प्रणमति च -

धावन्तीं प्रियसखिजनैरुत्प्लवन्तीं तदानीं

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

क्रीडन्तीं वा जनककुसुमां मैथिलेषु समेषु ।
ग्रामाद् ग्रामं वनमुपवनं वीथिषु शाद्वलेषु
गच्छन्तीं तां मुनिजननुतां चन्द्रज्योत्स्नां नमामि ॥६॥

धादिङजनपदीयो मीमांसकः प्राध्यापकः स्व.डिल्लीप्रसादगौतमो यज्ञस्य महत्त्वं दर्शयति - 'निःश्वासभूताः वेदाश्च सर्वे यज्ञस्य धारकाः । कर्मयज्ञविदो नाथाः स्वर्गफलप्रदायकाः' इति कथयति । खेमरञ्जभट्टराई वालसन्तस्य चरित्रं वैशिष्ट्यञ्च प्रकटयति सुललितैः पद्यैर्यथा - **'अत्रैव राधाहरिमन्दिरस्य निर्माणकार्यं विहितं पवित्रम् । प्रवर्तिता येन च कुम्भमेला तं बालसन्तं शरणं प्रपद्ये'** इति ।

दार्शनिककविः शरत्कुमारभट्टराई व्रह्मसम्वन्धिनीं स्वस्यानुभूतिं प्रकटयति । यथा-

सदेव भासते सर्वं नेह नानास्ति किञ्चन ।
इत्यादि श्रुतिवाक्यं च संशन्ति वेदवादिनः ।
अध्यासाद् दृश्यते लोकस्तत्त्वतस्तु न दृश्यते ।
ज्ञानेन तन्निवर्त्येत यथा रजतशुक्तिकम् । इति ।

गुल्मीजनपदीयो लक्ष्मीकान्तपन्थी सुरगिरा श्रीकृष्णं नमति, कृष्णतत्त्वस्य महत्त्वं गायति च । झापाजनपदीयः सहप्राध्यापको रोहिणीविलासलुइँटेलो नटेश्वरस्य महत्त्वं गायति, नटेश्वरं प्रणमति, स्तौति च । दामोदरपोखेलः सुरगिरा ओंकारस्य महत्त्वं प्रतिपादयति-

ॐकारेण समन्विता सुखकरी लोकत्रये संस्थिता
तद्रूपा मुनिवर्गसेवितपदा तापत्रयोत्तारिणी ।
तस्येशस्य सदा समस्तसवितुर्ज्योतिर्मयी शाश्वती,
सा देवी त्रिपदी स्मिता मनसि मे दिव्यं महो दीपयेत् ।' इति ।

कविर्भीमप्रसादः कण्डेल अपि प्रौढपाण्डित्यपूर्णशैल्यां दवर्शनिकं भावं व्यनक्ति यथा -

वेद्यं समस्तं चितिसंप्रसारणं
स्वर्णं हि तत् स्वर्णविवर्तभूषणम् ।
अखण्डतृप्तिः परिपूर्णदृष्टितः
क्रीडा पुनश्चिन्मयराज्यसृष्टितः ॥ इति ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अन्येषां कावीनां कवितासु च दार्शनिकं भावं प्राप्यते, ताः कविताश्च पठनीया सन्ति ।

(च) प्रकृतिवर्णनम्

कतिपयैः कविभिः प्रकृतेः सौन्दर्यं सुरगिरा वर्णितम् । नेपालस्य प्रकृतिः, वनराजीनां सौन्दर्यं, निर्झराणां मनोहरता, हरितनदनदीपु भूमिषु पशूनां ततिः, गगने खगानां पङ्क्तिः, हिमशैलस्य सौन्दर्यमेभिः कविभिः परिगीतमिति कवीनां काव्यसौन्दर्यं दृष्ट्वा मोमुह्यते मम मनः ।

कविमाधवभट्टराईमहोदयोऽवनीसुषमाया वर्णनं करोति स्वकीयैः पद्यैः -

भाति स्थली प्रकृतिसुन्दरराजधानी, रम्या गिरेर्हिमवतोऽङ्कतले निषण्णा ।
शैलैर्मनोज्ञवनकुञ्जयुतैः समन्तादावेष्टिता कुसुमिता युवतीव साक्षात् ॥

कविवेणीमाधवढकालोऽपि नेपालकीर्तिकौमुदीं शिखरिण्यां स्तौति -

जगत्तुंगैः शृंगैर्हिमगिरिगतैरञ्चितयशा
विलासानां साक्षी परमशिवयोः पुण्यपदयोः ।
नदीनां लीलाभूः प्रकृतिरमणीचुम्बितमुखः
युवा नेपालोऽयं विलसति महानायक इव ॥

तथैव कविष्टीकारामोऽधिकारी अपि प्रकृतिजगतो वर्णनं करोति ।

सूर्यो भवेज्जनहिताकलनानुकूल श्चन्द्रोऽस्तु विश्वहितकृत् स्वकलादुकूलः ।
तारागणोऽभयकरोऽस्तु सदा नराणां शान्तिप्रियो भवतु नूतनवत्सरोऽयम् ॥

विष्णुराज आत्रेयः प्रकृत्या सौन्दर्यमसाधारणया सुन्दरशैल्या सम्पादयति विलोक्यताम्-

दिशः प्रसन्ना विदिशः प्रसन्नाः विभावरी चाऽस्तमिता विषण्णा ।
व्रतत्यथो श्लिष्यति वातजातं जातं जगत्यामथ सुप्रभातम् ॥

उषसि कियत्सौन्दर्यं प्रकृतिजगति प्रसृतं भवति, कविकल्पना अस्ति यत् -

रागैः परागैर्विविधैर्मनोज्ञैस्तैः पुष्पशब्दैस्तरवः प्रफुल्लैः ।
आमोदरूपैर्ध्वनिभिस्तदानीमुदीरयन्तः किल सुप्रभातम् ॥ इति ।

दुर्गाप्रसाददहालः गङ्गां नमति स्तौति गङ्गाया स्तते गत्वा, आश्रमं निर्माय तत्रैव स्थातुं वाञ्छति । तुलस्याः मठो धेनुरपि भवति चेत् तत्र स्वर्गस्य का आवश्यकता ? इति स श्लोकते -

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

'हे जह्नुप्रभवे ! तटे तव शुभे स्यादाश्रमः शोभनः,
स्याद्वेदाध्ययनं पवित्रवटुभिः प्रोच्चारितं मोहनम् ।
स्यादेकस्तुलसीमठः सुललितः स्याद्धेनुरेका शुभा,
किं नाकेन धनेन कल्पतरुणा किं भूपभोगेन वा । इति ।

कविमुकुन्दप्रसादोऽपि प्रकृतिजन्यं सौन्दर्यं गुम्फति स्वकवितायाम् -

'नद्यास्तटं सलिलवाहितदूष्यतत्त्वं, रम्यं वनं सुविपुलं विगतान्तरायम् ।
शान्तं यथा भवति तद्वदनल्पभद्रः, शान्तिप्रियो भवतु नूतनवत्सरोऽयम् ।'

तथैव काव्यरसानुरक्तो नवराजकट्टेलः प्रकृतेश्चाकचिक्यं वर्णयति सरलशैल्या-

"ध्वनिं माधुर्यं वै कलयति सदा कोकिलगणः,
सदाहूते पान्थं कुहुकुहुवचोभिश्च विपिने ।
कपोताः क्रौञ्चा वा हरितविपिने भान्ति सहसा,
वकानां पङ्क्तिर्वा सुगगनतले गच्छति शनैः ।' इति ।

आनम्य नेपालभूमिं कविर्नारायणप्रसादशर्मकट्टेलोऽपि नेपालस्य प्रकृतिसौन्दर्यं वर्णयति-

'एषा मदीया ननु जन्मभूमिर्नेपाल भूमिर्विबुधाग्र्यभूमिः ।
हिमालमाला वनशैलबाला वहन्ति नद्योऽत्र जलैर्विशालाः ।
क्रोडे हि यस्या नगराजबालाः मृगाश्चमर्यो मृदुकोकिलाश्च ।
भृङ्गा विहङ्गा बहुवर्णभङ्गाः क्रीडन्ति नित्यं विलसन्ति नित्यम् ।' इति ।

अन्यैश्च कविभिः प्रकृतेः सौन्दर्यं परिगीतमार्षभूमेर्महत्त्वं वर्णितञ्च । नेपालस्य नदनदीनां, हिमशैलानां, निर्झरझर्झराणां, वनराजीनां पशुपक्षीणाञ्च सौन्दर्यं स्थूलरूपेण सूक्ष्मरूपेण वा प्रस्तुतम् ।

४. रसभावादिदृष्ट्या कवितानां विवेचनम् -

अत्रत्याः कविता विभिन्नासु भावलयशैलीषु विरचिताः सन्ति । गाढबन्धा शिथिलबन्धा च रचनापद्धतिरत्रावलम्बिता । गद्यलयेषु पद्यलयेषु एतासां कवितानां रचना विहिता अस्ति । अत्रत्याः कविताः प्रायेण शास्त्रीयच्छन्दःसु निबद्धाः । कतिपया वर्तन्ते कविताः स्वतन्त्रगद्यलये च संरचिताः । तानि च शास्त्रीयच्छन्दांसि विलसन्ति- शार्दूलविक्रीडित-स्रग्धरा-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मालिनी-शिखरिणी-वसन्ततिलका-वंशस्थ-द्रुतविलम्बितेन्द्रवज्रोपेन्द्रवज्राप्रभृतीनि ।

ध्वनिव्यञ्जनादिदृष्ट्या च कवितानां विवेचनं कर्तुं शक्यते । अत्रत्याः प्रायः कविताः न व्यञ्जनावृत्तियुताः, काश्चिदेव व्यञ्जनां ध्वनयन्ति । अभिधाशक्तिरेव तासां कवितानां शक्तिः । तथापि सिद्धहस्तानां कवीनां कविता अभिधाशक्तिमतिक्रम्य व्यञ्जनामभिव्यञ्जयन्ति, कवितायाः उत्कर्षं द्योतयन्ति । यथा– 'हे धूम निर्गच्छ रे' **'शान्तिश्चिरं रोदिति' 'मातृभूशोकदुर्दिनम्' 'परं गृहे भा न विराजते कुतः' 'क्व विद्यते राष्ट्रियता समुज्ज्वला'** 'त्राणदाता मुरारिः' **'नेपालस्य वर्तमानस्थितिः' 'न देशो नूतनायते ?' 'नवनेपाल आगतः' 'हा गण्डकि ! त्वं कथमत्र लोहिता', 'नमत रे मनुजाः ! सकलं खलम् !!' ! 'विकस्वरा शठ-नीतिः', 'शान्ते एह्येहि' 'चिद्विलासः'** प्रभृतिषु कवितासु मनोरमं व्यङ्ग्यं प्राप्यते । यथा ध्रुवप्रसादभट्टराईकवेर्लघुतमायां रचनायां –

काको गच्छति मन्दिरं प्रतिदिनं स्नातुं च गङ्गातट-
मुक्तं ब्राह्मव्रतं महाव्रतमिदं पुत्रैरजायाः पुनः ।
घृष्टिश्चन्दनलेपने पटुतमो व्यासासने रासभः
शाकाहारपुराणकं विरचयेत् कौलेयकः कोविदः ॥ इति

रसभावदृष्ट्यापि सङ्ग्रहस्थानां कवितानां विवेचनं कर्तुं शक्यते । लघुकवितासु, मुक्तकेषु च रसस्य परिपाको नैव भवति, केवलं रसोदया भावोदया भवन्ति । काव्यशास्त्रे रसपरिपाकस्य, रसोदयस्य, भावोदयस्य, रससङ्करताया भावशवलतायाश्च कीदृशी स्थितिर्भवति तत्तु व्याख्यातमेव । विभावानुभावव्यभिचारि-संयोगाद्रसस्योत्पत्तिर्भवति । परन्तु लघ्वीषु कवितासु रसपरिपाकानां सामग्रीणामभाव एव प्रायेण प्राप्यते । तथापि रसोदयो भावोदयश्च भवति एव । अतोऽत्र प्रकाशितासु कतिपयासु कवितासु शृङ्गार-वीर-शान्त-करुण-हास्य-रसानामुपस्थितिर्दृश्यते ।

अलङ्कारदृष्ट्यापि सङ्ग्रहस्थानां कवितानां विवेचनं कर्तुं शक्यत एव । अलङ्कारस्य लक्षणं, तस्य प्रकाराश्च अलङ्कारशास्त्रेषु सोहापोहं विवेचिता एव । सामान्येनालङ्कारो द्विविध : शव्दाश्रितोऽर्थाश्रितश्चेति । शव्दालङ्कारा अनुप्रासयमकादयः । अर्थालङ्कारा उपमोत्प्रेक्षादृष्टान्तातिशयोक्त्यादयः सन्ति ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अत्रार्थालङ्कारस्याधिक्यं विद्यते। शब्दालङ्कारे कवीनां रुचिर्नैव प्राप्यते वर्धमाना।

भाषाशैलीदृष्ट्या च सङ्ग्रहस्थानां कवितानां विवेचनं कर्तुं शक्यत एव। अत्र कवीनां, प्राध्यापकानां, संस्कृतानुरागिणां, छात्राणाञ्च कविताः सङ्कलिताः। येषां खण्डकाव्यं, महाकाव्यञ्च प्रकाशितं विद्यते तेषां विद्वद्धौरेयाणां कविता अवश्यमेव प्रौढाः प्राञ्जलाः परिष्कृताः परिमार्जिताश्च। ये संस्कृतस्यैव प्राध्यापकाः सन्ति, संस्कृतगद्यभाषायां लिखन्ति च सम्यक्तया तेषां कवितापि प्रौढतां प्राञ्जलताञ्च वहत्येव। ये नेपालीविषयं येऽन्यं विषयं वा पाठयन्ति तेषां कविताः परिष्करणीया एव दृश्यन्ते। ये च मन्त्रालयेषु वा अन्येषु क्षेत्रेषु कार्यं कुर्वन्ति तेषामपि रचना दुर्वला एव। ये संस्कृतस्यानुरागिण एव सन्ति तेषां तु का कथा ? छात्राणामपि का कथा ? तथापि तेषां प्रयासः स्तुत्यः प्रशंसनीयश्च। अथापि भाषाया विचाराणाञ्च प्रौढता अपेक्षितैवास्माभिः।

कतिपयसिद्धहस्तानां कवीनां कवितास्तु मधुराः सरसाश्च विलसन्ति। जयतु संस्कृतम् संस्थातः षोडशवर्षतो नैरन्तर्येणैव कवितागोष्ठी सञ्चालिता वर्तते। अतो नवप्रतिभानाङ्कृतेऽपि अवसरो जातः। ये विषयगतप्रौढत्वं भाषागतप्रौढत्वं नावहन्ति तेषां कवित्वं दुर्वलम्। प्रतिभाभ्यासव्युत्पत्तयः काव्यस्य हेतुरिति काव्यकोविदैः निर्धारितमेव। प्रतिभायाः सत्त्वेऽपि व्युत्त्पत्तिसत्वेऽपि अभ्यासाभावात् नैपालकानां कवीनां कवित्वं दुर्वलमिति मम धारणा वरीवर्ति। ये संस्कृतमेव पठन्ति पाठयन्ति च तेषाङ्कृतेऽपि संस्कृतस्य संरक्षणाय संवर्धनाय च समुचितो वातावरणो नैव विद्यते, कतिपयास्तु जीवनवृत्तिमेवावहन्ति, सर्जनशीले मार्गे गन्तुं नैव रोचन्ते। गद्यपद्यलेखनस्य, श्रवणस्य श्रावणस्य वा समुचिता व्यवस्था न, संस्कृतविश्वविद्यालयस्तु अस्ति परन्तु सा संस्थेदृशं कार्यं नैव सम्पादयति, भुङ्क्ते, भोजयते च। संस्कृतभाषायां कविता केन प्रकारेण लेखनीया, भावविचारयोः प्रसारणं कथं कर्त्तव्यं, भाषायाः संयोजनं कथं, शैल्याः सन्धानं कथं, गद्यलयस्य पद्यलयस्य वा उपयोगः कथं, विम्वप्रतीकयोः संयोजनं कथमिति तु न कुत्रापि पठ्यते, पाठ्यते न वा विचारविमर्शः क्रियते, न प्रशिक्षणस्य व्यवस्था, न कार्यशालाया अनुशीलनम्, न पारितोषिकस्य

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

व्यवस्था तथापि केचित् काव्यरसिका लिखन्ति अयं हर्षस्य विषयोऽस्ति। तेभ्यः संस्कृतकविभ्यः चिन्तकेभ्यश्च हार्दीं कृतज्ञतां साधुवादञ्च ज्ञापयामि।

५. अन्ते च

जयतु संस्कृतमिति संस्थया आयोजितासु वह्वीषु कवितागोष्ठीषु श्राविताानां कवितानां सङ्ग्रहोऽयम्। इयं संस्था षोडशवर्षतो नैरन्तर्येण संस्कृतकविसम्मेलनं समायोजयति। पश्चाच्च नैरन्तर्येणैव सा गोष्ठी प्रचलिष्यतीति संस्थायाः सुदृढो विश्वासो वर्त्तते। अस्मिन् सङ्ग्रहे बहूनां कवीनां बह्व्यः कविताः सन्निविष्टाः सन्ति। 'निरङ्कुशाः कवयः' इति कथनं तु प्रसिद्धमेव। अतः कवयोऽनेकेषु विषयेषु, अनेकासु शैलीषु च कवितां कुर्वन्ति। अत्र विषयदृष्ट्या प्राधान्येन (क) सुरवाण्याः प्रशस्तिः (ख) हत्याहिंसादीनां विरोधः (ग) राजनीतिकव्यङ्ग्यम् (घ) शृङ्गारभावधारा, (ङ) धर्मदर्शनभावयुताः कविताः (च) प्रकृतिवर्णनम्, विकृतिचित्रणञ्च (छ) विदुषां सदाचारिणां योगिनाञ्च स्मरणमित्यादिविषयेषु संरचिताः सन्ति कविताः। प्राधान्येन पद्यशैल्यां काश्चित् गद्यशैल्याञ्च विरचिताः कविताः रचनाकौशलं प्रदर्शयन्ति। कतिपयासु परिष्कृतासु कवितासु रसालङ्कारध्वनीनां सुप्रयोगेण काव्यसौन्दर्यं प्रकटितमेवानुभूयते। कासुचन कवितासु भावस्य विचारस्यैव वा प्रकाशनम्। यत्किञ्चिदपि भवतु कवीनां प्रयत्नः संस्थायाः प्रयासश्च प्रशंसनीयो मन्तव्य एवेति ममानुभूतिः।

जयतु संस्कृतम्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जयतु संस्कृतं धर्मभूतये, जयतु संस्कृतं लोकभूतये ।
जयतु संस्कृतं राष्ट्रभूतये, जयतु संस्कृतं विश्वभूतये ॥

नेपालसर्वकारतः स्वीकृता सामाजिकी प्राज्ञिकी च सर्वकारीयेतरा संस्था

जयतु संस्कृतम् संस्थायाः प्रकाशनानि

१. मङ्गलग्रहः (काव्यम्)	-	डा. टीकारामः पन्थी
२. कृष्णाभिसर्पणम् (काव्यम्)	-	महाकविः भरतराजः मन्थलीयः
३. मीमांसातर्कभाषा	-	डा. काशीनाथः न्यौपाने
४. चन्द्रप्रभा (काव्यम्)	-	डा. टीकारामः अधिकारी
५. संस्कृतकवितासङ्ग्रहः (प्रथमपुष्पम्)	-	संयुक्तसम्पादनम्
६. कलमाक्षरचरितकाव्यम्	-	प्रा. तेजः केशरी शर्मा
७. संस्कृतमा के छ ?	-	अनुसन्धानात्मकलेखसङ्ग्रहः
८. जयतु संस्कृतम् (मुखपत्रम्)	-	संयुक्तसम्पादनम्
९. प्राकृतपोखरा (संस्कृते)	-	अनुवादकः डा. लक्ष्मीकान्तः पन्थी
१०. लङ्कावतारसूत्रम्	-	अनु.डा. काशीनाथः न्यौपाने
११. चार्वाकदर्शनम्	-	प्रा. रेवतीरमणः खनाल
१२. गौतमन्यायसूत्रम्	-	अनु.प्रा. पद्मप्रसादः भट्टराई
१३. ब्रह्मसूत्रम्	-	अनु.प्रा.डा. दीर्घराजः घिमिरे
१४. जयतु संस्कृतम् (मुखपत्रम्)	-	संयुक्तसम्पादनम्
१५. संस्कृतकवितासङ्ग्रहः (द्वितीयपुष्पम्)	-	संयुक्तसम्पादनम्

जयतु संस्कृतम्
केन्द्रीयकार्यालयः, काष्ठमण्डपः, नेपालः
दूरभाषः ०१-४२३०३७१

Jayatu Sanskritam, Kathmandu, Nepal